सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

२३ वर्षे २ अङ्कः

वै० संवत् २०२५

प्रकाशनतिथिः

भाद्रपदपूर्णिमा, वै० सं०२०२५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

प्रधानसम्पादकः

श्रीबलदेव उपाध्यायः, साहित्याचार्यः, एम० ए०

सहायकसम्पादकः

श्री उमाशङ्करत्रिपाठी, व्याकरणधर्मशास्त्राचार्यः

२३ वर्षे २ अङ्कः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणिका

भारतीयदर्शनस्य चरमो विकासः शून्यवादे—डा० शान्तिभिक्षुशास्त्री, विद्यालङ्कार-
विश्वविद्यालये संस्कृतविभागाध्यक्षः ९५–१०४

क्षणिकविज्ञानवादो ब्रह्माद्वैतवादश्च—श्री ब्रह्मानन्दः, नवनालन्दामहाविहारेऽनु-
संधानप्राध्यापकः १०५–१०९

बौद्धनये नैरात्म्यसिद्धान्तः—श्रीकरुणेशशुक्लः, गोरखपुरविश्वविद्यालये संस्कृत-
विभागस्थः ११०–१२७

बौद्धमार्गानुसारिणी प्रमाणमीमांसा—आचार्यश्रीपरमानन्दशास्त्री, मन्दीरी, पटना १२८–१३८

श्रीमद्भागवतभाषापरिच्छेदः – श्रीचारुदेवशास्त्री १३९–१४९

श्रीमद्भागवतभाषापरिच्छेदविमर्शः—श्रीरामप्रसादत्रिपाठी, प्राचीनव्याकरणदर्शना-
गमविभागाध्यक्षो वाराणसेयसंस्कृतविश्वविद्यालयस्थः १५०–१५९

अनुसन्धानपद्धतिः—डा० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री' अनुसंधान-
संस्थानसदस्यो वाराणसेयसंस्कृतविश्वविद्यालये १६१–१९०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

// सारस्वती सुषमा
वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

२३ वर्षः } भाद्रपदपूर्णिमा, संवत् २०२५ { २ अङ्कः

भारतीयदर्शनस्य चरमो विकासः शून्यवादे

डॉ० शान्तिभिक्षुशास्त्री, विद्यालङ्कारविश्वविद्यालये संस्कृतविभागाध्यक्षः।

पूर्वंपूर्वम् अध्ययनं विनैव बौद्धशास्त्राणां यदा मया शून्यवादः श्रुतः, तदा मे महद् भयमुपजातम्। इदं मे मनस्यभूत्—हन्त ! इदमपि दर्शनं नाम, यत्र सर्वमिदं शून्यं कथ्यते। विविधैस्तरुलतानिकुञ्जैः पत्रपुष्पफलैः सस्यश्यामैः क्षेत्रैरुपवनवाटिकारामैर्वापीकूपतटाकैर्गृह-भवनकुटीविहारमन्दिरैर्नदीनदवनपर्वतैः पशुपक्षिमृगमनुष्यैरशून्यमेव सर्वमिदं दृश्यते। एवं सत्यपि कथमिदं सर्वं शून्यं कथ्यते। मन्ये, शून्यवादचिन्तकः कस्मिन्नपि निर्जले महाकान्तारे बन्दीकृतो बभूव। तस्मादेव मरुस्थलनिवासेन सह नितरां परिचितया मृगतृष्णया विमोहितः शून्यवादं प्रादुर्भावयामासेति। अथ प्रबलया जिज्ञासया प्रेरितः प्रयत्नमकार्षम् अहं पठितुं बोद्धुं च बौद्धशास्त्राणि। ततो ज्ञातं मया यत् सर्वे बौद्धाः प्रायेण शून्यवादिनः। अहम्-इति, वयम् इति, ममेदम् इति, 'इदमात्मनः' 'इदमात्मीयस्य' इति बहुविधम् आत्मपर्यायैर्व्यवहरन्तोऽपि ते सर्वमिदम् आत्मशून्यम् इति प्रवदन्ति। प्रायेणात्र न कोऽपि बौद्धः शङ्कते। अपि च मयेदमपि विज्ञातं यदेते शून्यवादिनो बौद्धा न मृगतृष्णया विमोहिता जनाः। कृतं तैः पुरातने काले महावीर्यं कर्म। आख्यानेषु श्रूयते यद् महावीरो हनूमान् समुद्रमुल्लङ्घ्य लङ्कां जगाम। परं लङ्कामुपगम्य न कोऽपि शृणोति हनूमतः ख्यातिम्। ख्यातिस्तु तत्र श्रूयते काषायवसनानां शून्यवादिनाम्। एतैः पुरातने काले भारतस्य सुवर्णाक्षरलेखनीयम् इतिहासं सृजद्भिः सुमेरो-र्मूलादारभ्य भारतमहासागरस्य चरमां सीमानम् अभिव्याप्य सर्वत्रैव कृतं वीरकर्म। प्रतिष्ठा-पिता शाक्यमुनेश्चरितैः सह भारतभूमेर्महती प्रतिष्ठा देशदेशान्तरेषु। एते बुद्धानुयायिनो यादृशं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धर्मस्य महाराज्यं बुद्धिशीलबलाभ्यां सकले जम्बूद्वीपे प्रतिष्ठापितवन्तस्तादृशं मोहम्मदखीष्ट-धर्मानुयायिनः शस्त्रदण्डबलाभ्यां च लोभलाभाभ्यां च जनतां सर्वथा प्रतार्यापि नैव प्रतिष्ठापयितुं समर्था बभूवुः। एतादृशं वीरकर्म न तादृशेन शून्यदर्शनेन कथमपि भवितुं शक्यं यादृशं शून्यदर्शनं प्रायेण शब्दतोऽर्थतो वा वयं गृह्णीमः। नहि किमपि दर्शनं दार्शनिकानां जीविताव-दानैर्विरहितम्, तेषां कृतैर्वीरकर्मभिरसंपृक्तम्, तेषामध्युषितस्य समाजस्य चरित्रेणासंबद्धं कथमपि बोद्धुं शक्यते। वीरकर्ममयं देशकालानुरोधि जीवनमेव प्रतिक्षणं नूतनं दर्शनमुद्-भावयितुं प्रेरयति। वीरकर्महीनं देशकालविरोधि जीवनं दर्शनविमुखं भवति। श्रूयते पुरा जराजीर्णापि भक्तिर्वृन्दावनं प्राप्य युवती बभूव। मन्ये, प्रगतिशीलेऽस्मिन् युगे विद्याभूमिमिमां लब्ध्वा पण्डितप्रवीराणामाश्रयं प्राप्य शून्यतापि तथैवाचिरेण युवती भवित्री। किं बहुना, इतिहासदृष्ट्यापि शून्यतादर्शनं बोद्धुं न कदाप्यस्माभिर्विस्मर्तव्यं यदेतद् दर्शनं केषाञ्चन भारतभूमिपुत्राणां परमं प्रियं मतमासीत्। तैश्च भारतभूमिपुत्रैर्यादृशी सेवा भारतजनन्याः कृता, न तादृशीं सेवामपरे चक्रुः। ते प्रायेण पद्भ्यां भूमण्डलं पर्यटन्तः, शीतोष्णबाधाम-गणयन्तः, नानाशास्त्रग्रन्थान् प्रणयन्तः, करुणया जनान् उपदिशन्तः, देशकुलजातिबन्धना-न्यवमुच्य सर्वलोकहितकाम्यया प्रचरन्तः, शस्त्रदण्डविरहितेन केवलेनात्मबलेनैव धर्मं प्रचारयामासुः। यदि भवन्तो नैवं चिन्तयेयुः, मन्ये शून्यवादस्याभिप्रायं तथैव नाभिनन्देयुर्य-थाहं पूर्वपूर्वम् एवमचिन्तयन् नाभिनन्दितवानस्मि। एतस्यां भूमिकायां स्वयं स्थित्वा भवतश्च स्थापयित्वा शून्यवादचर्चां कर्तुमिच्छामि मातृका एता उपादाय। तद्यथा—(१) शून्यवादस्य परिभाषा; (२) पदार्थानां विषये शून्यवादसिद्धान्तः; (३) सर्वशून्यता; (४) शून्यवाददृष्ट्या स्वलक्षणसामान्यलक्षणविचारः; (५) अविवादः शून्यवादस्य सर्वैः सहेति।

शून्यवादस्य परिभाषा

शून्यवादस्य परिभाषा वस्तुतो जीवनस्यैव विद्यते। जीवने जनः कारणपूर्वकं कार्यं पश्यन् येन कार्येण प्रयोजनं सिद्ध्यति तज्जनकं कारणमुपादत्ते। आम्रराजीं कर्तुमिच्छन्नाम्र-बीजान्युपादत्ते, गोधूमार्थी वापमङ्गले गोधूमबीजानि वपति, व्रीहिषु प्रयोजनवान् व्रीहिबीजैरेव करोति कृषिकर्म। अयमेव लोके सर्वत्रानुभूतो नियमो बौद्धशास्त्रेषु; अस्मिन् सतीदं भवति, अस्मिन्नसतीदं न भवति—इति सूत्रेणोच्यते। एतमेव नियमं प्रतीत्यसमुत्पादशब्देन संकेतयन्ति। अयमेव नियमः शून्यताशब्देन संकेतित आचार्यनागार्जुनप्रभृतिभिः। अयं शब्दसंकेतः सर्वसाधारणव्यवहारे सर्ववस्तुस्वभावं बोधयति, परं दर्शने वस्तूनां यादृशः स्वभावः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परिकल्पितोऽस्ति लोकैस्तस्य लोकस्वीकृतस्य परिकल्पितस्वभावस्य तत्त्वचर्चायां प्रतिषेधं करोति। एवं लोके व्यवहृतानि यानि वस्तूनि सन्ति, तानि व्यवहारकाले तथा स्वीकुर्वन्नपि तत्त्ववादी तेषां स्वभावं लोकप्रसिद्धं न स्वीकरोति। लोकस्य तत्त्ववादिनश्च मध्ये भेदमेतं विहाय नास्त्यन्यः कोऽपि भेदः। पितृपुत्रोदाहरणेन साम्प्रतं प्रपञ्चयाम्येतत्। पिता हि कारणम्। पुत्रो हि कार्यम्। एतदेव लोकसत्यम्। परं यः पिता कथ्यते, स ध्रुवं न पिता। सोऽस्ति कस्यचित् पुत्रः। यश्च पुत्रः सोऽपि न ध्रुवं पुत्रः, सोऽपि भवति कस्यचित् पिता। एवं पितृव्यवहारः पुत्रव्यवहारसापेक्षः, पुत्रव्यवहारश्च पितृव्यवहारसापेक्षः। पुत्रनिरपेक्षो नास्ति कोऽपि पिता। पितृनिरपेक्षो नास्ति कोऽपि पुत्रः। एवं लोको यद् यद् वस्तु कारणवर्गे निक्षिपति, यद् यच्च कार्यवर्गे निक्षिपति, तस्य सर्वस्येयमेव दशा। कारणवर्गे निपतितं किमपि वस्तु कार्यवर्गे निपतितात् कस्मादपि वस्तुनः सर्वथा स्वतन्त्रं पृथग्भूतं निरपेक्षं सत् कार्यव्यपदेशभाग् न भवति। नापि च कार्यवर्गे निपतितं किमपि वस्तु कारणवर्गे निपतितात् कस्मादपि वस्तुनः सर्वथा स्वतन्त्रं पृथग्भूतं निरपेक्षं सत् कार्यव्यपदेशभाग् भवति। न कारणं कार्यनिरपेक्षं भवितुं शक्यम्, नापि कार्यं कारणनिरपेक्षं भवितुं शक्यम्। कार्यसापेक्षमेवात्र कारणम्, कारणसापेक्षमेवात्र कार्यम्। कारणस्य कार्यसापेक्षतया यतो व्यवहारस्तस्मान्नास्ति स्वभावतोऽत्र किमपि कारणम्। एवमेव कार्यस्य कारणसापेक्षतया यतो व्यवहारस्तस्मान्नास्ति स्वभावतोऽत्र किमपि कार्यम् इत्यादि तत्त्वं व्यवहारकाले न कोऽपि स्मरति। स्वभावतः स्थितिर्या व्यवहारकाले कारणस्य च कार्यस्य स्वतन्त्रतया स्वीक्रियते, अशून्यता सा लोकव्यवहारतः। इयम् अशून्यता न स्वभावतो वर्तत इत्येतद् वक्तुमेव तद्विपरीतः शून्यताशब्दः प्रयुज्यते तत्त्ववादिभिः। एतस्मिन् विषये विस्तरशश्चर्चा प्रकारैर्बहुविधैर्मध्यमकशास्त्रे वर्तते। विग्रहव्यावर्तिन्यामपि सोऽयं प्रसङ्गः संक्षेपेण दृश्यते। सारांशोऽयमेव सर्वस्यासमासव्यासविचारस्य यत् कारणवर्गे यानि विविधानि वस्तूनि निक्षिपति लोकः, तानि सर्वाणि निरपेक्षाणि न सन्ति, सापेक्षाण्येव तानि। यद् यत् सापेक्षं तस्य नास्ति कोऽपि ध्रुवः स्वभावः। तत एव तस्य निःस्वभावता, निःस्वभावतया तस्य शून्यता कथ्यते, न त्वभावतया तस्य शून्यता। एतन्मदुक्तं सर्वं शून्यवादपरमेश्वरस्य तात्पर्यानुसारेणैव। तथा प्राह महामतिराचार्यः—'यदि स्वभावतो भावा भवेयुः, प्रत्याख्यायापि हेतुप्रत्ययं भवेयुः, न चैवं भवन्ति तस्मान्निःस्वभावाः, निःस्वभावत्वाच्छून्या इत्यभिधीयन्ते' इति। अत्रार्थे कारिकापि—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यश्च प्रतीत्यभावो भावानां शून्यतेति सा ह्युक्ता।
प्रतीत्य यश्च भावो भवति हि तस्यास्वभावत्वम्॥ इति।

—विग्रहव्यावर्तिनी, २२ कारिका।

शून्यताया इयं परिभाषा न किमपि भयं जनयति, नापि कमपि भ्रमं तनोति, न व्यवहारं विलोपयति, नापि तत्त्वचिन्तायां बाधां विनिपातयति। लोके प्रसिद्धं परस्परनिरपेक्षभावेन सम्मतं कार्यकारणव्यवहारमाश्रित्य क्रमेण यथा तत्त्वचर्चया समीचीनायां पद्धतौ प्रस्थातव्यम्, तथा प्रस्थानं विरचितमाचार्येण। न ह्याचार्यः किमप्यदृष्टपूर्वम् अबुद्धिगोचरं वा वस्तु समक्षम् उपन्यस्य तत्त्वचर्चां प्रवर्तयितुमिच्छति, प्रत्युत सर्वजनसिद्धं विदुषापि व्यवहारे समादरणीयम्, पामरेणापि व्यवहारे सत्करणीयं कार्यकारणभावमुपादाय प्रतिष्ठिते तत्त्वचिन्तामार्गे। किं बहुना, सापेक्षकार्यकारणभाव एव शून्यता। इयमेव तत्त्वचिन्तापद्धतिर्यस्यां चरद्भिः प्रवर्तनीयं भवति दर्शनम्।

पदार्थानां विषये शून्यवादसिद्धान्तः

लोके बहवः पदार्थाः सन्ति। तेषु ये लोकव्यवहारसिद्धास्तेषां प्रायेण सर्वेषां कार्यकारण-वर्गे भवति समावेशः। अथ सन्त्यपरे पदार्थाः शास्त्रे प्रसिद्धाः। तेषां संख्या भूयसी, तथापि शास्त्रे व्यवहृताभ्यां प्रमाणप्रमेयाभ्यां ते नातिरिच्यन्ते। तत्र शून्यवादनयेन कार्यकारणवर्गः कृतविचारः। प्रमाणप्रमेयवर्गः साम्प्रतं विचारणीयः। प्रमाणप्रमेयसंख्या यस्मिन् यस्मिञ्छास्त्रे यादृशी वर्तते तादृशी वर्ततां नाम, न तत्र शून्यवादस्य कोऽप्याक्षेपः। परं शून्यवादनयेन न निरपेक्षभावस्तेषां कथमपि सिध्यति। प्रमाणं हि नाम साधनम्। तत् स्वतःसिद्धं न संभवति। साधयन्नेव वस्तुजातं साधनमुच्यते। एवं साध्यवस्तुपरतन्त्रमेव साधनं भवितुं शक्यम्, न तु स्वतन्त्रम्। साध्यपरतन्त्रस्य साधनस्य स्वतन्त्रा साधनसंज्ञा प्रामादिको व्यवहार एव। साध्यं हि वस्तु साधनं साधननाम्ना प्रसाधयति, करोत्यन्वर्थं साधनव्यपदेशयोग्यम्। यत् स्वसिद्धये परमुखापेक्षि वर्तते, तत् कथं नाम साधनाभिधानं स्वतन्त्रम् अभिमन्तुमीष्टे। एवं साधनभूतं किमपि निरपेक्षं वस्तु नास्ति यस्य प्रमाणसंज्ञां कुर्वन्ति युक्तिकुशलाः। इन्द्रियाणि साधनान्युच्यन्ते युक्तिवादिनां सदसि। व्यवहारे तु तानि नैकान्तेन साधनानि। तथा हि नेत्राभ्यां विलोकयतोः प्रिययोर्नेत्रेन्द्रिये साधने साध्ये च युगपद् भवतः। अत एव युक्तिवादिनां मध्ये केचन कुशलाः प्रमाणप्रमेयभावं निरपेक्षं न स्वीकुर्वन्ति। तथा चाह वात्स्यायनः—'प्रत्यक्षादीनि प्रमाणा-न्युपलब्धिसाधनत्वात्, प्रमेयं चोपलब्धिविषयत्वात्। बुद्धिरुपलब्धिसाधनत्वात् प्रमाणम्,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपलब्धिविषयत्वात् प्रमेयम्' इति (न्यायसूत्रवात्स्यायनभाष्यम् २/१/१६)। अभिनन्दामि शून्यवादानुकूल वात्स्यायनसुभाषितम्। स्वतन्त्राः, निरपेक्षाः, स्थिराः, ध्रुवाः पदार्था न सन्ति शून्यवादे। स्वतन्त्रताया निरपेक्षतायाः स्थिरताया ध्रुवताया यस्य नास्त्याग्रहः स खलु शून्यतां बुध्यति, स वै शून्यवादी। यस्य च युक्तिवादिनो भवत्याग्रहः प्रमाणानां वा प्रमेयाणां वा निरपेक्षतायां स्वतन्त्रतायां स्थिरतायां ध्रुवतायां तेन मनसि करणीयेयमाचार्यस्य रुचिरार्या—

अथ ते प्रमाणसिद्ध्या प्रमेयसिद्धिः, प्रमेयसिद्ध्या च।
भवति प्रमाणसिद्धिः, नास्त्युभयस्यापि ते सिद्धिः॥ इति।

—विग्रहव्यावर्तिनी, ४७ कारिका।

स्वतो भिन्नेन प्रमाणेन सिद्धं यत् प्रमेयं भवति तत् स्वतः सिद्धं नास्तीति को नाम न स्वीकुर्यात्। स्वतो भिन्नेन प्रमेयेण यस्य स्वनामलब्धिस्तत् प्रमाणं स्वतः प्रमाणं नास्त्येवेति न कस्यापि विमतिः। प्रमाणप्रमेययोः सापेक्षव्यवहारः संमत एव शून्यवादे। यस्यां यस्यामवस्थायां व्यवहारे यद् यद् वस्तु प्रमाणं भवति, यद् यद् वस्तु वा प्रमेयं भवति, तस्य तस्य सर्वस्य यथाव्यवहारं स्वीकृतस्य निःस्वभावतैव नाम शून्यता। तथा चाहुः— "न वयं व्यवहारसत्यं प्रत्याख्याय व्यवहारसत्यमनभ्युपगम्य कथयामः शून्याः सर्वभावाः" इति (विग्रहव्यावर्तिनी, २८ कारिका)। व्यवहारतो लोके प्रायेण ये सस्वभावाः पदार्थाः, तेषां निःस्वभावताप्रतिपादनमेव शून्यवादः। पदार्थानां निःस्वभावता केवला प्रतिज्ञा नास्ति। सर्वे पदार्थाः प्रतीत्यसमुत्पन्नत्वात् सन्त्येव स्वभावहीनाः। तथा चाहुः—' ये हि प्रतीत्यसमुत्पन्ना भावास्ते न सस्वभावा भवन्ति। यदि हि स्वभावतो भावा भवेयुः, प्रत्याख्यायापि हेतुप्रत्ययं भवेयुः" इति (विग्रहव्यावर्तिनी, २२ कारिका)।

सर्वशून्यता

आत्मशून्यं सर्वमिदं पश्यन्तो यद्यपि सर्वे बौद्धाः शून्यवादिनस्तथापि तेषामल्पाल्पवितर्कविचारभेदेन पुरा बभूवुः संप्रदायाः। तेषां परस्परं भेदः स्वल्पतमः। एवं सत्यपि शून्यतायाः सर्वांशेन बोधो न तेषां परिचयेन विना संभवति। न्यूनातिन्यूनं विचारचर्यायामेतन्मनसि करणीयमेव यदिदं सर्वं यदात्मशून्यं कथ्यते, तत्र सर्वशब्देन भूतभौतिकस्य चित्तचैत्तस्य ग्रहणं क्रियते। भूतभौतिकमखिलं बाह्यं तत्त्वम्। चित्तचैत्तमखिलम् अबाह्यं तत्त्वम्। बाह्याबाह्यम् उभयं तत्त्वं तत्त्वतोऽस्ति, तस्य बाह्याबाह्यस्योभयस्य तत्त्वस्य ज्ञानमपि तत्त्वतो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवति । एवं सर्वं भूतभौतिकं चित्तचैत्तं च किमपि ज्ञानरूपं भवति, किमपि ज्ञेयरूपं भवति, न ततोऽन्यथा । बाह्यं हि यद् ज्ञेयं तत् परमाणुपुञ्जमात्रम्, न तु किमपि पृथग्भूतम् एकं वस्तु । भूतभौतिकचित्तचैत्तधर्मा बहवस्तेषां पञ्च राशयः पञ्च स्कन्धाः । सर्वं भूतभौतिकं रूपस्कन्धः । चित्तं विज्ञानस्कन्धः । चैत्तेषु सुखदुःखोपेक्षारूपाणां वेदनानां समूहो वेदानास्कन्धः । विषयगतदृश्यादृश्यलणक्षानां बोधसमूहः संज्ञास्कन्धः । स्वलक्षणसामान्यलक्षणसम्यग्ज्ञानानां विस्तरेणायमेवार्थो बौद्धतर्के व्याख्यायते । सर्वाश्चित्तवृत्तयो जातिजरास्थित्यनित्यतादयश्च केचन धर्मा ये रूपचित्तचैत्तधर्मेषु कृताधिकारा अपि तेभ्यः पृथगुच्यन्ते, ते च संस्कारस्कन्धाः । एते सर्वे धर्मा निरन्तरं प्रतीत्यसमुत्पादनियमेन क्षणे क्षणे परिवर्तमाना अपि सन्त एव, तत एव व्यवहारः—अतीतं रूपम्, अनागतं रूपम्, प्रत्युत्पन्नं रूपम्, अतीतं चित्तम्, अनागतं चित्तम्, प्रत्युत्पन्नं चित्तम् इति । सर्वेषामेतेषां भूतभौतिकानां चित्तचैत्तानां च धर्माणां ज्ञानं प्रत्यक्षतो भवति । त एते ज्ञानज्ञेयवर्गान्तर्भूताः सर्वे धर्मा आत्मशून्याः । तथोक्तमभिधर्मकोशे—नात्मास्ति स्कन्धमात्रं तु (कोश) इति । एतद् वैभाषिकाणां मतम् । विभाषा हि ज्ञानप्रस्थानशास्त्रटीका । तदनुयायिनो वैभाषिकाः । ज्ञानप्रस्थानविभाषाधारेणैव कृतोऽभिधर्मकोशो महामतिना वसुबन्धुना । तत्र सर्वमेतद् वर्तते ।

अथापरे ये ज्ञानप्रस्थानविभाषानुयायिनो न सन्ति, प्रत्युत धर्मविचयपराण्यर्थविनिश्चयादिसूत्राणि प्रमाणत्वेन गृह्णन्ति ते सौत्रान्तिकाः स्वकीये तत्त्ववादे प्रायेण वैभाषिकसदृशाः । एतेषामपि ज्ञानज्ञेयपदार्थाः सर्वे प्रतीत्यसमुत्पन्नाः क्षणिकास्त्रिषु कालेषु व्यवहारार्हाः, बाह्यार्थाश्च परमाणुपुञ्जाः । वैभाषिका यथा चित्तचैत्तानां प्रत्यक्षमाहुस्तथैवैते वदन्ति, परं भूतभौतिकानां प्रत्यक्षविषय एते सचिन्ताः । एते कथयन्ति यद् बाह्यस्य विषयस्य चित्ते य आकारो वा यत् प्रतिबिम्बं वा प्रतिफलति, तावन्मात्रमेव प्रत्यक्षमस्माकं न ततोऽधिकम् । एवं सत्यपि न बाह्यस्य विषयस्य प्रत्याख्यानं क्रियते, बाह्यो विषयस्त्वभ्युपगम्यते । अस्याभ्युपगमस्य विद्यत एव कारणम् । तथा हि चित्ते (ज्ञाने) यत् प्रतिबिम्बं वा, आकारो वा प्रतिफलति, स सर्वदा न प्रतिफलति, प्रत्युत कदाचिदेव प्रतिफलति । यदा प्रतिफलति तदा तस्य कारणभूतो योऽर्थः स बाह्योऽर्थः । साक्षाद् ग्रहणं तु तादृशस्यार्थस्य नास्ति । आकार-(= प्रतिबिम्ब)-प्रत्यक्षेणानुनीते यद्वशादयं ज्ञानाकारः स बाह्योऽर्थः । एवं ज्ञानाकारो बाह्यार्थहेतुको ज्ञानस्य परिणामः । बाह्यार्थस्तु स्वयं जडः, अज्ञानरूपः, ज्ञानात् पृथगेव भवति । न तस्य ज्ञानेन सह किमपि तादात्म्यं संभवति । तत एव योऽयमाकारप्रतिभासः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स कथमपि बाह्यो नास्ति। तथोक्तम्—"यदि संवेद्यते नीलं कथं बाध्यं तदुच्यते" इति (तर्कभाषा, आयङ्गर०, ६४ पृष्ठ०)। यद्धेतुक आकारप्रतिभासः स हेतुरेव बाह्योऽर्थः। एवं सौत्रान्तिकानां मतेन ज्ञानज्ञेययोरन्यतरोंऽशो ज्ञानं प्रत्यक्षम्, ज्ञानस्य ये परिणामविशेषाश्चैत्तास्तेऽपि प्रत्यक्षाः, बाह्यविषयहेतुका ये साकारज्ञानस्य परिणामास्तेऽपि प्रत्यक्षाः, परं बाह्यविषया न प्रत्यक्षाः, प्रत्युत प्रत्यक्षप्रतिभासजनकत्वाद् अनुमेया इति हि स्थितिः।

द्वितयेऽप्येते वैभाषिकाः सौत्रान्तिकाश्च सर्वास्तिवादिनः। आत्मशून्याः सर्वधर्मा ज्ञान-ज्ञयरूपाः प्रतीत्यसमुत्पन्नतया त्रिषु कालेषु विविधास्ववस्थासु संसरन्त आसत इति मतमुभयेषाम्। उभयेषां मतेन बाह्यविषयं प्रतीत्य यो ज्ञानाकारस्तस्मात् पृथगेव सर्वथा बाह्यविषयो भवति, परं बाह्यविषयः प्रत्यक्षज्ञानपरिगृहीतो भवतीति वैभाषिकाः प्रवदन्ति, प्रत्यक्षज्ञानाकारजनक एवायं बाह्यविषयो न प्रत्यक्षज्ञानपरिगृहीतो भवतीति सौत्रान्तिका विचिन्तयन्ति। बाह्यार्थ-ज्ञानाकारात् पृथग् वदन्त एते द्वितये बाह्यार्थवादिनः। अथापरे बाह्यमर्थं स्वप्नदृष्टार्थवद् मनोविजृम्भणं तर्कयन्तो विज्ञानमात्रमेवात्र तत्त्वमिति पश्यन्तो विचारयन्ति यद् बाह्यविषयः पृथगस्ति ज्ञानकाराद् इति या कल्पना सा तत्त्वचर्चायां द्वैतभ्रमं तन्वती परित्याज्या। एकमेवात्र तत्त्वं यच्चित्त-ज्ञान-विज्ञप्ति-विज्ञान-मनःप्रभृतिभिः पर्यायैः कथ्यते। एतस्यैव द्वे भवतोऽवस्थे—ज्ञानं च ज्ञेयं चेति। ज्ञानं तत्र ग्राहकम्। ज्ञेयं ग्राह्यम्। ज्ञानस्य या ग्राह्यावस्था तस्या एव बाह्यविषयो भवत्येकदेशः। बाह्यार्थो ज्ञानात् पृथग्भूतः स्वीक्रियते लौकिकैर्जनैः प्राश्निकैश्च कैश्चिद् यथा सौत्रान्तिकैर्वैभाषिकैश्च, तथा नास्त्येवेति योगाचाराणां मतम्। तथा चाहुः—

विज्ञप्तिमात्रमेवेदम् असदर्थावभासनात्।
यद्वत् तैमिरिकस्यासत्केशोण्डूकादिदर्शनम्॥ इति।
—विंशतिकाविज्ञप्तिमात्रतासिद्धिः, १ कारिका।

तिमिररोगी कदाचिदभूतमपि पश्यतीत्यायुर्वेदशास्त्रे प्रसिद्धम्। तथा हि—

सिरानुसारिणि मले प्रथमं पटलं श्रिते।
अव्यक्तमीक्षते रूपं व्यक्तमप्यनिमित्ततः॥ १।

प्राप्ते द्वितीयं पटलमभूतमपि पश्यति।
भूतं तु यत्नादासन्नं दूरे सूक्ष्मं च नेक्षते॥ २।

तत्र वातेन तिमिरे व्याविद्धमिव पश्यति॥ ८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चलाविलारुणाभासं प्रसन्नं चेक्षते मुहुः ।
जालानि केशान् मशकान् रश्मींश्च··· ॥ ६ ।इति ।

—अष्टाङ्गहृदयम्, उत्तरस्थाने द्वादशोऽध्यायः ।

एतस्यां सर्वस्यां तत्त्वकथायां परिश्रमं कुर्वाणान् विश्रमायावकाशं दातुं शून्यवादी वदति—ज्ञानमेवेदं सर्वं कथ्यत इति । परं ज्ञानं ज्ञेयनिरपेक्षं नास्ति । निर्विषया ज्ञानकल्पना स्वप्नेऽपि नास्ति, प्रबोधे तु कथैव का । तस्माद् इह ज्ञानज्ञेये अपि परस्परसापेक्षे तत्त्वे । एते पृथग्भूते निरपेक्षे स्वतन्त्रे वा न कथमपि भवतः । प्रतीत्यज्ञेयं भवति ज्ञानम् । प्रतीत्यज्ञानमुच्यते ज्ञेयम् । अत एव विज्ञानस्कन्धोऽपि न स्वभावभूतः । प्रतीत्यसमुत्पन्नं हि सर्वमिदं निःस्वभावत्वाच्छून्यमेव, तत्र विज्ञानस्कन्धोऽपि भवत्यन्तर्भूतः, न तु कथमपि बहिर्भूतः ।

सर्वं यदत्रोक्तं तत् संग्रहीतव्यं साम्प्रतम् । भूतभौतिकं चित्तचैत्तं च यत् किमप्यत्र वर्तते तद् विज्ञप्तिश्च आलम्बनं चेति पदार्थद्वयेन संग्रहीतुं शक्यम् । इह वर्तते विज्ञप्तिः, इह वर्तते ततः पृथग् आलम्बनम् इति हि सामान्या लौकिकी स्थितिः । वैभाषिकाः सौत्रान्तिकाश्च लौकिकीं स्थितिमेव स्वदर्शने स्वीकुर्वन्ति । लोकाद् विशेषमेतदेव ते वदन्ति यदात्मशून्यमुभयं विज्ञप्त्यालम्बनम् । यद् वैभाषिका बाह्यस्यालम्बनस्य प्रत्यक्षं वदन्ति, यच्च सौत्रान्तिका बाह्यस्यालम्बनस्य प्रत्यक्षजनकत्वेऽपि प्रत्यक्षतां न श्रद्दधते, स भेदः स्वल्पः । निरालम्बना विज्ञप्तिरेवात्र यथा स्वप्नदर्शकस्य तिमिररोगिणो वा भवति—इति योगाचाराः प्राहुः । विज्ञप्तिरप्यात्मशून्या । शून्यवादिनां नयेन तु या विज्ञप्तिर्यदालम्बनं तत् सर्वं प्रतीत्यसमुत्पन्नत्वात् सर्वथा शून्यम् । आत्मशून्यत्वस्वीकार एव न पर्याप्तः । नहि शून्यवादिनो द्वेषः कोऽप्यात्मनि, प्रीतिर्वानात्मनि, येन स केवलस्यात्मनो निषेधाय बद्धपरिकरो भवेत् । आत्मानं व्यवहारे स्वीकृत्य सर्वधर्मांश्च व्यवहारेऽभ्युपगम्य स तत्त्वचर्चायां प्रवर्तते । क्रमेणात्मानं धर्मांश्च सर्वान् स्वदर्शने शून्यतयानुगृह्णाति, अशून्यतया व्यवहरति लोकव्यवहारे । सर्वशून्यतायामेव तस्यास्ति समादरः, न केवलायामात्मशून्यतायाम् । अत एव य आत्मा व्यपदिश्यते, ये चात्र धर्मा व्यपदिश्यन्ते ते शून्या एव । तेषामात्मधर्माणां व्यवहारे प्रत्याख्यानमकृत्वापि निःस्वभावदेशनाप्रसङ्गे प्रत्याख्यानं क्रियते । एतद्देशनाक्रमपाटवं चतुःशतके तत्रभवान् आर्यदेवो निरूपयामासैकेन श्लोकेन—

वारणं प्रागपुण्यस्य मध्ये वारणमात्मनः ।
सर्वस्य वारणं पश्चाद् यो जानीते स बुद्धिमान् ॥ इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शून्यवादनयेन स्वलक्षणसामान्यलक्षणविचारः

प्रतीत्यसमुत्पादनयेन कार्यकारणवर्गस्य, प्रमाणप्रमेयवर्गस्य, ज्ञानज्ञेयवर्गस्य निःस्वभावताप्रतिपादनमुखेन यथा शून्यता सिद्ध्यति तथोक्तम्। ज्ञानस्यैव विषयभूतं बौद्धतर्कशास्त्रे प्रसिद्धं द्विविधं ज्ञेयं स्वलक्षणं सामान्यलक्षणं चेत्युच्यते। तत्र स्वलक्षणं नाम यथावस्थितास्ते घटादयो विषया येऽस्माकं मनोजल्पैर्वाग्विकल्पैर्वा सर्वथैवासंपृक्ताः सन्ति, अस्माकं जलाहरणादिप्रयोजनस्य संपादनाय योग्यतां च बिभ्रति। ये च विषया मनोजल्पाकारा वाग्विकल्पाकारा वा सन्ति, येषाम् अस्माकं प्रयोजनसंपादनयोग्यता तदैव भवति यदा स्वरूपतो गृह्यन्ते, ते सर्वे सामान्यलक्षणं नाम। एकस्मिन्नपि पदार्थे स्वलक्षणसामान्यलक्षणव्यपदेशो भवति। तथाहि घटो येन लोको जलाहरणादिकृत्यं साधयति स उच्यते स्वलक्षणम्, यमधिकृत्य मनोजल्पः, वार्तालापः, कथा वा प्रस्तूयते स उच्यते सामान्यलक्षणम्। तत्र प्रत्यक्षे स्वलक्षणस्य पूर्वं भवति ग्रहणम्, अनन्तरं प्रवर्ततेऽध्यवसानम्। अनुमाने तु पूर्वं सामान्यलक्षणग्रहणम्, ततः स्वलक्षणाध्यवसानम्। एवमेक एव पदार्थोऽवस्थाभेदेन ग्राह्यः कदाचिद् भवति, अध्यवसेयः कदाचिद् भवति। तथाहि प्रत्यक्षे स्वलक्षणतया गृहीतोऽग्निः प्रथमक्षणे ग्राह्यः, क्षणान्तरेषु सामान्यलक्षणतयाऽध्यवसेयः। अनुमाने सामान्यलक्षणतया गृहीतोऽग्निः प्रथमक्षणे ग्राह्यः, क्षणान्तरेषु स्वलक्षणतयाऽध्यवसेयः। किं बहुना, ग्रहणमध्यवसानं च परस्परं प्रतीत्य भवतः। स्वलक्षणग्रहणं प्रतीत्य सामान्यलक्षणाध्यवसानम्, सामान्यलक्षणग्रहणं प्रतीत्य स्वलक्षणाध्यवसानम् इति शून्यवादनयेन वक्तुमुचितम्। प्रतीत्यसमुत्पन्नत्वाद् द्वयोः शून्यता च। एवं शून्यवादनयेन ध्रुवपदार्थता, नियतपदार्थता, निरपेक्षपदार्थता नास्ति कस्यापि पदार्थस्य, सर्वमेव शून्यम्।

अविवादः शून्यवादस्य सर्वैः सह

सेयं सापेक्षवादप्रतिपादिका शून्यता नाम सर्वतत्त्वविवेचनार्थं नयः। यथा लोके तुलया वस्तूनां गुरुलघुभावो मीयते, तथैव तत्त्वचिन्तने शून्यतया दर्शनवादा मीयन्ते गुरुलघुभावनिर्धारणेन। लोकानां प्राश्निकानां च सर्वं संमतम् ऊरीकृत्य ततः परम् अभिमतास्तेषां पदार्थाः कार्यकारणप्रमाणप्रमेय-ज्ञानज्ञेय-जन्ममरण-संसारनिर्वाणादयो निरपेक्षतया न स्वीक्रियन्ते, प्रत्युत सापेक्षाः प्रतिपाद्यन्ते। भिन्नभिन्नं सर्वमिदं पश्यतां लौकिकानां प्राश्निकानां च या भेददृष्टिः सा दूरीक्रियते द्वैतबुद्धिरधरीक्रियते, सापेक्षताप्रतिपादनमुखेनाभेदबुद्धिः प्रतिष्ठाप्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अद्वैतबुद्धौ परमादरः प्रादुर्भाव्यते। नष्टासु परात्मादिप्रभृतिषु सर्वासु दृष्टिषु तत्त्वं स्वयमेव प्रकाशमुपयाति। तथा चोक्तम्—

शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः।
येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे॥

जगदिदं शून्यं पश्यन्तोऽपि केचन तत्त्वचिन्तकाः सतृष्णा मोक्षे। ते तु मोक्षं विकल्पयन्ति। तथाहि लोके सुखम् अनित्यम्, मोक्षे सुखं नित्यम्, लोके सुखं मितम्, मोक्षे सुखममितम् इत्यादि। एषा कल्पना न वीतरागाणाम्। यः काकिणीं कार्षापणाशया त्यजति, न स वीतराग उच्यते। तत एव—

निर्वास्याम्यनुपादानो निर्वाणं मे भविष्यति।
इति येषां ग्रहस्तेषाम् उपादानमहाग्रहः॥ इति।

परमाचार्योक्तिं स्मारयन् सर्वविधासु तत्त्वचिन्तासु शून्यताधारेण सर्वमिदं परस्परसापेक्षं मन्तव्यमिति निवेदयामि। परस्परसापेक्षा एव वयं जीवने, तत्त्वचिन्तायां कथं परस्परसापेक्षा न भवेम। परस्परं भावयतामत्र श्रेयो भवत्येव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्षणिकविज्ञानवादो ब्रह्माद्वैतवादश्च

श्रीब्रह्मानन्दः, नवनालन्दामहाविहारेऽनुसंधानप्राध्यापकः।

सौगतसम्प्रदाये सौत्रान्तिकमाध्यमिकयोगाचारवैभाषिकनामानश्चत्वारो भेदाः सुप्रसिद्धाः। तत्र सौत्रान्तिकवैभाषिकौ सर्वास्तिवादिनौ। अर्थात् तौ ज्ञानवज्ज्ञेयस्यापि सत्यतामङ्गीकुरुतः। सौत्रान्तिका बाह्यार्थान् विज्ञानानुमेयान् मन्यन्ते। वैभाषिका बाह्यार्थानपि प्रत्यक्षसंवेद्यान् मन्यन्ते। योगाचाराः क्षणिकविज्ञानवादिनः। माध्यमिकाश्च सर्वं शून्यमिति वादिनः प्रसिद्धाः।

बाह्यार्थानां ज्ञानाकारेणैव ग्रहणात् ज्ञानातिरिक्तस्य ज्ञेयस्यास्तित्वे न प्रमाणमस्तीत्याशयेन योगाचारा नदीजलधारावदविच्छेदवर्त्तिनीं क्षणिकविज्ञानसन्ततिमेव पारमार्थिकीं मन्यन्ते। अपवादाभावे उत्सर्गप्रसिद्धिरिति न्यायेन सर्वं शून्यमिति न वक्तुं शक्यम्। तथा चोक्तं शून्यवादनिराकरणप्रकरणे भामत्यां श्रीवाचस्पतिमिश्रेण—'अपि चारोपितं निषिध्यते' इति। तथा तत्रैव 'क्षणिकत्वाच्च' इति २।२।३१ ब्रह्मसूत्रस्य भाष्ये श्रीशङ्कराचार्योऽप्येवमाह—"न ह्ययं सर्वप्रमाणसिद्धो लोकव्यवहारोऽन्यत् तत्त्वमनधिगम्य शक्यतेऽपह्नोतुमपवादाभाव उत्सर्गप्रसिद्धेः।"

सा च क्षणिकविज्ञानसन्ततिः प्रवृत्तिविज्ञानमनोविज्ञानालयविज्ञानभेदेन त्रिविधा। आलयविज्ञानमेव बौद्धदार्शनिकैरुक्तं साम्प्रतं मनोवैज्ञानिका अवचेतनमचेतनं वा मनः संगिरन्ते।

एतदतीव रोचकं यत् क्षणिकविज्ञानाद्वैतब्रह्माद्वैतवादिनावुभावप्यन्योन्यस्य तत्त्वज्ञानसामीप्यं स्वीकुरुतः। यथा तत्त्वसंग्रहे औपनिषदपरिकल्पितात्मपरीक्षायां शान्तरक्षितेनोक्तम्—'तेषामल्पापराधं तु, दर्शनं नित्यतोक्तितः' इति। माण्डूक्यकारिकायाः श्रीगौडपादाचार्यविरचिताया 'आगमशास्त्रम्' इति संज्ञान्तरेण विश्रुताया अन्तिमपद्यस्य 'नैतद् बुद्धेन भाषितम्' इत्यन्तिमपादस्य भाष्ये श्रीशङ्कराचार्य आह—'क्षणिकविज्ञानवादस्तत्त्वज्ञानसामीप्यमुक्तं बुद्धेन' इति।

क्षणिकविज्ञानवादिनो वदन्ति—'नित्यविज्ञानं नानुभवगोचरम्। किञ्च, नित्ये वस्तुनि प्रमाणाभावः, अर्थक्रियाकारित्वाभावे सत्त्वस्योपपत्तिविकलत्वात्' इति। तत्र ब्रह्मवादिनो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वदन्ति—'यथाऽनुभवेन विज्ञानस्यास्तित्वं स्वीक्रियते, तथाऽनुभवेनैव बाह्यार्थस्यापि वास्तविकत्वं कुतो न स्वीक्रियते ? ब्रह्माद्वैतवादिपक्षे ब्रह्म स्वयम्प्रकाशविज्ञानस्वरूपं सर्ववस्त्वात्मभूतं नित्यानित्यादिसकलवाग्व्यवहारातीतम् । क्षणिकविज्ञानवादिनां सम्मतं विज्ञानं क्षणिकत्वानेकत्वादिधर्मैर्विषयसारूप्यान्न स्वयम्प्रकाशं भवितुमर्हति । आत्मनो ज्ञानमयं स्वरूपमन्तःकरणे प्रतिफलितमन्तःकरणवृत्तिधर्मैः क्षणिकत्वानेकत्वादिभिरनुविद्धं भासते । यथा चन्द्रबिम्बं चलत्तरङ्गमाले विमलसलिले सरसि प्रतिफलितं कम्पमानमिव लक्ष्यते । बौद्धास्तु इन्द्रियानुभवगोचरमेवापातरमणीयं क्षणिकत्वानेकत्वादिधर्मसंसर्गेण गृहीतं विज्ञानं पारमार्थिकं मन्यन्ते । इन्द्रियानुभवैकप्रमाणकैर्बौद्धैः क्षणिकविज्ञानवज्ज्ञेयमप्यङ्गीकर्त्तव्यम् । विशुद्धविज्ञानस्वरूपस्य ब्रह्मणः प्रतिष्ठापनमन्तरेण न जगद्व्यवहारस्य मिथ्यात्वं साधयितुं शक्यम् । तच्च ब्रह्माद्वैतवादिनां विज्ञानं विषयिरूपमेव । अर्थात् तज्जानात्येव, न तु ज्ञायते । एतेनैव रूपेण ज्ञायत इति वक्तुं शक्यम् । यथा प्रतिबिम्बेन बिम्बस्वरूपं साक्षाददृश्यमानमपि ज्ञायते । तथा चोक्तं बृहदारण्यकोपनिषदि याज्ञवल्क्येन मैत्रेयीं प्रति—'विज्ञातारमरे केन विजानीयात्' इति ।

तथाविधं च विज्ञानस्वरूपं ब्रह्म सकलजगत्कारणभूतमपि निर्विकारम् । यतः पूर्णे वस्तुनि कयापि क्रियया न किमपि परिवर्तनं भवति । तथा चायं मन्त्रः—

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ इति ।

तद्धि ब्रह्म स्वसंकल्पाविर्भूतदेशकालापेक्षिणीं क्रियां कुर्वदपि वस्तुतो देशकालातीतत्वाद् निष्क्रियं निर्विकारं च तिष्ठति । तथाविधं सकलजगदात्मभूतं ब्रह्म स्वयम्प्रकाशत्वादप्रत्याख्येयम् । न ह्यात्मनः सत्तायां कश्चिदपि स्वयंसिद्धस्वानुभवातिरिक्तं प्रमाणान्तरमपेक्षते तदधीनप्रकाशत्वात् तत्सम्भूतत्वात् तत्संकल्पमात्रलब्धस्वरूपत्वाच्चान्येषां वस्तूनां तस्मिन्नेवान्तर्भावस्तदनन्यत्वं वा वक्तुं शक्यते ।

किञ्च, 'क्षणिकं विज्ञानम्' इति विज्ञानवादिभिर्बौद्धैरुच्यते । यदि विज्ञानमात्रम्, तर्हि 'क्षणिकम्' इत्यस्य विशेषणस्य किं प्रयोजनम् ? उत्पत्तिरेव क्षणः, उत्पन्नमात्रमेव कारणान्तरनिरपेक्षं नश्यतीत्यभिप्रायेण 'क्षणिकम्' इत्युच्यत इति चेत् , केयमुत्पत्तिः ? विज्ञानातिरिक्ता विज्ञानमेव वा ? आद्ये विज्ञानमात्रमिति सिद्धान्तहानिः । द्वितीये विशेषणवैयर्थ्यंतादवस्थ्यम् , क्षणिकमितिविशेषणेन विज्ञाने कस्यचिद् विशेषस्यानाधानात् । तेन विज्ञानमात्रवादिना विज्ञानस्य क्षणिकत्वं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विज्ञानग्राह्यकालास्तित्वापेक्षित्वाद् विज्ञानग्राह्योत्पत्तिविनाशकल्पनापेक्षित्वाद् वा नाभ्युपेयम्। अत एव च परमार्थदशायां विज्ञानस्य क्षणिकत्वाभ्युपगममूला विज्ञानसन्ततिरपि न यौक्तिकी।

क्षणिकविज्ञानस्य स्वयम्प्रकाशताऽपि न वक्तुं शक्या, क्षणिकत्वानेकत्वादिभिर्धर्मैस्तस्य विषयसारूप्यात्। ब्रह्माद्वैतवादिनां विज्ञानं नित्यमेकं सर्वात्मत्वात् सर्वदा विषयिरूपेणैवावस्थितम्, न तु कदाचिद् बौद्धिकज्ञानविषयतामापद्यमानम्। एतादृशं विज्ञानमेव विषयवैधर्म्यात् स्वयम्प्रकाशं भवितुमर्हति। तज्ज्ञानस्वरूपं ब्रह्म सर्वेषामात्मत्वाद् विषयिरूपमेव, न तु कदाचिद् ज्ञानस्य विषयतामापद्यते। इदं च श्रीशङ्कराचार्येण ब्रह्मसूत्रशाङ्करभाष्यस्य भूमिकायां प्रथममेवोक्तम्—"युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद् विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सत्यां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः" इति वदता।

तद् विज्ञानस्वरूपं च ब्रह्मात्यन्तिक्यां परमार्थदशायां सदसन्नित्यानित्यादिरूपेणानिर्वचनीयम्। एतच्च कठोपनिषदः—

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति॥

इति श्लोकस्य शाङ्करभाष्ये स्पष्टम्।

तस्य श्लोकस्यायमभिप्रायः—पूर्वं सकलविश्वात्मभूतं विज्ञानस्वरूपं ब्रह्म 'अस्ति' इति रूपेणैवोपलब्धव्यम्। 'अस्ति' इति रूपेण प्रथममुपलभ्यैव पश्चात् 'अस्ति' 'नास्ति' 'नित्यम्' 'अनित्यम्' इत्यादिभिर्विशेषणैरपरिच्छेद्यस्य मनोवागगोचरस्य ब्रह्मणो ज्ञानं भवतीति।

अपि च क्षणिकविज्ञानवादस्य निराकरण एषोऽपि हेतुर्द्रष्टव्यो यथा परमाणुवादः परमाणोरप्यवयवविभागसम्भावनया निराक्रियते, तथा क्षणिकविज्ञानवादस्यापि निराकरणं कर्तुं शक्यम्, क्षणस्यापि परमाणुवदवयवविभागसम्भावनाग्रस्तत्वादिति। 'उत्पत्तिरेव क्षणः, न तु कश्चित् कालावयवः क्षणोऽस्माकमभिमतः' इत्युक्त्यापि न समस्या समाधीयते, यतः कस्यचित् पदार्थस्योत्पत्तिरप्यवयवोत्पत्तिक्रियापूर्विका भवति। अथवा क्रियाया अपि कालक्रमानुरोधिन्या अवयवा भवन्त्येव। यथोक्तं वाक्यपदीये भर्तृहरिणा—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥ इति।

एवञ्च स कालः क्रियैव स्यात् स्वतन्त्रो वा पदार्थः, न तेनावयवविभागानवस्थादोषपरिहारो विज्ञानातिरिक्तपदार्थप्राप्त्यापत्तिदोषपरिहारो वा भवति। तेन क्रियाया अप्यवयव-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्रियाः, तासामवयवक्रियाणामप्यवयवक्रिया इति न क्वचिद् विश्रान्तिः। ततश्चान्ते क्रियायाः क्षणाद्यवयवविभागवतः कालस्य चापि कस्याश्चिदपास्तविशेषायां सर्वव्यापिकायां शक्तौ विलयनमवश्यमङ्गीकार्यम्। तेन देशकालवस्तुविशेषरहितं स्वयम्प्रकाशनित्यज्ञानस्वरूपं ब्रह्मैव पारमार्थिकं तत्त्वमवसीयते।

यदा परमाणुवादस्यासम्भवेन द्रवावस्थजलादीनां मूर्त्यवस्थाप्राप्तिवत् कुतश्चित् सर्वव्यापकशक्तेरपि सृष्टिर्भवितुमर्हतीति तर्कयितुमशक्नुवन्तो बौद्धदार्शनिकाः सृष्टेः प्रकारान्तरमपश्यन्तः शून्यवादमङ्गीकुर्वन्ति, तदा क्षणादीनां कालविभागानामुत्पत्तिविनाशयोश्चावयवक्रियापूर्वकलब्धस्वरूपयोः क्रिययोः कस्याश्चिदपास्तविशेषायां सर्वव्यापिकायां शक्तौ विलयनस्य विचारस्तेषां मनसि कुत उद्बुध्येत ? तेनेदं स्पष्टं यद् बौद्धदर्शनविकासकाले दर्शने सूक्ष्मेक्षिकाया अनतिविकसितत्वात् क्षणिकविज्ञानवादोज्जृम्भणं जातम्। पश्चाद् शङ्कराचार्येण तत्र दूषणं पश्यता सुगम्भीरप्रज्ञवेद्यो ब्रह्माद्वैतवाद आविरभावि।

तच्च विज्ञानस्वरूपमद्वितीयं ब्रह्म गुणतोऽपि सद्वितीयतां न सहते। 'सत्यं ज्ञानमनन्तं ब्रह्म' इति वाक्ये सत्यादिपदानि तद्विरुद्धधर्मव्यावर्तनपराणि, न तु तेषां पदानां कस्यचिदनुवर्त्तमानस्य धर्मस्य प्रदर्शने तात्पर्यम्। वस्तुतः 'सत्यं ज्ञानमनन्तं ब्रह्म' इति वाक्यं बाह्यविषयमिव ब्रह्मापि ज्ञानविषयं प्रतिपादयन् न ब्रह्मणो विशुद्धस्वरूपं प्रकाशयति। किन्त्विदं ब्रह्मस्वरूपोपलक्षणमात्रम्। ब्रह्मणो वास्तविकं स्वरूपं तु—

यस्यामतं तस्य मतम्, मतं यस्य न वेद सः।
अविज्ञातं विजानताम्, विज्ञातमविजानताम्॥

इति केनोपनिषदो मन्त्रे ब्रह्मणः सर्वेषामात्मभूतत्वात् सर्वदा विषयिरूपेणैवावस्थिते ज्ञानविषयतातीत्वमेवास्ति। तथा चोक्तं बृहदारण्यकोपनिषदि मैत्रेयीं प्रति याज्ञवल्क्येन—"विज्ञातारमरे केन विजानीयात् ?" इति।

कथमीदृशस्य ब्रह्माद्वैतवादरूपस्य सूक्ष्मदर्शनस्य समक्षे क्षणरूपकालबद्धमनोगोचरज्ञानमात्रस्य पारमार्थिकत्ववादिनां सिद्धान्तो विदुषां मनस्तोषं कर्तुं प्रभवति ? यद्यपि क्षणिकविज्ञानवादिभिः सह विज्ञानमात्रस्य पारमार्थिकत्वांशे ब्रह्माद्वैतवादिनामैकमत्यमस्ति, तथापि ब्रह्माद्वैतवादिनां विज्ञानं चित्तवृत्तिक्षणिकविज्ञानसन्ततेः साक्षिरूपं कूटस्थं स्वयम्प्रकाशम्। क्षणिकविज्ञानवादिनां चाभीष्टं विज्ञानं चित्तवृत्तिक्षणिकविज्ञानसन्ततिरूपमेवास्ति, न तु ततोऽन्यत् तत्साक्षिरूपं कूटस्थं विज्ञानमिति महदन्तरम्। एतादृशी क्षणिकविज्ञानवादिबौद्धस्वीकृता क्षणिक-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विज्ञानसन्ततिरुत्पत्तिविनाशानेकत्वादिधर्मैर्बाह्यवस्तुसदृश्येवास्ति, तस्मात् सा परतः प्रकाश्यैव भवितुमर्हति। तस्याश्च सन्ततेः प्रकाशकस्ततोऽन्यस्तत्साक्षिभूतः कूटस्थो विज्ञानस्वरूप आत्मैव भवितुमर्हति।

बुद्धेन सर्वेषां मनोगोचराणां वस्तूनामनित्यतां पश्यता तेष्वनात्मभावनया निर्वाणप्राप्तिरुपदिष्टा। निर्वाणस्थितिः स्वानुभवैकसंवेद्याऽव्याकृतेति चोक्तम्। किन्तु तस्य बुद्धस्य क्षणिकविज्ञानवादिनः शिष्या निर्वाणेऽपि विमलविज्ञानसन्ततिरूपेण परिणतां क्षणिकालयविज्ञानसन्ततिमेव स्थायिनीं मन्यन्ते। निर्वाणस्याव्याकृतत्ववादिनो बुद्धस्य तैः कथमनुसरणं क्रियत इति चिन्त्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बौद्धनये नैरात्म्यसिद्धान्तः

(बुद्धमहायानान्तर्गतमाध्यमिकप्रस्थानानुसारतो नागार्जुनमतेन)

श्रीकरुणेशशुक्लः, गोरखपुरविश्वविद्यालये संस्कृतविभागस्थः ।

(क) बौद्धनैरात्म्यवादस्य मूलं स्वरूपम्

प्रायेणायमर्वाचीनानां बौद्धतत्त्वगवेषणातत्पराणां प्रत्नतत्त्वविदां स्वीकृतः सिद्धान्तो यद् भगवता बुद्धेनोपनिषदां प्राणभूत आत्मसिद्धान्तो निषिद्धः। ईश्वरविचारोऽपि तेन प्रत्यषेधि[1] । स्वयं चोपनिषदामात्मवादं प्रतिषिध्याऽनात्मपरम्परां प्रावर्तिष्ट। [2]परन्तु नैष तेषामभ्युपगमो युक्तिसहस्तथ्यपरश्च । करुणाप्लावितमानसैर्भगवद्बुद्धैस्तथागतैर्लोकशास्तृभिस्तु केवलं कर्मकाण्डेषु वर्णितानां श्रौतकर्मणां हिंसापरत्वात् फलानित्यत्वदर्शनात्, मानवानां शीलसमुदाचारे निर्वाणाधिगमे चाप्रासङ्गिकत्वात्, श्रुतिभिश्चापि भूयो भूय आत्मस्वरूपस्थित्यपरपर्यायमोक्षाधिगमे प्रकृतत्वेन गर्हितत्वाच्च[3] तेषां परिग्रहो न कृतः। [4]तत्रोपलभ्यमानलोकातिगोचरसत्त्वसाक्षात्कारोपदेशोऽपि तैर्भृशं निरासि। [5]अन्यथा तु तैः शीलाद्युदात्तगुणको मानसो यज्ञ आहृतः स्वीकृतो देशितश्च। [6]उपनिषदां निर्विकल्पतत्त्वोपदेशेन च बुद्धमतं मूलतः प्रभावितम्। वस्तुतस्त्विदं तत

---

१. यथा श्चेरबात्स्कीमहोदयः, बुद्धिस्ट् लाजिक्, १।४-७, विनिफ्रेड् स्टीफेन्स्, डा० आनन्दकुमारस्वामिना धृतः, 'हिन्दुइज्म एण्ड बुद्धिज्म'-ग्रन्थे (४८ पृ०), तथा 'कल्चरल हेरिटेज आव इण्डिया'-ग्रन्थे म० म० पण्डितविधुशेखरभट्टाचार्य्यैः, ३।२५९, तथा स्वरचिते 'बेसिक कैम्सेप्शन् आव बुद्धिज्म' आख्ये ग्रन्थे, पृ० ७०, ९५; श्चेरबात्स्कीमहोदयः स्वकीये निबन्धे 'द सोल थियरी आव बुद्धिस्ट्स्' एवमेव मतं भृशं व्यनक्ति।

२. द्र० ति० रा० वे० मूर्ति, द सेन्ट्रल फिलासफी आव बुद्धिज्म, आदिमं प्रकरणद्वयम्।

३. द्र० मुण्डकोपनिषदि १।२।९—१०, १२, तु० २।२।८, ईशावास्योपनिषद्—न कर्मणा प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः।

४. द्र० तेविज्जसुत्तं (दीघ० १); धम्मपदं १४२; सामञ्ञफलसुत्तं; राहुलोवादसुत्तं।

५. तेविज्जसुत्ते।

६. कूटदन्तसुत्ते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एव निःसृतम् । [1]मध्यममार्गाऽऽर्यसत्याष्टाङ्गमार्ग-शील-समाधि-प्रज्ञाक्षणभङ्गवाद-कर्मसिद्धान्तास्तूपनिषत्सूपलभ्यमानाः सिद्धान्ता एव प्रकारान्तरेण निर्दिष्टा इति नात्र काचिद् विमतिरुचिता । नात्रायं प्रस्तुतो विषयः । [2]अत्र त्विदमेव मीमांस्यं यद् बुद्धैर्न काचिदनात्माभिधा नूतना परम्परा प्रवर्तिता प्रचालिता वा । उपनिषदात्मवाद एव भङ्ग्यन्तरेण निरूप्यमाणोऽनात्माख्यां लभते । तत्र सर्वं मायासंवलितब्रह्मणो लूतातन्तुवदग्निविस्फुलिङ्गवच्च निःसृतं नामरूपात्मकं जगद् ब्रह्ममयमिति मन्यते, कारणात्मकत्वात् कार्यस्य, यथा मृण्मयः शराव इति । नित्यं निर्गुणं निर्विकारं ब्रह्म अविद्याशबलं जगत्कारणत्वेन कल्प्यते । तदेव च सत्यं ज्ञानमित्याद्यपि वर्ण्यते । तदन्यत् सर्वमनित्यं विनाशि च । 'तत् सत्यं स आत्मा' 'अतोऽन्यदार्तम्' 'आत्मन आकाशः' 'यतो वा इमानि' इत्यादिश्रुतयोऽत्र प्रमाणम् । बौद्धमते तु सर्वं संस्कृतं विपरिणामधर्मि, मृषामोषधर्माऽनित्यं परिवर्ति, प्रतीत्यसमुत्पन्नत्वात् सापेक्षमत एव निःस्वभावमनुत्पन्नमनात्मं च, निःसत्त्वात् ।

अनेनेदं व्यक्तं प्रतिभाति—श्रौतसिद्धान्ते एक एवात्मा नित्योऽतोऽन्यदनित्यं सर्वम्, बौद्धमते तु दृश्यं सर्वमनित्यम् इति । बुद्धेनाऽऽत्मतत्त्वस्य प्रतिषेधो न कृतः, अपि तु तस्यानिर्वचनीयत्वे प्रत्यात्मवेद्यत्वे वा तस्य तात्पर्यमासीत् । अव्याकृतेषु परिगणितत्वादात्मप्रश्नस्य आत्मनोऽनिर्वाच्यत्वमेवोपपादितं तेन नाभावः । [3]जीव (आत्म) शरीरयोरेकान्यत्वप्रतिपादने शास्तुर्मौनालम्बनमात्मनोऽनिर्वचनीयस्वरूपद्योतनपरमेवेति निर्गलितोऽर्थः । वस्तुतस्तु शास्ता ब्रह्मात्मप्रभृतिपारमार्थिकसत्यस्वरूपान्वेषणपरो नाभूत्, अस्य तत्त्वस्वरूपान्वेषणस्य शीलनिर्वाण-

---

१. द्र० शङ्करनागार्जुनयोस्तुलनात्मकमध्ययनम् (हिन्दीभाषायाम्, अप्रकाशितोऽस्मदीयः शोधप्रबन्धः), सप्तमोऽध्यायः; गुरुसेवक उपाध्यायः, हिन्दुइज्म एण्ड बुद्धिज्म; कुमारस्वामी, हिन्दुइज्म एण्ड बुद्धिज्म; लक्ष्मणशास्त्री जोशी, वैदिकसंस्कृतेर्विकासः (हिन्द्याम्), पृ० १९७; हरदयाल, बोधिसत्त्व डाक्ट्रिन, पृ० ३१—३२; श्चेरवात्स्की, अभिसमयालङ्कारशास्त्रस्य भूमिकायां पृ० १०; कर्नः, मैनुअल आव इण्डियन् बुद्धिज्म, पृ० १२२; राधाकृष्णन्, इण्डियन फिलॉसफी, १।४७१, ६३५; मत्तविलासप्रहसनम्, पृ० ५५; भगवदज्जुकीयम्, पृ० ५०–५१; अस्माभिः षड्विंशतितमेऽन्ताराष्ट्रिये प्राच्यविद्यासम्मेलने पठितो लेखः Ātman in Buddhist Philosophy : View Point of the Buddha.

२. इदमस्माभिः पूर्वोद्धृते लेखे भृशं प्रतिपादितम्, द्र० Summaries of Papers, No. 6. 214.

३. द्र० तत्त्वभारती, ज्ञानपटले, १।१०; डा० नाथमल टाटिया [नवनालन्दामहाविहाररिसर्चपब्लिकेशन् (वा० २) आख्ये ग्रन्थे], अव्याकृताभिधानो लेखः, अन्तिमो भागः ।

३

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मार्गापेतत्वात् । [1]तदुक्तं चूलमालु(ङ्)क्यसूत्रे तथागतैः (मज्झिम०, १/११३)—'कस्मा चेतं मालुक्यपुत्त, मया अव्याकतं ? न, हेतं, मालुक्यपुत्त, अत्थसंहितं न आदि ब्रह्मचरियकं न निब्बिदाय न विरागाय न निरोधाय न उपसमाय न अभिञ्ञाय न सम्बोधाय न निब्बानाय संवत्तति । तस्मा तं मया अव्याकतं ।' तथैव शिंशपावनसूत्रेऽप्युदघोषि—'भिक्खवे, एतदेव बहुतरं यं वो मया अनक्खातं । कस्मा चेतं, भिक्खवे, मया अनक्खातं ? न हेतं, भिक्खवे, अत्थसंहितं नादि ब्रह्मचरियकं—न निब्बानाय संवत्तति, तस्मा तं मया अनक्खातं ।' (संयुत्तनिकाय, ४।३७५) । यदा चाऽऽत्मनः (जीवस्य) शरीरेन्द्रियैः पञ्चस्कन्धैर्वा एकत्वं भिन्नत्वं वा निर्णेतव्यमासीत्, स उक्तवान्—"तत् किं मञ्ञथ, भिक्खवे, रूपं निच्चं वा अनिच्चं वा ति ? अनिच्चं भन्ते । यं पनानिच्चं दुक्खं वा तं सुखं वा ति ? दुक्खं भन्ते । यं पनानिच्चं दुक्खं विपरिणामधम्मं, कल्लं नु तं समनुपस्सितुं"—एतं मम, एसोहमस्मि, एसो मे अत्ता' ति ? नो हेतं भन्ते ।" (संयुत्त० २।१०६, १०७, ४०६, ४३१, ४३५, ३१४, ३१६, ३२० इत्यादौ) इति, 'इध भिक्खवे, सुतवा अरियसावको रूपं...नेतं मम, नेसोहमस्मि न मेसो अत्ता' ति समनुपस्सति' (संयुत्त २।२५६) इति च । पञ्चस्कन्धकेन पुद्गलेन च व्यवहार आत्मेत्युपचर्यते । [2]इति हि बुद्धानुशासनतात्पर्यम्, नास्य परमार्थेन सत्यता । अत इदमेव लक्ष्यते यदस्मात् स्कन्धजातादिन्द्रियग्रामात् परः कश्चित् प्रत्यात्मवेद्योऽनिर्वचनीयस्वरूपोऽतर्कावचरो दुर्दर्शो दुरनुबोधो गम्भीरः पण्डितजनवेदनीय आत्मेति । अत उक्तं तथागतैः—'आत्मदीपा भवत आत्मशरणाः, नान्यदीपा नान्यशरणाः[3] आत्मानं गवेषयध्वम्' इति[4] आत्मा हि आत्मनो नाथः, को हि नाथः परः स्यात्,'[5] 'ब्रह्मभूतेनात्मना' इति च । निर्वाणकाले च स्वयमेवावोचच्छास्ता—

परिपक्को वयो मय्हं परित्तं मम जीवितं ।
पहाय वो गमिस्सामि कतं मे सरणमत्तनो ॥ (दीघ० २।६४)

---

१. द्र० पोट्ठपादसुत्ते, (दीघ० १), पृ० १ ५७; मज्झिम० १।११३ (चूलमालुङ्क्यसुत्ते) सिंसपावन सुत्ते (संयुत्त० ४।३७५); अस्माकं शङ्करनागार्जुनयोरध्ययनं, प्रथमोऽध्यायः; जोशी, पूर्वोद्धृतः ।

२. द्र० मिलिन्दप्रश्ने, द्वितीये प्रकरणे; तु० अभिधर्मकोशः, ३।१८—

आत्मा नास्ति स्कन्धमात्रन्तु कर्मक्लेशाभिसंस्कृतम् ।
अन्तराभवसन्तत्या कुक्षिमेति प्रदीपवत् ॥

३. महापरिनिब्बानसुत्ते, (दीघ० २); अत्तदीपसुत्ते (संयुत्त० २); दीघ० ३।६१.

४. विनयपिटके, महावग्गे, पृ० २५; तु० सं० नि० (रो०), ३।४२, ५।१५४, १६३, दीघ ३।६१

५. धम्मपदे, गा० १६०.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रेदमवधेयम्—बुद्धस्याहम्भावविनिवर्तन आत्मदृष्टिपरिवर्जन एवायासो लक्ष्यते, नात्मास्तित्वप्रतिषेधे[१]। अनात्मनि देहस्कन्धादिक आत्मभावप्रतिपत्तिरेवाविद्यामोहाऽऽस्रवादिहेतुका आत्मदृष्ट्याऽऽत्मभाव-सत्कायदृष्टिशब्दैरभिहिता बुद्धोक्तिषु[२] यस्या निरास एव बुद्धस्याद्वयमध्यममार्गस्याभीष्ट आसीत्। तथा चोक्तं सुत्तनिपाते बौद्धागमे—

अनत्तनि अत्तमानि च पस्स लोकं सदेवकं।
निविट्ठं नामरूपस्मिं इदं सच्चं ति मञ्ञति।
तं हि तस्स मुसा होति मोसधम्मम्हि इत्तरं।
अमोसधम्मं निब्बानं तदरिया सच्चतो विदू।
ते वे सच्चाभिसमया निच्छाता परिनिब्बुता[३]।

एवमनात्मन्यात्मदृष्टिसङ्गोऽविद्याहेतुकस्तस्य निवर्तनमेव बुद्धस्याऽनात्मदेशनाभिप्रायः। तदुक्तं भदन्तचन्द्रकीर्तिना—

सत्कायदृष्टिप्रभवानशेषान् क्लेशांश्च दोषांश्च धिया विपश्यन्।
आत्मानमस्या विषयं च बुद्ध्वा योगी करोत्यात्मनिषेधमेव॥

(मध्यमकावतारः—६।१२०)

(ख) महायाने नैरात्म्यसिद्धान्तः

माहायानिकेष्वागमेषु सूत्रेषु चास्य सिद्धान्तस्य विपुलं व्याख्यानमुपलभ्यते। तथा च द्विविधं नैरात्म्यम्—पुद्गलनैरात्म्यं धर्मनैरात्म्यं च। पुद्गलनैरात्म्यं सत्कायदृष्टिनिवर्तनस्यैवापरः पर्यायः। संवृतिसत्पुद्गलः पञ्चस्कन्धात्मकोऽभिधर्मादिप्रस्थानेषु विपुलं प्रपञ्चितः[४]। साम्मितीयैश्च

---

१. तु० महाभारते, शान्तिपर्वणि, १९९।२३—

अमृताच्चामृतं प्राप्तः शान्तीभूतो निरात्मवान्।
ब्रह्मभूतः स निर्द्वन्द्वः सुखी शान्तो निरामयः॥

२. द्र० धम्मसङ्गणि, पृ० २३२, २३३, २७६-७८; दीघ० ३/१८०; भारहारसुत्ते (संयुत्त०); द्र० अस्माकमपरो लेखः Upanisadic Ātman and the Conception of Attā in the Teachings of Buddha. पूना ओरिण्टलिस्ट, २७।३-४, पृ० ११८-१२२ (अंशतः प्रकाशितः); खुद्दक, १।३८६, गा० ३६०।

३. सुत्तनिपातपालि, खुद्दक, १।३८६।

४. सभाष्याभिधर्मकोशः, ३।१८; सवृत्तिरभिधर्मदीपः, २९७; अभिधर्मसमुच्चयः, पृ० ४०; अभिधम्ममूलटीका, पृ० १३१; अभिधर्मदीपः, पृ० १७२ (का० ३०६)—स्फुटार्था, ३।८, पृ० ५८७, एते ग्रन्था अपरे चात्रानुसन्धेयाः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्कन्धैरेकान्यत्वभिन्नस्य पुद्गलस्यास्तिताङ्गीकृता[१]। वस्तुतस्तु तथागतस्य मध्यममार्गदेशनानुसारेण न किञ्चिदपि अस्ति-नास्तित्वमुखेन वर्णयितुं शक्यते, अस्तित्वनास्तित्वयोरन्ताभिनिवेशहेतुत्वात्[२]। तदुक्तमाचार्यपादैः —

अस्तीति शाश्वतग्राहो नास्तीत्युच्छेददर्शनम्।
तस्मादस्तित्वनास्तित्वे नाश्रीयेत विचक्षणः[3]॥

(मा० का० । ५।८)

अनेन चात्मनोऽस्तीत्वं तथागतैर्दृष्ट्यभिनिवेशत्यागवशादेव विस्पष्टं न देशितम्, तस्य नास्तित्वमपि तत एव न देशितम्। संवृतिसत्पुद्गलस्य व्यवहारनिर्वहणार्थमस्तित्वममात्वनिषेधे प्रतिषेधेत्। अन्यथा तु (तदस्तित्वस्वीकारदेशनायां) शाश्वतवादप्रसङ्ग आपतेत्। तस्मादेव तथागतैर्न आत्मस्वरूपं विस्पष्टमुपदिष्टम्, न वा व्यक्तमेव प्रतिषिद्धम्। अत एव मिलिन्दप्रश्नादिग्रन्थेष्वपि द्रव्यसत्पञ्चस्कन्धात्मकाजीवात् पुद्गलाभिधादन्यस्य कस्यचिदात्मनोऽस्तित्वं न देशितम्। तथा च तत्र निर्दिष्टम्—एषु देहाङ्गेषु न पृथगात्मोपलभ्यते, अङ्गसम्भारस्यैवेयं प्रथिता संज्ञा पुद्गलाभिधा[४]। तदुक्तं कुमारलातेनापि[६]—

दृष्टिद्रंष्ट्रावभेदं चापेक्ष्य भ्रंशं च कर्मणाम्।
देशयन्ति बुद्धा धर्मं व्याघ्रीपोतापहारवत्॥

---

१. द्र० इन्साइक्लोपीडिया आव रेलिजन् एण्ड एथिक्स, एकादशे भागे 'साम्मितीय'–विषयको लेखः, पृ० १६८-६९; नलिनाक्षदत्तः—Early History of the Spread of Buddhism and the Buddhist Schools; the three Principal Schools of Early Buddhism; कथावत्थुप्रकरणम्, प्रथमः परिच्छेदः (पुग्गलकथा), रायस् डेविडस्, Points of Controversy. Introduction, P. 1Sq; द्र० 1HQ, XV,P.90-100;
नागार्जुनस्य माध्यमिककारिकायां (१८) पूर्वपक्षरूपेणोपन्यस्तं मतं साम्मितीयानामेवेति नात्र कश्चिद् विवादः (आत्मपरीक्षा, मा० का० १८।१-३, प्रसन्नपदावृत्तिश्च (पूर्वपक्षः) ।

२. तु० समाधिराजसूत्रम्, ९।२६-२८, द्र० सं० नि० २।१७, विनय०, महावग्ग, पृ० १३।

३. तु० मा० का० ५।८।

४. द्र० सं० नि० (रो०) ३।४६, स्फुटार्था, पृ० ५८७, अभिधर्मदीपवृत्ति, पृ० २७२।

५. द्र० मिलिन्दपञ्हो (बम्बई सं० १९४०), २ (प्रारम्भ)।

६. बौद्धधर्मदर्शनम् (हिन्दीभाषायामुपनिबद्धम्, आचार्यनरेन्द्रदेवरचितम्, पटना, १९५७), पृ० २४५ पृष्ठे (उद्धृतम्)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्मादेव नैरात्म्यपरिपृच्छायां विस्पष्टमाख्यातम्—'अस्त्यामुष्मन्तः, काये भूतात्मेति नास्तीति वेत्युभयमपीह न वक्तव्यम्। अस्ति भूतात्मेत्युक्तौ नास्तीत्युक्तिर्विरुद्धोच्यते। यद्यस्ति, कथं—सर्वत्र परीक्षायामपि नात्मा दृश्यते ? नास्तीति वचनेऽस्तीति वचनं विरुद्धमुक्तम् (म०सू०सं० १।१७४, नै० परि० पृ० १-६)। तस्मादात्मनोऽस्तित्वमस्तीत्यसिद्धम्। जीवः पुरुषः पुद्गलः कारक इति सर्वमिदं संवृतिसद् न पारमार्थिकम् (म०सू०सं० १।१७५)। जीवादिरूपेषु सत्कायदृष्टिरेवानर्थ-निर्वर्तनी। तस्मात् सा प्रतिषेद्धव्या। परन्तु नास्येदं तात्पर्यं यत् परमार्थत आत्मास्तित्वमपि नास्तीति। पारमार्थिकं प्रत्यात्मवेद्यं धर्मतारूपं बुद्धस्वभावं महायाने आत्मतत्त्वं परिगृह्यते। तदुक्तं भगवत्यां प्रज्ञापारमितायाम्—'यो हि अद्वयमात्मानं प्रजानाति स बुद्धं धर्मं च प्रजानाति। तत् कस्य हेतोः ? आत्मभावं स भावयति सर्वधर्माणाम्, येन अद्वयपरिज्ञया सर्वधर्माः परिज्ञाताः। आत्मस्वभावनियता हि सर्वधर्माः। यो हि अद्वयधर्मं प्रजानाति स बुद्धधर्मान् प्रजानीते। अद्वयधर्मपरिज्ञया सर्वत्रैधातुकपरिज्ञा। आत्मपरिज्ञेति सुविक्रान्तविक्रामिन् पारमेतत् सर्वधर्माणाम्।......न ह्यत्र। आगमनं गमनं वा प्रज्ञायत इति' (सार्द्धद्विसाहस्रिका प्र० पा०, म० सू० सं०, १।११)। इदमात्मतत्त्वस्वरूपं प्रज्ञापारमिताऽसङ्गता-शुद्धता-लक्षणाऽनभिलापादिमुखेन पारमार्थिकत्वेन धर्मकायनिर्देशेन महायानसूत्रेषूपलक्षितं वर्तते। शमथविपश्यना-बोधि-प्राप्तिप्रभृतिमार्गदेशनाभिरभूतपरिकल्प-धर्मधातुप्रभृतिभिः शून्यतया च सर्वकोटि-विनिर्मुक्ततत्त्वस्वरूपबोधन्या अस्य विशदमुपव्याख्यानमुपलभ्यते। वस्तुतस्तु तथागतेनाधिकारि-भेदाद् देशनाभेदेन तत्त्वानि देशितानि[१]। क्वचित् तु तेषां ग्राह्यतया सर्वैर्बहुलः प्रपञ्चः कृतः, क्वचिच्चातिसूक्ष्मत्वात् सर्वैरनभिज्ञेयत्वाच्च धर्माणां सङ्केतरूपेणैव निर्देशः कृतः, यथात्मविषये। तस्मान्महायाने अहं-मम-आत्माऽऽत्मीयभाव-सत्कायदृष्टिनिवर्तनार्थं पुद्गलजीवादीनां पारमार्थिकतानिरासाय च पुद्गलनैरात्म्यसिद्धान्तो देशितः। आत्मतत्त्वस्य तु पारमार्थिकं स्वरूपं निरणायि महायानवादिभिः। तत् तु विगतदृष्टिकं निर्विकल्पम्, स्वभावपरिच्युतम्, नित्यम्, दृष्टिभिरसमन्वागतम्, विधूतसर्वकोटिकं धर्मतास्वरूपम्, प्रत्यात्मवेद्यमनिर्वचनीयमतर्कावचरम्, शिवम्, शान्तमव्यपदेश्यं वागतीतम्, भावाभावादिसकलविकल्पानास्पदम्, समरसम्, निर्विभावस्व-

---

१. अं० नि० (रो) '५।२३१ (किमुरामहोदयेनोद्धृतः, Journal of the Department of Letters, XII. 57; अमितायुर्ध्यानसूत्रम्, तत्रैवोद्धृतम्, पृ० ५९-५८; एडकिन्स्, चाइनीज बुद्धिज्म, पृ० २०, २५, २७-२८, सद्धर्मपुण्डरीकसूत्रम्, २।८, ९,११, २१, (रोमन-संस्करणम्) पृ० ३१, ३७, ४२, (गा० ४७), पृ० ४३ (गा० ५४)। अस्योपरि द्रष्टव्या गाथाः—६७, ६९, ७४, १०५, १२५, ५।६१ इत्यादयः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भावम्, निष्प्रपञ्चं चात्मतत्त्वमस्ति। एतदेव प्रकारान्तेण निरूप्यमाणं धर्मकायशब्देन, बोधिपदेन चाप्यभिव्यज्यते[१]। एतदेव भगवत्यां सप्तशतिकायाम् 'अनुत्पादस्यैतन्मञ्जुश्रीरधिवचनं यदुतात्मेति। एवमेतद्भदन्त शारद्वतीपुत्र यस्यैतदधिवचनमात्मेति, तस्यैतदधिवचनं बुद्ध इति।...तथागतं भदन्त शारद्वतीपुत्र पर्येषितुकामेन आत्मा पर्येषितव्यः। आत्मेति... बुद्धस्यैतदधिवचनम्। यथा आत्मा अत्यन्ततया[२] न संविद्यते, नोपलभ्यते, तथा [३]बुद्धोऽप्यत्यन्ततया न संविद्यते, नोपलभ्यते। यथा आत्मा न केनचिद् धर्मेण वचनीयः, तथा बुद्धोऽपि न केनचिद् धर्मेण वचनीयः। यत्र न काचित् संख्या स उच्यते बुद्ध इति। न चैतद् भदन्त शारद्वतीपुत्र, सुकरमाज्ञातुमात्मेति यदधिवचनम्, एवमेतद् भदन्त शारद्वतीपुत्र न सुकरमाज्ञातुं बुद्ध इति यदधिवचनम्।' इत्युक्तम् (म० सू० सं० १।३४७)। एतदेव च सन्धाय लङ्कावतारभारहारादिसूत्रेष्वप्यात्मास्तित्वं स्वीकृतम्[४], तदेव चोपन्यस्तं महायानसूत्रालङ्कारादिशास्त्रेषु[५]। इदमेव हि महायानमते पुद्गलनैरात्म्यम्।

---

१. धर्मकायस्वरूपवर्णनाय द्रष्टव्यम्—शङ्करनागार्जुनयोरध्ययनम्, पृ० ५१-५३; द्र० त्रिकायस्तवः (बौद्धधर्मदर्शनम्), पृ० ११६; म० सू० अ० ९।७७; शान्तिभिक्षुः, महायान, पृ० ७४; अभिसमयालङ्कारः, ८।१; म० सू० अ०, ८।६०, ६२; निरौपम्यस्तवः, २२; त्रिंशिका ३०; तु० मा० वृ०, पृ० ४४८; तु० वज्रच्छेदिका, (एन्सीडोटा ऑक्सॉनिया), पृ० ४३; मा० का० २४।१५, १६; निरौपम्यस्तवः, १६; शलिस्तम्बसूत्रम् (अड्यार सं०), पृ० १; बोधि० पं०, पृ० २८६ (बाइ० इं० सं०); स्फुटार्था, (बाइ०बु०) ३।४८; मध्यमकावतारटीका, पृ० ६२-६३; (बौद्धधर्मदर्शनम्, पृ० १२०); सुजुकी, Outlines of Mahāyāna Buddhism, p. ७३-७५, २१७-४१; अत्र तथागतगर्भालयविज्ञानयोर्विचारणमपि सन्तुलनामारोहति।

२. पञ्चस्कन्धादिरूपेणोपलभ्यमानः पुद्गलत्वेन परिकल्प्यमानः, कर्तृत्वादिरूपेण च वर्ण्यमानः संवृतिसज्जीवपदाभिधेय आत्मेति भावः।

३. नैर्माणिको भौतिको बुद्ध इति तात्पर्यम्।

४. लङ्कावतारः, सोगेनमहोदयेन Systems of Buddhist Thought ग्रन्थे, २७ पृष्ठे (टि० १) उद्धृतः; द्र० शङ्करनागार्जुनयोरध्ययनम, पृ० ७२, टि० २४७; भारहारसूत्रेऽप्युक्तम्=भारं वो भिक्षवो देशयिष्यामि भारहारं च, भारः पञ्चस्कन्धाः, भारहारश्च पुद्गल इति। यश्चात्मा नास्तीति स मिथ्या दृष्टिको भवतीति। न्यायवार्त्तिके (३।१।१, पृ० काशी सं० सि० १९१६) उद्धृतम्, सूत्रमिदमुद्धृतं महायानसूत्रालङ्कारशास्त्रेऽपि (१८।९२-१०३,) भारभारादाने संक्लेशपदवाच्ये, भारनिस्सरणं च व्यवदानपदाभिवर्णितम्, द्र० बौद्धधर्मदर्शनम्, विज्ञानवादप्रकरणम्; तु० संयुत्तनिकाये निचितं भारहारसुत्तं।

५. म० सू० अ०, ९।२३,—

शून्यतायां विशुद्धायां नैरात्म्यान्मार्गलाभतः।
बुद्धाः शुद्धात्मलाभित्वाद् गता आत्ममहात्मताम्।

द्र० वृत्तिरपि, तथा द्र० १५।२४ श्लोकस्यापि वृत्तिः, तु० १४।३७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धर्मनैरात्म्यं तावद् धर्माणां निःस्वभावत्वपरमेवेति बौद्धसमयः। सर्वे धर्माः प्रतीत्यसमुत्पन्नास्तस्मात् सापेक्षाः, सापेक्षत्वान्निःस्वभावाः, निःस्वभावत्वात् शून्याः, शून्यत्वात् सापेक्षतयोत्पन्नत्वाच्च स्वभावतोऽनुत्पन्नाः[1]। तदुक्तमाचार्यपादैरपि[2]—

हेतुतः सम्भवो यस्य स्थितिर्न प्रत्ययैर्विना।
विगमः प्रत्ययाभावात् सोऽस्तीत्यवगतः कथम्॥ (युक्तिषष्टिका)
हेतुतः संभवो येषां तदभावान्न सन्ति ते।
कथं नाम न ते स्पष्टं प्रतिबिम्बसमा मताः॥ (लोकातीत०, ४)

इत्येवमिदं धर्मनैरात्म्यं स्वकीयस्वभावराहित्यं सर्वधर्माणामनुत्पादं च तेषां सुकरमभिनक्ति। तथा चोक्तमनवतातह्रदापसङ्क्रामणसूत्रेऽपि—'यः प्रत्ययैर्जायति स ह्य जातो न तस्य उत्पादु सभावतोस्ति। यः प्रत्ययोत्पन्न स शून्य उक्तो यः शून्यतां जानति सोऽप्रमत्तः' (म०सू०सं० १।११६, बोधि० पं०, पृ० १७२, मा० वृ० पृ० ५०४)।

तस्मान्महायानेऽहङ्कार-ममकार-आत्माऽऽत्मीयदृष्टि-सत्कायदृष्टि-निवर्तनपरमेव पुद्गल-नैरात्म्यं धर्माणामनुत्पादनिःस्वभावशून्यताव्याख्यानपरमेव धर्मनैरात्म्यमुपवर्ण्यते, न पुनर्यथाऽर्वाचीनाचार्यैरनुवारं कल्प्यते यदात्मास्तित्वं प्रतिषिद्धमिति।

(ग) नागार्जुनकृतं नैरात्म्यव्याख्यानम्

नागार्जुनेन बुद्धदेशना महायानानुसारेण तात्त्विकत्वेन व्याख्याता। निष्कृष्टं स्वरूपं चास्य दर्शनस्य—विनेयजन-सत्त्वानुशयबुद्धिभेदवशात्तथागतेन संवृतिपरमार्थरूपेण द्विधा तत्त्वदेशना कृतेति। तथा हि—

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः॥

---

१. द्र० ललितविस्तरः, पृ० २६ (ता० ५), १२६-२८, १४७, १२५-१३० (१३।९५-१३०); आर्य-सत्यद्वयावतारसूत्रम्, (मा० वृ०, पृ० ३७४-३७५); लङ्कावतारः, ३।४९-५०, पृ० १४८, १६८, पृ० ९, सगाथकम्, १-५ तथान्यत्रापि; (सद्धर्मपुण्डरीकम्, (रो), पृ० १२७; समाधिराज—१५।१५, ११।११, १३, २२, १०।७१, ९।३७, ४७; पृ० ४५-४७; तु० मा० का० २४।१९, ७।१६, १५।१०-११, २४।१८।

२. बोधि० पं० (वा० इं०) पृ० ५००।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

येऽनयोर्न विजानन्ति विभागं सत्ययोर्द्वयोः ।
तत्त्वं न च ते जानन्ति गम्भीरं बुद्धशासने ॥
(मा० का० २४।८-९) ।

व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ इति ।
(मा०का०,२४।१०)

तदुक्तं बोधिचित्तविवरणेऽपि—

देशना लोकनाथानां सत्त्वाशयवशानुगाः ।
भिद्यन्ते बहुधा लोक उपायैर्बहुभिः पुनः ॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा ।
भिन्नाऽपि देशनाभिन्ना शून्यताऽद्वयलक्षणा ॥ इति ।
(स० द० सं० २, भामती २।२।१८)

तत्र संवृत्तिर्व्यावहारिकस्य प्रतीत्यसमुत्पन्नधर्मजातस्य बुद्धिगम्यस्य समग्रस्य व्यवहारस्य च नामान्तरम् । एतदेव नेयार्थाभिप्रायिकी चापि देशनेति भण्यते । जीव-पुद्गलस्कन्धादीनामस्तित्वशालिता तु सांवृतिक्येवेति नात्र विप्रतिपत्तिः । परमार्थसत्यन्तु बुद्धेरगम्यम्, निर्विकल्पम्, मनोवागगोचरम्, विगतसर्वविकल्पदृष्टिकम्, प्रत्यात्मवेद्यम्, शान्तं शिवं निष्प्रपञ्च निरालम्बनमात्मात्मीयादिसकलाभिलापवर्जितं निरस्तसकललोकविकल्पविषयं शून्यतादिनिर्विकल्पकतानुबोधकानिरोधादिदृष्टिनिवर्तकपदैश्च भूयो भूयो बौद्धशास्त्रेषु व्यञ्जितं वर्णितं[1] च । 'आत्मात्मीययोर्विप्रयोगस्तत्त्वस्य लक्षणम्' इति हि तत्त्वस्वरूपं निर्दिशन्ति स्माचार्याः (अकु० पृ० १३८) । तत्त्वलक्षणं तु—

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् ।
निर्विकल्पमनानार्थमेतत् तत्त्वस्य लक्षणम् ॥इति ।
(मा०का० १८।९)

अनेकार्थमनानार्थमनुच्छेदमशाश्वतम् ।
एतल्लोकस्य नाथानां बुद्धानां शासनामृतम् ॥ इति च ।
(१८।११)

तत्त्वदर्शनान्वेषणतत्परेणाचार्येण निरपेक्षदर्शनभित्तौ महत्त्वपूर्णः शून्यतासिद्धान्त उद्भावितः । बुद्धानां मध्यमा प्रतिपत्तु शाश्वतोच्छेदान्तद्वयपरिहाररूपेण प्रतिपादिता वर्तते ।

१. द्र० मा०का० तथा वृत्ति, १८।६, २४।९।१०, मा०वृ०, पृ० २६४, मङ्गलश्लोक०, १-२, १८।७, ८, ११, १३।८, २५।२४, १८।५, १३।८, २७।३०, २४।८; महायानविंशकः (भट्टाचार्येण संस्कृतः), १; महाप्रज्ञापारमिताशास्त्रम् (चीनभाषानुवादः), किमुरामहोदयेनोद्धृतम्, Journal of the Department of Letters, XII, P.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र न किञ्चिदपि अस्ति वा नास्ति वेत्युभयथैव वक्तुं शक्यते, अन्तान्तःपातित्वात्तदुक्तेः। यथाऽन्येषु निरपेक्षतत्त्वदर्शनेषु परमार्थदर्शनं सर्वदृष्ट्यभिलापवर्जितम्, तथाऽत्रापि तत्त्वं विगत-सापेक्षपरिच्छिन्नदृष्टि विमलं प्रपञ्चातीतं सर्वविकल्पनिवर्तनशून्यतोपलक्षितमस्ति वा नास्ति वेत्युभयथापि वर्णयितुं न शक्यते। तदुक्तमाचार्यैः—

अस्तीति शाश्वतग्राहो नास्तीत्युच्छेददर्शनम्।
तस्मादस्तित्वनास्तित्वे नाश्रीयेत विचक्षणः॥ (मा० का० १५।८)

यत एवं तस्मात्—

अस्तित्वं ये तु पश्यन्ति नास्तित्वं चाल्पबुद्धयः।
भावानां ते न पश्यन्ति द्रष्टव्योपशमं शिवम्॥ (पूर्व० ५।८)

तस्मादस्तित्वनास्तित्वादिसकलाभिलापवर्जितत्वात्तत्त्वस्य तच्चतुष्कोटिविनिर्मुक्तमिति[१], निर्विकल्पमिति[२], प्रपञ्चोपशममिति[3], द्रष्टव्योपशममिति[४] च वर्ण्यते। तथा चोक्तमाचार्यदेवैरपि—

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥ (ज्ञानसारसमुच्चयः २८)

इयं शून्यता सापेक्षताभिनिर्दिष्टा पदार्थानां निःस्वभावत्वबोधिका सर्वदृष्ट्यभिनिवेशप्रत्यय-निवर्तनी च। सापेक्षत्वादियं प्रतीत्यसमुत्पादशब्देनापि वर्ण्यते; मध्यमाप्रतिपत्पदेन च लक्ष्यते[५]।

---

१. न सन्नासन्न सदसन्न चाप्युभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥
(सर्वदर्शनसङ्ग्रहे (२), बोधिचर्यावतारपञ्जिकायां चोद्धृतं नागार्जुनवचनम्) इत्यत्र; वस्तुतस्त्विद-मार्यदेववचनम्, ज्ञानसारसमुच्चयः, कारिका २८, द्र० The commemoration volume, p. 57 sq.

२. अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम्।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम्॥ इत्यत्र (मा० का० १८।६)

३. अनिरोधमनुत्पादमनुच्छेदमशाश्वतम्।
अनेकार्थमनानार्थमनागममनिर्गमम्॥
यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवम्॥ इत्यत्र (मा० का० १)

४. सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः।
न क्वचित् कस्यचित् कश्चिद् धर्मो बुद्धेन देशितः॥ (मा० का० २५।२४) इत्यत्र च।

५. अस्तित्वं ये तु पश्यन्ति नास्तित्वं चाल्पबुद्धयः।
भावनां ते न पश्यन्ति द्रष्टव्योपशमं शिवम्॥ (मा० का० ५।८) इत्यत्र।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इयं शून्यता सर्वदृष्टिनिस्सरणस्वरूपा सर्वलौकिकविकल्पनिवर्तनलक्षणा[१] च न परमार्थशब्दभागिति बोध्यम् । इयं तूपायकौशल्यत्वेनैव परिगृहीता तत्त्वावतारे या किल प्रापणी निर्विकल्पस्थितेः, बोधनी परमार्थस्य, उपायस्तत्त्वदर्शनस्य, मार्गो बोधेः, पन्थाः शिवतागन्तव्यं प्रति, अपरा च स्थितिः परमार्थस्य । तस्मात् परमार्थविषये शून्यतादृष्टिरपि घातिकैव । यथा व्याधिनिवर्तनाय सेव्यमानमौषधं व्याधिविगमेऽपि सेव्येत, ततो ग्लानिरेवापद्येत, तद्वदेव शून्यतया कृतेऽपि परमार्थसाक्षात्कारे ज्ञातेऽपि तत्त्वस्वरूपे, अनुभूततया विदितेऽपि प्रत्यात्मवेद्य-परमार्थशिवतत्त्वे, सत्यप्यविद्यापसारणे शून्यतायामभिनिवेशो ग्लानिकरः । अस्मादेव प्रज्ञापारमितादावपि शून्यता स्वभावशून्येति परिदीपिता । तस्मादाचार्यैरियमुपचारत्वेन परमार्थस्य परिगृहीता, न परमार्थत्वेनाङ्गीकृतेति[२] । तथा चैतदधिकृत्यैवावोचदाचार्यः—

"प्राहोपचार भूमिं तां परमार्थस्य बुद्धिमान" इति ।[३]

तस्माच्छून्यताप्रधानः पारमार्थिक उपायस्तत्त्वावतारस्य, संवृतेरपसारणम्, दृष्टीनां निस्सरणम्, परमार्थस्य च प्रापिकेति हि अवधारयितव्यम्, यस्या भावनया किल निर्विकल्प-मभिलापवर्जितं चतुष्कोटिविनिर्मुक्तं तत्त्वमवतरति,—

निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे ।
अनुत्पन्ना निरुद्धा हि निर्वाणमिव धर्मता ॥इति निरदेशि चाचार्यैः ।

(मा० का० १८।७)

---

१. यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा ॥
मा० का० २४।१८ तु० विग्रहव्यावर्तनी ७१ (नवनालन्दामहाविहारशोधप्रकाशनम्, परिशिष्टम्, पृ०४१ ।
यः शून्यतां प्रतीत्यसमुत्पादं मध्यमाप्रतिपदं च ।
एकार्थं निजगाद प्रणमामि तमप्रतिबुद्धम् ॥
२. मा० का० १३।८, अ वः शून्यता सर्वदृष्टिनां प्रोक्ता निस्सरणं जिनैः ।
३. तथा चोक्तमाचार्यैस्तत्रैव– (१३।८, सन्द) येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे ।
अपि च (तत्रैव, २२।११):
शून्यमिति न वक्तव्यमशून्यामिति वा भवेत् ।
उभयं नोभयं चेति प्रज्ञप्त्यर्थन्तु कथ्यते ॥,
अस्माभिरिदमन्यत्र प्रतिपादितम्—
(अप्रकाशितो लेखः) शङ्करनागार्जुनयोस्तुलनात्मकमध्ययनम् , पृ० १८४-१९८, द्र० अय्यास्वामी शास्त्री, भवसङ्क्रान्तिशास्त्रस्य भूमिका, पृ० ३०, शङ्करचैतन्यभारती, दर्शनसर्वस्वम्, पृ० ३९-४७, अष्टसाहस्रिका, पृ० २८।४२ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इयं शून्यता न गणितशास्त्रस्य शून्यवदवकल्पनीया (ज़िरो),[१] निर्विकल्पकताहेतुत्वात्, न वेयं निःसत्वतया (व्हायङ्नेस्) तत्त्वराहित्येन (व्हैकुइटी) च[२] परिमापणीया, तत्त्वस्वरूपानुबोधकत्वात् ।

एवं नागार्जुनमते तत्त्वमात्मात्मीयविप्रयोगलक्षणं नैरात्म्यपदव्यञ्जितं शून्यतयोपलक्षितमिति व्यवस्थितम् । नागार्जुनेन तु साम्मितीयैराभिधर्मिकैश्च भृशमुपवर्णितस्य पञ्चस्कन्धभिन्नाभिन्नाव्यतिरिक्ततया, तद्रूपत्वेन च निरूपितस्य पुद्गलस्याऽनुभववेदकस्य देहादीनामात्मत्वेन परिकल्पनस्य च निरासाय आत्मपरीक्षायां सत्यस्वरूपमुपवर्णितम् । तथा ह्येतत्तस्य निष्कृष्टमात्मविषये मतम् । आत्मा न स्कन्धस्वरूपः, न वा स्कन्धेभ्यो व्यतिरिक्तः । यदि स्कन्धस्वरूप आत्मा स्यात्, नियतं सोऽप्युदयव्ययभाक्, उत्पादनिरोधधर्मा च भवेत् । न चैवमात्माऽतत्त्वस्वरूपत्वात् । तस्मादात्मा रूपविज्ञानवेदनासंज्ञासंस्काराख्यैः पञ्चस्कन्धैर्वर्णयितुं कथमपि न शक्यते, तेषां नित्यं परिवर्तितत्वाद् विकारभाजनत्वाच्च । तस्मादेवं परिकल्प्यमान आत्मा नास्ति । अहङ्कारेण ममकारभावना प्रवर्द्धते, या भृशं दुःखस्य निर्वर्तनी । अस्मादात्ममोहः प्रवर्धते । इयमेव स्कन्धेषु शक्तिः, देहेन्द्रियादिष्वात्मभावः सत्कायदृष्टिरित्यपि निगद्यते । तस्माज्ज्ञानेन शून्यतारूपेणास्या आत्मशक्तेर्निवारणं कार्यम् । सर्व एव क्लेशा आत्ममोहमूलकाः, अहङ्कारहेतुकाः, ममकारप्रवर्तिताः सत्कायदृष्टिजनिताश्च भवन्ति । तस्मादेषामुपशमेनैव शान्तिः[३] । भवस्यापि प्रादुर्भाव आत्ममोहमूलकः, स्कन्धशक्तिहेतुकश्च । स्कन्धरूपे आत्मसन्ताने सिद्धे ममकाररूपा परिज्ञापि स्वयमेव निरुध्यते । तस्माद् भवहेतुकमुपादानमपि निरुध्यते । तस्मात् तृष्णा प्रहीयते । तृष्णाप्रहाणाद् वेदनादयोऽपि निरुध्यन्ते । एवं जन्मनः क्षयो भवति । एवमनात्मन्यात्म-

---

१. द्र० भवसङ्क्रान्तिशास्त्रम्, पृ० २५-२७ ।

२. यथा, डा० रामचन्द्रपाण्डेयमहोदयेन प्रत्यपादि, Mādhyamika philosophy: A New Approach (Summaries of Papers of xxvi International Congress of Orientalists. p. 189-190)

३. यथेङ्गितं प्रो० एलेक्स् वैमेनमहोदयेन, 'Philosophy East and West, (xi. 3, October 1964, p. 100-101) : The Buddhist Not-this, Not-this'.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कल्पनारूपायाः सत्कायदृष्टेर्नैरात्म्यभावनया (यदहङ्कारादयो नात्मेति) निरासा भवति । अस्मादेव चाखिलक्लेशजालस्य प्रपञ्चस्योपशमो भवति[१] । तदुक्तमार्यललितविस्तरेऽपि—

नैरात्म्यशुभाश्च धर्मिमे ते पुनरात्मेति शुभाश्च कल्पिताः ?
विपरीतमसद्विकल्पितं चक्षुविज्ञान ततापजायते ।।
स्कन्धायतनानि धातवः तृष्ण अविद्या इति कर्मप्रत्ययाः ।
सामग्रि तु सत्त्वसूचना सा च परमार्थन्तु नोपलभ्यते ।।
स्कन्धायतनानि धातवः शून्य अध्यात्मिक शून्य वाह्यकाः ।
सत्त्वात्मविविक्तनालयाः धर्माकाशस्वभावलक्षणाः ।।[२] इति ।

तथार्थतथागतगुह्यकेऽपि—'तद्यथापि नाम शान्तमते वृक्षस्य मूलच्छिन्नस्य सर्वशाखापत्रपलाशाः शुष्यन्ति, एवमेव शान्तमते सत्कायदृष्ट्युपशमात् सर्वक्लेशा उपशाम्यन्तीति' इत्युक्तम्[३] । तस्मान्मरुमरीचिवदिमे स्कन्धा आत्मत्वेन भासमाना वस्तुतो न तथा सन्तीत्याचार्यसम्मतिः । यदा चात्माऽहङ्काररूपो नास्ति तदाऽऽत्मीयरूपः सर्वो विकल्पोऽपि तस्मादुत्पद्यमानो नास्ति । तस्मात् सत्कायदृष्टिरपि प्रहीयते । प्रहीणायां च सत्कायदृष्टौ कामदृष्टिशीलव्रतात्मवादोपादानचतुष्टयमपि प्रहीयते, तत उपादानाभावे जातिजरामरणयोरपि क्षयः, ततो मोक्षाधिगम[४] इति सर्वः, क्लेशजालो विकल्पास्पदीभूतः सत्कायदृष्टिप्रहाणात् शून्यताभावनाप्रहाणतो निरस्यत इति नागार्जुनस्यात्मपरीक्षायां व्यक्त आशयः । तदाह[५]—

आत्मा स्कन्धो यदि भवेदुभयव्ययभाग्भवेत् ।
स्कन्धेभ्योऽन्यो यदि भवेद् भवेदस्कन्धलक्षणः ।।

---

१. यथोपवर्णितमाचार्यैः—

यः पश्यत्यात्मानं तस्यात्राहमिति शाश्वतः स्नेहः ।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते ।।
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते ।
तेनात्माभिनिवेशो यावत्तावत्तु संसारः ।।
आत्मनि सति परसंज्ञा स्वपरविभागात् परिग्रहद्वेषौ ।
अनयोः सम्प्रति बद्धाः सर्वे दोषाः प्रजायन्ते ।।

(बोधिचर्यावतारपाञ्जिकोद्धृतं वचनम्, पृ० ४९२) ।

२. तु० कर्मक्लेशक्षयान्मोक्षस्ते कर्मक्लेशा विकल्पतः ।
ते प्रपञ्चात् प्रपञ्चस्तु शून्यतायां निरुध्यते ।। (मा० का०)

३. ललितविस्तरः १३।१०६, ११०, ११७.

४. शिक्षासमुच्चयः पृ० १३०.

५. तथागतगुह्यकः, माध्यमिकवृत्तौ (१८।१–२) उद्धृतः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मन्यसति चात्मीयं कुत एव भविष्यति ।
निर्ममो निरहङ्कारः शमादात्मात्मनीनयोः ॥
निर्ममो निरहङ्कारो यश्च सोऽपि न विद्यते ।
निर्ममं निरहङ्कारं यः पश्यति न पश्यति ॥
ममेत्यमिति क्षीणे बहिर्धाऽध्यात्ममेव च ।
निरुध्यत उपादानं तत्क्षयाज्जन्मनः क्षयः ॥
कर्मक्लेशक्षयान्मोक्षस्ते कर्मक्लेशा विकल्पतः ।
ते प्रपञ्चात् प्रपञ्चस्तु शून्यतायां निरुध्यते ॥

स्कन्धान् प्रतीत्याऽहङ्कारममकारभावो जायते । तन्निरोधाच्चाहङ्कारादयोऽपि निरुध्यन्ते, आदर्शाभावे मुखप्रतिबिम्बाभाववत्[1] । यः पुरुषो वेदकोऽनुभविता चेतयिता कर्ता भावयितेतीन्द्रियधर्मा परिकल्प्यते, स वस्तुतोऽवयवपरीक्षायां देहस्य नोपलभ्यते । धातुभिः पाटित एव पुरुषोऽवयवैः पुद्गलाख्यां लभते, न वस्तुतो देहेन्द्रियादिषु तदस्तित्वमुपलभ्यते । यतः सर्वे धर्माः शून्या निःस्वभावाश्च । तत एव ते बुद्धेन निरात्मतयोपदिष्टाः[2] । एवमहङ्काररूपः स्कन्धात्मक आत्मा तद्व्यतिरिक्तो वा वस्तुतो नास्ति[3] । अर्थतो विचार्यमाणे (प्राज्ञप्तिक) आत्माऽस्तीति नास्तीत्युभयमपि वक्तुं न शक्यते । अस्मादेव च तथागतेन आत्माऽस्ति वा नास्ति वेत्युभयमेव वारितम्,[4] शाश्वतोच्छेदद्वयान्तवारणापरत्वात् तस्य देशनायाः । तथा चोक्तं शून्यतासप्तत्यामपि[5] नागार्जुनेन—

---

१. मा० का० १८।१-५.
२. आर्यरत्नावली १।२९-३५.
३. तत्रैव, २।१-२, तु० मिलिन्दप्रश्नः, २ ।
४. तत्रैव, २।२ ।
५. तत्रैव, १।२९-३७ ।

अहङ्कारस्तथास्कन्धानुपादायोपलभ्यते ।
न च कश्चित् सतत्त्वेन स्वमुखप्रतिबिम्बवत् ॥३२॥
स्कन्धग्राहो यावदस्ति तावदेवाहमित्यपि ।
अहङ्कारे सति पुनः कर्म जन्म ततः पुनः ॥३५॥
त्रिवर्त्मनाद्यन्तमध्यं संसारमण्डलम् ।
अलातमण्डलप्रख्यं भ्रमत्यन्योऽन्यहेतुकम् ॥३६॥
स्वपरोभयस्तु त्रैकाल्यतोऽप्यप्राप्तितः ।
अहङ्कारः क्षयं याति ततः कर्म च जन्म च ॥३७॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मा नास्ति न चानात्मा नात्माऽनात्मा न कश्चन ।
निःस्वभावा हि ते भावा निर्वाणमिव देशिताः ॥ (का० २)

इदं तावदत्र नागार्जुनस्य तात्पर्यम्—बुद्धैर्न केवलं सत्कायदृष्टेरात्मभावस्य वा पुद्गल-जीवादिदृष्टेर्वा प्रत्याख्यानं कृतं तासाञ्च निवर्तनं देशितम्, अपि तु तेन मानवेषु वर्तमानं सर्वत्र चोपलभ्यमानं नानारूपेष्विदमात्मतत्त्वं पुद्गलादित्वेन व्यपदिश्यमानं लोके सर्वथा देशितम् । बुद्धस्य तु नास्य प्रत्याख्याने तात्पर्यमासीत् । तथाहि तेन कर्मस्थित्या, कर्मफलेन, कर्माविप्रणाशेन च साकमात्मास्तित्वस्यापि देशना कृता । एकत्र भवे कृतस्य कर्मणोऽपरभवे चोपभुज्यमानस्य फलस्य प्रवर्तमानत्वात् तस्याऽविप्रणाश आत्मसद्भावश्च देशितः । तदुक्तमाचार्यैः—

भगवद्गुणा कर्मस्थित्यात्मा च फलं तथा ।
सत्त्वानामात्मकर्मैवाविप्रणाशश्च देशिताः ॥ (शून्यता० ३४)

किन्तु देशितेऽप्यात्मसद्भावे बुद्धैरन्तान्तापातित्वात् सर्वोक्तीनां न क्वचिदप्यात्मा अस्ति' इति व्यक्तमुपदिष्टम् । एवमेव न नास्तित्वमपि चास्य देशितम् । एवं च

अस्ति-नास्त्यस्ति नास्तीति सर्वमुक्तं परीक्षितम् ।
अभिप्रायात्तु बुद्धानामाभासमिव देशितम् ॥ (पूर्व० ४५)

यस्माच्च सर्वधर्माणां संस्कृताऽसंस्कृतकुशलाऽकुशलादीनां शून्यत्वमुपपादितम्, तस्मादात्म-विषयेऽपि वादो न कथञ्चित् संभवतीति द्वादशमुखशास्त्रे बहुश उपवर्णितं तात्पर्यमा[1]चार्यस्य ।

---

१. आर्यरत्नावली, JRAS, १९३४, P. ३०७–३२५ and JRAS, १९३६ II ३–६

नैवमात्मा न चानात्मा याथाभूत्येन लभ्यते ।
आत्मानमकृतदृष्टीर्ववारास्मान्महामुनिः ॥
दृष्टश्रुताद्यं मुनिना न सत्यं न मृषोदितम् ।
पक्षाद्धि प्रतिपक्षः स्यादुभयं तच्च नार्थतः ॥
इति सत्यानृतातीतो लोकोऽयं परमार्थतः ।
अस्मादेव च तत्त्वेन नोपेत्यस्ति च नास्ति च ॥
यच्चैवं सर्वथा नेति, सर्वज्ञस्तत् कथं वदेत् ।
सान्तमित्यथवाऽनन्तं द्वयं वाऽद्वयमेव वा ॥

५६. भोटचीनानुवादतः स्व० श्रीमती इन्दुदातारमहोदयया पुनः संस्कृते रूपान्तरिता Nāgārjunā's Philosopsly of Cansality, P. 21sq, मुम्बईविश्वविद्यालयशोधप्रबन्धः, १९४८ ।
बम्बई विश्वविद्यालयशोधप्रबन्धः, १९४८ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथा पूर्वमेवेङ्गितम्, बुद्धानां धर्मदेशनाऽधिकारिणां सत्त्वानुशयाऽऽनुकूल्येन प्रवृत्ता। यथ संवृतिपरमार्थसत्यविषयेऽपि तथात्मविषयेऽपि विनेयजनानां सत्त्वानुशयकुशलादिकं परीक्ष्य—

आत्मेत्यपि प्रज्ञपितमनात्मेत्यपि देशितम्।
बुद्धैर्नात्मा न चाऽऽनात्मा कश्चिदित्यपि देशितम्॥ (मा० का० १८।६)

तथा चेदं व्याख्यातमकुतोभयायामपि मध्यमकवृत्तौ नागार्जुनकृतायाम्—

"बुद्धभगवद्भिः सत्त्वानुशयविद्वद्भिर्विनेयजनांस्तांस्तानवलोक्य, विनेया येषां लोको नास्ति, परलोको नास्ति सत्त्वा उपपादुका न सन्तीति दृष्टिस्तादृशी संभवति, तेषामनात्मदृष्टिपरिहारार्थमात्मेत्यपि प्रज्ञपितम्। विनेया येषां कुशलाकुशलयोः कर्ता च तयोः फलस्य भोक्ता च बद्धो मुक्तश्चेति शिक्षितत्वादात्मेति यः कश्चिदस्तीति दृष्टिस्तादृशी सम्भवति तेषामात्मदृष्टिपरिहारार्थमनात्मेत्यपि देशितम्। विनेया ये परिपक्वकुशलमूलसामग्र्यः। उत्तीर्णमत्रौघाः परमार्थकथाभाजनभूतास्तेभ्य आत्माऽनात्मा कश्चिदित्यपि न देशितम्। अपि चान्यथा परीक्ष्यैकं तीर्थिकमधिकृत्य संस्कारानात्मरहितान् प्रतिक्षणविनश्वरानन्यकाले व्यवस्थितानात्मन्यसति कर्मफलरहितांश्च प्रतीत्य विभावोऽस्त्यात्माऽस्तीत्यपि देशितम्। अन्ये ये शरीरेन्द्रियबुद्धिसामग्रीमात्रमेवास्त्यत्र हेतुफलयोः कल्पित आत्मा स्वभावतो न विद्यते सत्त्वपर्यायसंस्कार आत्मा नास्त्यनिष्ठितो स्थापितोऽथवास्मिन्नपि संसारो नोपपद्यत इति युक्तितो हेतुफलसम्बन्धमोहितास्तेषामनात्मेत्यपि देशितम्। बुद्धभगवता सर्वधर्मविदुषा परोक्षरीत्याऽऽत्माऽनात्मा च कश्चिदित्यपि न देशितम्" इति।

अस्मादिदं व्यक्तं प्रतिभाति—यद्यपि बुद्धेन कर्तृत्वादितया परिकल्पितस्याऽऽत्मनो निषेधः कृतः, विनेयानामनात्मदृष्टिपरिहारार्थञ्चात्मोपदेशोऽपि कृतः, किन्तु तेन व्यक्तरूपेण न आत्मनोऽस्तित्वमेव प्रतिपादितम्, न वाऽपरोक्षतया तन्नास्तितैव देशिता। यस्माच्चास्ति-नास्तिरूपेण तत्त्वनिर्देशः कर्तुं न शक्यते, अन्ताभिनेवेशभयात्तस्माद् द्वयवादिना मध्यममार्गश्च देश-

---

५७. Vishwabhārati Anuals, hl VIII अभिधानायां शोधपत्रिकायामाचार्यश्रीअय्यास्वामिशास्त्रिमहोदयैश्चीनानुवादतः संस्कृते पुनर्विरचितम्। द्रष्टव्यानि सर्वप्रकरणानामन्त्यवाक्यानि। यथाऽष्टमाध्यायपरिसमाप्तौ—'संस्कृतासंस्कृतधर्माणामेव शून्यत्वे कः पुनर्वाद आत्मनि', इत्युक्तम्।

५८. भोटानुवादादिन्दुदातारमहोदययैव संस्कृतेऽनूदिता।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यता बुद्धेन मौनेनैव सर्वमवबोधितम्। मौनेन तु अस्ति वा नास्ति वा इति न किञ्चिदपि व्यक्तं प्रतिभाति। तत्तु तत्त्वस्याऽनिर्वाच्यत्वपरमेवेति मन्तव्यम्। यदा च सर्वः तत्त्वग्रामः शून्यतया लक्ष्यते, परमार्थश्चापि निष्प्रपञ्चत्वात्तयैव सर्वदृष्टिनिस्सरणलक्षणया उपचारत्वेन परिगृहीतया प्रतिबोध्यते, तदाऽऽत्मविषये वाक्प्रवृत्तिरश्रेयस्करी भवेदिति कृत्वाऽऽचार्यैर्धर्मतायाः शिवतालक्षणताया निष्प्रपञ्चत्वमपि प्रतिपादितम्। इयञ्च धर्मता आत्मनोऽभिन्नेति स्वीकर्तव्यमेव। तस्मादेव च मानवेषु व्याप्तस्य चित्स्वभावस्यात्मनोऽस्तित्वं बुद्धेन मौनालम्बनतयाऽङ्गीकृतम्। तस्य नैरात्म्यदेशनायाः सत्कायपुद्गलात्मभवादिदृष्टिनिवर्तनपरत्वात्, आत्मनश्च व्यक्तमेवास्तित्वः स्वीकारान्नात्मनिषेधो मन्तव्यः। महायाने चापि सत्कायदृष्टिनिवर्तनपराणां बुद्धोपदेशानां व्याख्यानमुपलभ्यते, धर्मकायरूपेण च बुद्धेनात्मन एकत्वमङ्गीकृतम्। तदेव चाद्वयमात्मतत्त्वं नागार्जुनेनापि धर्मतारूपेणास्तीतीङ्गितम्। तथा हि—

निवृत्तमभिधालभ्यं निवृत्ते चित्तगोचरे।
अनुत्पन्ना निरुद्धा हि निर्वाणमिव धर्मता॥ (मा० का० १८।७)

एतदेवाधिकृत्याऽऽर्यदेवेनाप्युदघोषि—

अद्वितीयं शिवद्वारं कुदृष्टीनां भयङ्करम्।
विषयः सर्वबुद्धानामिति नैरात्म्यमुच्यते॥ (चतुःशतकम्, १२।१३)

परन्त्वत्रेदमवधेयम्—नायमात्मा नैरात्म्यपदव्यञ्जितो जगत्कारणत्वेनाङ्गीक्रियते, सर्वधर्माणां हेतुप्रत्ययान् प्रतीत्य समुत्पन्नत्वात्। परस्परं प्रतीत्यैव जाताः सर्वे धर्माः सापेक्षाः, निःस्वभावाः, शून्याः मायावदवभासमानाश्च मन्यन्ते। न ते किञ्चिदपरं प्रधानादिरूपं कारणम्, ईश्वरादिरूपं वा कञ्चित्कर्तारं मायारूपिणीं वा काञ्चिच्छक्तिमपेक्षन्ते स्वजनिप्रक्रियायाम्। तस्मादयमात्मा बौद्धैर्माहायानिकैर्माध्यमिकैश्च केवलं निर्विकल्पस्वरूपेणैव स्वीक्रियते, न जगत्कारणत्वेनाभिसम्बध्यते, न वा जाग्रदादिरूपेणास्यात्मनश्चतुष्पात्त्वं तत्र कल्पितम् यथोपनिषत्सु वेदान्तशास्त्रेषु वा, न वास्योपासनमुपदिष्टम् न चास्य प्राप्त्युपायो वर्णितः, न वास्य विस्पष्टं स्वरूपमाख्यातं बौद्धशास्त्रेषु। तत्र तु केवलमिदमेव व्यञ्जितं यदात्मनोऽनिर्वाच्यस्य प्रत्यात्मवेद्यतयाऽनुभवे प्रतिष्ठितस्यास्ति विद्यमानता। नायमहम्भावादिना वर्णनीयः, न वा कर्तृ-वेदितृ-अनुभवितृ-स्कन्ध-देहेन्द्रियरूपेषु परिकल्पनीयः। अयन्तु परमार्थतत्त्वाभिन्नो धर्मतापदवर्णनीयः शिवताद्युपलक्षितो धर्मकायाविशिष्टो नैष्ठिकपदेन परमसुखरूपेण निर्वाणेनाऽभिन्नतया व्यपदेशभाजनं परानन्दस्वरूपश्चेत्येव माध्यमिकादिबौद्धानामाशयः। तथा चोक्तमाचार्यसङ्घदेवेनापि—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संस्कारमात्रं जगदेत्य बुद्धया निरात्मकं दुःखविरूढिमात्रम्।
विहाय यानर्थमयात्मदृष्टिमर्हात्मदृष्टिं श्रयते महार्थाम्॥

(महायानसूत्रालङ्कारशास्त्रे १४।३७)।

अस्मिन्निबन्धे निर्दिष्टाः सङ्केताः

दीघ० =	दीघनिकायः, अभिधम्मपिटकान्तर्गतः
खुद्दक० =	खुद्दकनिकायः ,,
संयुत० =	संयुत्तनिकायः ,,
मज्झिम० =	मज्झिमनिकायः ,,
मा० का० =	माध्यमिककारिकाः, पूसेमहाभागेन संशोधिताः
प्र० पा० =	प्रज्ञापारमिता
अष्टसाहस्तिकां =	अष्टसाहस्तिका प्रज्ञापारमिता
सप्तशतिका० =	सप्तशतिका प्रज्ञापारमिता।
म० सू० सं० =	महायानसूत्रसङ्ग्रहः, प्रथमो भागः, श्रीपरशुरामलक्ष्मणवैद्यसम्पादितः, दरभङ्गा, १९६०
लोकातीत०, निरौपम्य० =	लोकातीतस्ततः, निरौपम्य(निरुपम)स्तवः। (नागार्जुनकृती)।
स० द० सं० =	सर्वदर्शनसङ्ग्रहः, माधवाचार्यरचितः।
पूर्व० =	पूर्वोद्धृतम्।
I. H. Q. =	Indian Historical Quarterly, Calcutta.
J. R. A. S. =	Journal of the Royal Asiatic Society of Great Britain and Ireland, London.
म० सू० अ० =	महायानसूत्रालङ्कारशास्त्रम्, आर्यासङ्गरचितम्।
अकु० =	अकुतोभया, नागार्जुनाचार्यविरचिता।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बौद्धमार्गानुसारिणी प्रमाणमीमांसा

आचार्यश्रीपरमानन्दशास्त्री, मन्दीरी, पटना।

विभाव्य बहुशो ग्रन्थान् स्मारं स्मारं गुरोर्गिरः।
श्रथनिरुद्धपदाम्भोजमधुपायितमानसः ॥
परमानन्दनः शास्त्री मिथिभूजमहीसुरः।
कुर्वे प्रमाणमीमांसां बौद्धमार्गानुसारिणीम् ॥

इह जगति यावतामपि घटपटादिपदार्थानां तत्त्वज्ञाननियामकतावच्छेदकरूपप्रमेयत्वेन विषयीकृतानां बोधसाधनत्वेनावश्यकीभूतप्रमाणपदार्थस्य व्युत्पादनमप्यावश्यककोटावायातीति प्रस्तुतीक्रियते प्रमाणमीमांसा। तथाहि—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्।" इति (न्यायसूत्रभाष्ये वात्सायनः);

"अर्थानर्थप्राप्तिपरित्यागयोरवश्यं प्रमाणपूर्वकत्वात्...।" इति तर्करहस्ये (अद्यावध्यप्रकाशितेन) बौद्धाचार्यः कमलशीलोऽपि।

तदस्मिन् व्यतिकरे—

"प्रमीयते यथार्थज्ञानविषयीक्रियते पदार्थस्यार्थो येन तत् प्रमाणम्" इति व्याकृतिप्रकृतिमक्षिलक्ष्यीकृत्य अर्थविज्ञानात्मकप्रमाकरणरूपेण प्रमाणपदार्थो बहुभिरेव विपश्चिद्भिः बहुधा प्रपञ्चितचर उपलभ्यते तत्तत्प्रस्थानानुसारेण। तथाहि—

१—"प्रमाणमविसंवादिज्ञानम्" इति परिभाषामारचयता बौद्धपरमाचार्येण विश्रुतकीर्त्तिना धर्मकीर्त्तिना या व्यवस्था आसीदुद्भाविता तामेवानुसरता प्रसिद्धेन बौद्धविपश्चिता प्रज्ञाकरगुप्तेनाऽपि—

२—"प्रमीयते येन परिच्छिद्यते समीहितोऽर्थस्तत् प्रमाणम्।"

(प्रमाणवार्तिकभाष्ये २७ पृष्ठे)।

इत्येवं व्युत्पादयता पुनः—

"अर्थक्रियासमर्थस्यैव प्रमाणत्वम्" इति सुस्पष्टमुद्घोषितम्।

३—"प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिः। यत् पुनर्विसंवादि न तत् प्रमाणम्।" (तर्करहस्ये) इत्याचार्यकमलशीलोऽपि।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"अर्थक्रियास्थितिरविसंवादनम्। अर्थो दाहादिरेषणीयत्वात्। तस्य या क्रियानिष्पत्तिः कर्मस्था, तस्याः स्थितिरविचलनं स्वप्ननिरासार्थम्।...अर्थक्रियार्थी हि सर्वः प्रमाणमप्रमाणं वा अन्वेष्यते, प्रेक्षावान्, न व्यसनितया। तस्माद् नार्थप्रतीतिमात्रं प्रमितिः। किं तर्हि? परोक्ता विशिष्टैव। तस्याश्च साधकतमं नेन्द्रियादिकम्। वक्ष्यमाणयुक्त्या। किं तर्हि? ज्ञानगतमर्थसारूप्यम्। अतस्तदात्मकतया ज्ञानमेव प्रमाणम्।" (तर्करहस्ये) इत्यपि स एव।

अत्र च—

अन्यथास्थितस्य वस्तुनोऽन्यथाकथनं विसंवादो बोद्धव्यः। तथा च—

स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगित्वम् अविसंवादिपदार्थः। स्वसमानाधिकरणप्रकारावच्छिन्नविषयताप्रतियोगित्वमिति तु फलितार्थः।

४—उपरि निर्दिष्टे वात्स्यायनीयलक्षणेऽपि—"अर्थवत् प्रमाणम्" इति रूपेऽर्थशब्दान्नित्ययोगे मतुप्। नित्ययोगश्चाव्यभिचारित्वम्। प्रमाणं हि यं पदार्थं येनैव रूपेण येनैव च प्रकारेण प्रतिपद्यते स पदार्थव्यतिकरस्तद्रूपस्तत्प्रकार एव भवेत्, नान्यथा कदापीति प्रमाणे अर्थाऽव्यभिचारिता मन्तव्या।" "तत्तत्प्रमाणस्य तत्तत्प्रमेयपदार्थव्याप्यता" इति तु फलितार्थः। स्वजन्यज्ञानविशेष्यतासम्बन्धेन प्रमाणस्य प्रमेयपदार्थाव्यभिचारित्वमिति तु परमाकूतितम्। अत्रेदमवधेयम्—

न्यायसूत्रकृतोऽक्षपादगोतमस्य मते यथार्थाया अनुभूतेः साधनमेव प्रमाणम्। परं कस्मिंश्चिदपि विषये उत्पन्नायामनुभूतौ तज्ज्ञानं यथार्थमेवेति निश्चेतुं नाऽस्ति कोऽप्युपायः। अतश्च प्रमाणतत्त्वभूतं प्रामाण्यमेवानिश्चितस्थितिकं सत् सर्वमेवोन्मत्तप्रलपितमिव कल्पयेदिति प्रमाणस्य प्रामाण्यनिश्चयायानुमानप्रमाणप्रदर्शनमुखेनैव भाष्यमवतारितम्—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्" इति रूपेण। तत्राऽपि—"प्रवृत्तिसामर्थ्यात्" इत्यस्य "समर्थप्रवृत्तिजनकत्वात्" इत्यर्थो मिश्रवाचस्पतिपरिकल्पितो बोद्धव्यः। "यस्माच्च प्रमाणं समर्थायाः प्रवृत्तेर्जनकम्, तस्मादेव तत्प्रमेयभूततदर्थाऽव्यभिचारि" इति मिश्रमहानुभावानामाशयः। "प्रमाणमर्थाव्यभिचारि, समर्थप्रवृत्तिजनकत्वात्। यदि पुनरेतदर्थवन्नाभविष्यद् न समर्थां प्रवृत्तिमकरिष्यत्। यथा प्रमाणाभासः" इति व्यतिरेकी हेतुः, अन्वयव्यतिरेकी वा। अनुमानस्य स्वतः प्रमाणतयाऽन्वयस्याऽपि सम्भवात्। (न्यायवार्तिकतात्पर्य०) इतिरूपोऽनुमानप्रकारश्च मिश्रपरिकल्पित एव।

५—"प्रमाणस्य स्वप्रमेयाव्यभिचारित्वं नाम प्रामाण्यम्।" इति जयन्तभट्टोऽपि मनसि चक्रे (न्यायमञ्जरी १६० पृ०)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

६—"प्रमाणत्वमर्थाऽव्यभिचारि प्रमासाधनत्वम्" इति तात्पर्यपरिशुद्धौ उदयनाचार्याः। तत्रत्यप्रमापदार्थश्चानुभवात्मकं ज्ञानमात्रमेवेति वर्धमानोपाध्यायाः।

परमेतत्सकलमपि वर्त्तुलीकृत्य विलोकिते सति—स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगिज्ञानजनकत्वरूपधर्मकीर्त्तिकीर्त्तितप्रमाणत्वतो न विशिष्य विशिष्यत इति स्पष्टमेव बौद्धागमानुशीलनव्यसनिनां विपश्चिताम्। प्रकृतमनुसरामः।

७—"उपलब्धिहेतुश्च प्रमाणम्" (वात्स्यायनभाष्ये ६४ पृ०) इति न्यायभाष्योक्ते प्रमाणलक्षणे चोपलब्धिशब्दस्य नित्यसाकाङ्क्षत्वेनार्थशब्दस्याध्याहारो भवति। एवञ्च—"अर्थोपलब्धिहेतुः प्रमाणम्" इति प्राचीनानां नैयायिकानां मतं मूलतः आयाति। तत्रापि च बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्।" (न्यायसूत्रे १।१।१५) इति गोतमेनोपलब्धिपदार्थस्य ज्ञानपर्यायत्वप्रतिपादनादुपलब्धिपदार्थो ज्ञानम्। हेतुपदार्थश्च—"हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम्।" (वैशेषिकसूत्रे ६।२।४) इति कणादीयानुसारेण करणत्वमभ्युपेतव्यम्।

तथा च—

८—"अर्थज्ञानकरणत्वं प्रमाणत्वम्।" इति प्रमाणलक्षणमविलक्षणमेव विश्रुतकीर्त्तिधर्मकीर्त्तिकीर्तितप्रमाणलक्षणतः।

यत्तु—

९—"सम्यगनुभवसाधनं प्रमाणम्।" (न्यायसारे, प्रत्यक्षखण्डे १) इति भासर्वज्ञकृतं प्रमाणलक्षणं तत्रापि—

"सम्यक्त्वम्, तद्धर्मसमानाधिकरणतद्विषयताकत्वरूपम्" एव विवक्षितं बोद्धव्यम्। अनुभवपदार्थश्च ज्ञानमेव। साधनग्रहणाच्च कर्मकर्त्तृनिरासेन करणस्य ग्रहणं सुतरां सम्भवतीति।

१०—तद्धर्मसमानाधिकरणतद्विषयताकज्ञानजनकत्वरूपं प्रमाणत्वं भासर्वज्ञसम्मतमपि धर्मकीर्त्तिलक्षणतो नैव भिद्यत इति सर्वं सुस्थम्।

११—तद्धर्मसमानाधिकरणतद्विषयताकानुभवजनकत्वं प्रमाणत्वमिति तत्त्वचिन्तामणौ गङ्गेशोपाध्यायसम्मतम्।

१२ — तत्सम्बन्धानुयोगिविशेष्यकत्वावच्छिन्नतत्प्रतियोगिकसम्बन्धावच्छिन्नप्रकारकज्ञानजनकत्वमिति च गादाधरी गतिः।

१३—"प्रमाणं स्वपराऽऽभासिज्ञानं बाधविवर्जितम्" इति न्यायावतारे सिद्धसेनः।

१४—'अर्थनिश्चायकं ज्ञानं प्रमाणम्'। इति प्रमेयकमलमार्त्तण्डे प्रभाचन्द्रः। तन्मते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क—तद्वद्विशेष्यकत्वावच्छिन्नतदभावप्रकारताशून्यतद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वव-ज्ज्ञानजनकत्वम् ।

ख—तदभावप्रकारत्वानिरूपिततत्प्रकारतानिरूपितविशेष्यताशालिज्ञानजनकत्वं वा प्रमाणत्वं बोध्यम् ।

१५—"यत्र प्रयत्नेनान्विष्यमाणोऽपि कारणदोषो बाधकज्ञानं वा नोपलभ्यते तत् प्रमाणम्" । इति शास्त्रदीपिकायां पार्थसारथिः ।

१६—"द्वयोरेकतरस्य वाऽप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा, तत्साधकं यत् तत् त्रिविधं प्रमाणम् ।" (सां० सू० १।८७) इति साङ्ख्यसूत्रकृत् ।

तत्राऽर्थे असन्निकृष्टता च प्रमातर्यनारूढता, अनधिगतता वा बोध्या । परिच्छित्तिश्चानुभवः ।

तथा च—

अनधिगतार्थविषयकानुभवजनकत्वं प्रमाणत्वमिति सांख्यसूत्रकाराभिमतं प्रमाणलक्षणमायाति ।

१७—"अनधिगतार्थगन्तृप्रमाणम् ।" (सिद्धान्तचन्द्रिकायाम् १ पृ०) इति भट्टमीमांसकाः । तत्र गन्तृपदार्थो बोधजनकता ।

तथा च—

अनधिगतार्थबोधजनकत्वं प्रमाणत्वमिति पर्यवस्यति ।

१८—"प्रकर्षेण संशयादिव्यवच्छेदेन मीयते परिच्छिद्यते वस्तुतत्त्वं येन तत् प्रमाणम् ।" [जैनसिद्धान्तवृत्तौ १।१।१] इति व्युत्पादनविचक्षणो जैनाचार्यचन्द्रो हेमचन्द्राचार्यः— "सम्यगर्थनिर्णयः प्रमाणम् ।" (प्रमाणमीमांसा १।१।१) इति सूत्रयाञ्चकार । तत्र— सम्यक्त्वञ्च, अविसंवादकत्वरूपम् । निर्णयश्च तत्त्वज्ञानम्, तदभावाप्रकारकतत्प्रकारकज्ञानरूपम् । तथा च—

अविसंवादकार्थज्ञानजनकत्वं प्रमाणत्वमिति तन्मतेऽपि लक्षणं पर्यवस्यति ।

१९—"स्वाऽपूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्" । (परीक्षामुखसूत्रम्) इति दिगम्बराचार्यो माणिक्यनन्दी । व्यवसायोऽत्र ज्ञानविषयीभूतं ज्ञानम् ।

तथा च—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वाऽपूर्वार्थज्ञानविषयीभूतज्ञानजनकत्वम् प्रमाणत्वमिति फलितम्। प्रत्यक्षे—घटं साक्षात्-करोमीत्यनुव्यवसायगम्या घटज्ञानविषयीभूतज्ञानजनकता, अनुमाने च—घटमनुमिनोमीत्यनु-व्यवसायगम्या सेति तु न विस्मर्त्तव्या।

२०—"अपूर्वार्थनिर्णय इत्यस्तु लक्षणम्"। (प्रमाणमीमांसावृत्तौ १।१।२) इति चाचार्यो हेमचन्द्र एव। तत्र निर्णयो नाम—"संशयानध्यवसायाविकल्पत्वरहितं ज्ञानम्—" इत्यपि तदुक्तमेव बोद्धव्यम्। तेन—अपूर्वार्थज्ञानं प्रमाणमित्येव वक्तुं लार्थः सम्पद्यते। तत्राऽप्य-पूर्वत्वं नाम—अर्थे प्रमाणान्तरजन्यप्रतीत्यविषयत्वरूपं ग्राह्यम्। तथा च—

'अपूर्वार्थनिर्णयत्वम्' इत्यस्य प्रमाणान्तरजन्यप्रतीत्यविषयतदभावाप्रकारकतत्प्रकारकज्ञान-जनकत्वमित्यर्थः पर्यवस्यति। तदेव च तदीयप्रमाणपदार्थः।

२१—"अविसंवादकं ज्ञानं प्रमाणम्।" (न्यायबिन्दौ ३ पृ०) इति न्यायबिन्दुरपि।

२२—तर्करहस्ये तु "किमिदानीं प्रमाणम्? उच्यते—प्रमीयते येन तत्प्रमाणमिति सामान्येन व्युत्पादितमपि प्रमाणपदं कर्मकर्त्तृक्रियाः समाक्षिप्य स्वसामान्यविशेषलक्षण-माक्षिपति।" (तर्करहस्य P4A।6।3)

इत्येवं कण्ठत एवोद्घुष्ये "परिच्छिन्नप्रवृत्तिविषयप्रापणं सम्यग्ज्ञानत्वं प्रत्यक्षानुमानयो-रविशिष्टम्।" (तर्करहस्य P।B।7)

इति प्रवर्तयता कमलशीलेन, लौकिकानुभवविषयीभूतप्रवृत्तिविषयार्थबोधजनकत्वं प्रमाणत्वमेव मन्येऽभिप्रेतम्—

"भाष्यमते तु—अविसंवादिपदं लक्षणस्य लौकिकत्वार्थम्।" [तर्करहस्ये P।B।2]

इति प्रागेव स्पष्टीकृतत्वात्। तथा च—

सर्वेष्वपि प्रागुक्तेषु प्रमाणलक्षणेषु सुसूक्ष्मं विवेच्यमानेषु नैव लक्ष्यते कियानपि मौलिको भेदः। केवलं शाब्दिकमेवौपरिष्टिकं भेदावभासनं भवति विदुषाम्। परम्—"प्रमाणमविसंवादि-ज्ञानम्" इति प्रतिपादयन्नाचार्यो धर्मकीर्त्तिः सर्वानपि स्फुटलक्षणकर्त्तृत्वेनातिशेत इति स्पष्टमेव भविष्यति बौद्धागमानुशीलनव्यसनिनाम्।

प्रमाणभेदमीमांसा

तदेवं सर्वदार्शनिकसम्प्रदायसम्भावितस्याप्यस्य प्रमाणस्य भेदविभेदनसम्बन्धेऽपि दृश्यते महान् विभेदः। तथा हि—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१—"प्रत्यक्षमेकमेव प्रमाणम्" इति चार्वाकाः।

२—"प्रत्यक्षमनुमानं चेति द्वे प्रमाणे।" इति बौद्धा आर्हताश्च।

३—"प्रत्यक्षमनुमानं चेति द्वे प्रमाणे।" इति कणादप्रधाना वैशेषिकाः।

४—"प्रत्यक्षानुमानागमाः प्रमाणमिति वैशेषिकाः" इति प्रमाणमीमांसा (१।१।६)

५—"प्रत्यक्षमनुमानमाप्तवचनानि त्रीणि प्रमाणानि" इति साङ्ख्याः, योगिनो मायावादिवेदान्तिनश्च।

६—"प्रत्यक्षानुमानोपमानानि त्रीणि प्रमाणानि" इति नैयायिकैकदेशिनः।

७—"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" (न्यायसूत्रम् १।१।३) इति न्यायसूत्रकृद्गोतमोऽक्षपादः, तदनुयायिनोऽन्येऽपि नैयायिकाः।

८— "स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्।
एतैरादित्यमण्डलं सर्वैरेव विधास्यते॥"

इति तैत्तिरीये आरण्यके १ प्रपाठके ३ अनुवाकः।

९—"अथ कतिविधं प्रमाणम्? चतुर्विधं प्रमाणम्—प्रत्यक्षमनुमानमुपमानमागमश्चेति। चतुर्षु प्रमाणेषु प्रत्यक्षं श्रेष्ठम्। कुतः पुनः प्रत्यक्षं श्रेष्ठमिति चेत्? अपरेषां त्रयाणां प्रमाणानां प्रत्यक्षोपजीवकत्वाच्छ्रेष्ठम्।" इति उपायहृदये [गायकवाड़ १३ पृ०] भदन्तसार्वभौमो भगवान् नागार्जुनः।

१०—"प्रत्यक्षानुमानोपमानशब्दाऽर्थापत्तयश्चेति पञ्च प्रमाणानी" ति प्रभाकरमतानुयायिनो मीमांसकाः।

११—'प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयश्चेति षट् प्रमाणानी"ति कुमारिलभट्टानुयायिनो मीमांसका वेदान्तैकदेशिनश्च।

१२—"प्रत्यक्षानुमानोपमानशब्दार्थापत्यनुपलब्धिसम्भवैतिह्यानीत्यष्टौ प्रमाणानी" ति पौराणिकाः।

१३—"चेष्टासहितं प्रमाणनवकम्" इति तान्त्रिकाः।

१४—"केचित्तु—शकुनलिप्यादिकमपि प्रमाणमिच्छन्ति" इति प्रमाणपद्धतौ (५ पृ०) जयतीर्थाचार्यः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदेवं बहुभिर्बहुधा प्रस्तुतेषु प्रमाणप्रकारेषु प्रमाणद्वैविध्यमेव बौद्धागमानुप्रथितमुपलभ्यते युक्तिमत् । तथाहि—

शक्यप्रापणविषयोपदर्शनं हि प्रमाणम् । प्रत्यक्षानुमानयोरेव भवति व्यासज्यवृत्ति । तथा चाऽऽह, आचार्यो दिङ्नागः—

प्रत्यक्षमनुमानं च प्रमाणं हि द्विलक्षणम् ।
प्रमेयं तत्र सिद्धं हि न प्रमाणान्तरं भवेत् ॥ इति ।

(प्रमाणसमुच्चये)

अयमाशयः—

प्रत्यक्षपरोक्षभेदात्मकेन विशेषसामान्यभेदद्वितयेनैव सर्वेषामपि प्रमेयपदार्थानामाकलनसम्भवात् तृतीयः कोऽपि प्रमाणप्रकारो नैव स्वीकार्यतामर्हति ।

"लक्षणभेदाद्धि भवन्तः प्रमाणानां नानात्वं प्रतिपन्नाः । वयं पुनर्द्वैविध्यात् प्रेमयस्य प्रामणद्वैविध्यमवबुद्ध्यामहे ।" इति तर्करहस्यकृत् (P/B 2/3/7-7) स्पष्टमेवाचष्ट ।

"स्वलक्षण-सामान्यलक्षणाभ्यामन्यद् प्रमेयं नास्तीति द्वे एव प्रमाणम् ।" (तत्त्वसंग्रहपञ्जिकायाम् ४५५ पृ०) इत्यविद्धकर्णस्याचार्यस्य वचोऽपि नैव विस्मर्त्तव्यम् ।

तथा च तन्मते व्यवस्थापनप्रकारः—'स्वलक्षणं सामान्यलक्षणव्यतिरिक्तप्रमेयाऽर्थान्तरसद्वितीयम्, प्रमेयत्वात्, सामान्यलक्षणवत् ।"

"सामान्यलक्षणं वा स्वलक्षणव्यतिरिक्तप्रमेयान्तरसद्वितीयम्, प्रमेयत्वात्, स्वलक्षणवत् ।" (तत्रैव ४५५ पृ०)

आचार्यो धर्मकीर्तिश्च—"स्वलक्षणमेव परमार्थसत् । तदेव च प्रत्यक्षस्य विषयः । तद्भिन्नं समस्तमेव सामान्यलक्षणं केवलमनुमानस्यैव विषयः ।" इति तु विशदं व्याजहार । तदिदं तस्यैव न्यायबिन्दुनामके ग्रन्थे तट्टीकायां धर्मोत्तराचार्यकृतायां च द्रष्टव्यम् । बौद्धाचार्यशान्तरक्षितकृते तत्त्वसंग्रहग्रन्थेऽपि प्रमाणान्तरपरीक्षायां सखण्डनमण्डनं विस्तरतो व्युत्पादितमिति तत (४३३-४८५पृ.) एवावधारणीयम् ।

तर्करहस्यकृत्-पुनः—

"इदं तु बोधसर्वस्वं स्वीकुरु ।
अर्थस्याऽसम्भवेऽभावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबद्धस्वभावस्य तद्धेतुत्वं समं द्वयम् ।" [P2B/4|6]

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति प्रमाणवार्त्तिककारिकामवतारयन्

"प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः ।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ।"

इति धर्मकीर्तिकारिकामेव परमं प्रमाणमुररीकरोति ।

यत्तु—

न्यायवार्त्तिककृदुद्योतकरेण विषयत्रैविध्यं सामान्य-विशेष-तद्वल्लक्षणात्मकम् उद्भाव्य धर्मकीर्त्तिमतमपाकृतमस्ति, तत्तु तत्तृतीयभेदस्यापोहात्मकतयैव गतार्थतेति रत्नकीर्त्तिरचिते अपोह-सिद्धिग्रन्थे, अशोकाचार्यरचितायां सामान्यदूषणदिक्प्रसारितायाम् अवयविनिराकरणे च विस्तरतो विवेचितमिति तत एवावधार्यम् ।

प्रमाणान्तरनिरासप्रकाशः

तदेवम्—साधिते प्रमाणद्वयकौचित्ये प्रमाणान्तररूपेण शास्त्रान्तरेषु निर्दिष्टानां कतिपयानां कथित-प्रमाणप्रकाराणां निरसनमप्यावश्यकम् । तथा हि-

१. 'शब्दज्ञानादसन्निकृष्टेऽर्थे ज्ञानं यद् अपौरुषेयशब्दजनितप्रत्ययितपुरुषवाक्यजनितेति भेदद्वयवत् शाब्दं प्रमाणं तदपि प्रतिभाज्ञानवद् यौक्तप्रत्यवमर्शस्वभावान्न भ्रश्यति' इति तर्करहस्यकृत् । तत्र यौक्तः प्रत्यवमर्शोऽनुमानमेव । तथाहि—

गामानयेत्यादिवाक्यश्रवणानन्तरं यान्वयप्रतीतिरनुभूयते तत्र वाक्यनिष्ठाकाङ्क्षादिमत्त्वस्य प्रतिसन्धानं तदर्थप्रतिपत्त्यनुकूलतया अवध्रियत एव । एवं च—

आकाङ्क्षादिमत्पदकदम्बकत्वप्रतिसन्धानस्यावश्यकतया तस्य स्मारितार्थसंसर्गविज्ञप्तिपूर्वकत्वनियमेन अनुमानादेव तत्फलसिद्धौ शब्दस्य प्रमाणान्तरत्वाभ्युपगमो व्यर्थ एव ।

एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि । आकाङ्क्षादिमदाप्तोक्तपदत्वात् गामभ्याजेति पदकदम्बकवदित्यनुमानप्रकारः पदपक्षकानुमाने ।

अर्थपक्षकानुमाने च—

एते पदार्था मिथः संसर्गवन्तः, आकाङ्क्षादिमत्पदकदम्बकस्मारितत्वात् गामभ्याजेति स्मारितपदार्थवद् इत्यनुमानप्रकारो बोद्धव्यः । एवं च—

अनुमानप्रमाणेनैव शाब्दप्रमाणविषयाणां सर्वेषामपि सम्यगाकलनस्य सुवचत्वादलं शाब्दप्रमाणान्तरस्वीकारेण ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च—शाब्दप्रमाणाङ्गीकारे शब्दार्थयोः कोऽप्यव्यभिचरितः सम्बन्धोऽङ्गीकर्त्तव्यो भवति यो न भवति कदाचिदपि युक्तिसहो विवेचकानाम् ।

तदेतदतिस्पष्टतयोक्तं-तर्करहस्यकृता । यथा—-

"अर्थक्रियाऽर्थिनां हि व्यवहर्त्तॄणामुपयुज्यमानेन मानेन प्रवृत्तिविषयः शक्यप्रापणो नियतोऽर्थक्रियासमर्थः प्रत्यक्षोऽप्रत्यक्षश्च प्रमातव्यो विषयः । ततश्च प्रत्ययितप्रदिष्टात् कर्त्तृविधुरिताच्च वाक्यात् त्रिप्रमाणकशक्तिलक्षणसम्बन्धाद् वृद्धादिष्टेन वृद्धान्तरेण सामान्यात्मना प्रतिपद्यमानः परोक्षोऽर्थः त्रिरूपलिङ्गप्रत्यक्षो विषये सत्यमन्तर्भवति । परम्—कर्त्तुरासत्वकर्त्तृकत्वं त्रिप्रमाणकशक्तिलक्षणसंबन्धश्च तीर्थसार्थप्रार्थनासहस्राणामप्यविषयः ।" [तर्करहस्य-P2A|4/6] इति ।

२. उपमानमपि प्रमाणान्तरं नैव विचारसहम् । तथाहि तर्करहस्यकृद्—

"उपमानस्याऽपि विषयः परोक्षस्य गोः सादृश्यम्, तदुपाधिर्वा गौः । उभयथापि पूर्वप्रत्यक्षदृष्टस्य गोः सादृश्यं विशेष्यम्, विशेषणं वा नार्थक्रियासमर्थो विषयः । सामान्यस्य दूषयिष्यमाणत्वात् । कामिन्याः षण्ढरूपवैरूप्यवत् । पाकाद्यर्थक्रियार्थिनां न प्रार्थनीयः । ततश्च सोऽपि न प्रवृत्तिविषयभेदः सन् प्रमाणभेदमुपकल्पयति । वैलक्षण्यादिज्ञानवत्"

"नैयायिकोपमानं तु स्वभावहेतावन्तर्याति । तथाहि—यः शब्दो यत्र वृद्धैः प्रयुज्यते, सोऽसति वृत्त्यन्तरे तस्य वाचकः । यथा गोशब्दो गोरर्थस्य । [P2A|5|5] प्रयुज्यते चैष गवयशब्दो गोसदृशे प्राणिनीति तस्यैव वाचक इति ज्ञानमनुमानमेव ॥" इति ।

[तर्करहस्ये P2B|4|6, P2A|5|5]

एवञ्च—

'गवयपदं सप्रवृत्तिनिमित्तकम्, साधुपदत्वात्, गोपदवत्'—इत्यनुमानविधया गवयपदस्यार्थविशेषवाचकतामनुमाय लोकव्यवहारमुखेन गवयरूपार्थवाचकता सुसाध्येति प्रमाणान्तरकल्पना व्यर्थेति तदाकूतमाकूतितं भवति'।

३—अर्थापत्तिरपि नैव प्रमाणान्तरम् । तथाहि—अनुपपद्यमानेनार्थेन उपपादककल्पनम् अर्थापत्तिः । यथा रात्रिभोजनेन विना दिवा अभुञ्जानस्य देवदत्तस्य पीनत्वानुपपत्त्या अर्थापत्त्या तस्य रात्रिभोजनशीलता उपपाद्यते । सेयमर्थापत्तिः अनुमानान्तर्गतैव । तथाहि—देवदत्तोऽयं नक्तं भोजनशीलः, पीनत्वात् । इत्यनुमानविधा सुसाध्यैव । तथाहि तर्करहस्यकृत्—

"पीनो देवदत्तोऽकृतरसायनो दिवा न भुङ्क्ते—" इति वाक्यं विवक्षायां जायते । सा च क्षपाभक्षणविवक्षा सध्रीचीना सती पीनादिवाक्यं प्रकल्पयति करणगणप्रेरणया । अन्यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पीनोऽकृतरसायनो दिवेति पदद्वयमनादेयं स्यात् । स्वसन्ताने चैष विवर्त्तो व्युत्पत्तिसमये सम्प्रधारितः । अतः शब्दाद् विवक्षाविशेषानुमतौ "नक्तं भुङ्क्ते" इति वाक्यान्तरं स्थिरमेव विकल्पबुद्धिस्थमर्थान्तरं प्रथयदास्ते । प्रयोगदर्शनाऽभ्यासात् स्वयमप्येवं व्यच्छेदप्रतीतिर्भवतीति न्यायात् ॥" इति । [तर्करहस्ये P2A|5|5]

४—अनुपलब्धिरपि नैव प्रमाणान्तरम्, तस्याऽभावरूपत्वात् । अभावस्य च भावानुपलब्धिरूपतया व्याप्तिनियमसापेक्षत्वेनानुमानान्तर्गतत्वस्य सुवचत्वात् । तथाहि—इह भूतले घटो नाऽस्तीति ज्ञाने या घटानुपलब्धिः प्रमाणान्तरत्वेन परिकल्प्यते सा तु—

भूतलमिदं घटाभाववत्, विशिष्टबुद्धित्वात्, घटवद् भूतलमिति बुद्धिवदित्यनुमानेनैव गतार्था ।

तदेतदुक्तं सूत्ररूपेण तर्करहस्यकृता—"अभावः पुनरनुपलब्धिः । तदभावभावानुपल-[P2B|5|5] ब्धिप्रभवाभावसाधनेनानुमानमनन्वयादित्यादिनाऽपि युक्त्या अनुपलब्धीतरकचर्चिते व्यवहारसाधनादनुमानम् ॥" इति ।

[तर्करहस्ये P2A|5|5&P2B|5|5]

एवं प्रमाणषट्कवादिनां दार्शनिकानां मतं विमर्दयन्नयं तर्करहस्यकृत्—"यद्वाऽनुवृत्तिव्यावृत्तिबुद्धिग्राह्योपनयस्त्वयम् । तस्माद् गवादिवस्तु प्रमेयत्वाच्च गम्यताम् ॥" इति प्रमाणबहुत्ववादिनां कारिकामुद्धृत्य—"एतदयुक्तम्, भिन्नविषयत्वात् । लक्षणभेदाद्धि भवन्तः प्रमाणानां नानात्वं प्रतिपन्नाः । वयं पुनर्द्वैविध्यात् प्रमेयस्य प्रमाणद्वैविध्यमवबुद्ध्यामहे । तद् यदि लक्षणभेदान्नानात्वम्, षोढा न स्यात् ।"

[तर्करहस्ये P2B|3|7]

इत्युपक्रम्य—

उक्तञ्च युक्तिमता—

"दृश्यात् परोक्षे सादृश्यधीः प्रमाणान्तरं यदि । वैधर्म्यमतिरप्येवं प्रमाणं किं न सप्तमम् ? ॥" इति पूर्वाचार्यकारिकां समुद्धृत्य सादृश्यबुद्धिमूलकोपमानप्रमाणकल्पनवदेव वैधर्म्यमूलकापमानरूपं सप्तमं प्रमाणं किन्न कल्प्यत इति यं सुमहत् प्रहारं कृतवान् तस्य नाद्यापि निराकरणं केनाऽपि प्रमाणबहुत्त्ववादिना विपश्चिता कृतमित्यहो ! प्रखरता प्रहारस्य ।

५—सम्भवस्य प्रमाणान्तरता—

'सम्भवोऽप्यविनाभावित्वादनुमानमेव'

[प्रशस्तपाद० २।२८ पृ०]

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति वैशेषिकैरेव निराकृतेति नावश्यकं बहु विवेचनम्।

६—अनिर्दिष्टप्रवक्तृकं परम्परागतं वाक्यम्—इह वटे यक्षस्तिष्ठतीत्याद्याकारकम् यदैतिह्यसंज्ञकं प्रमाणानन्तरं कथितम्, तत्तु शब्दप्रमाणनिरसनेनैव निरस्तम्।

७—प्रयोजकाभिप्रायं स्मारयन्ती चेष्टाऽपि अनुमानान्तर्भूतमेव, न प्रमाणान्तरम्। अत्रानुमानम्—अयमेतद्विषयकाभिप्रायवान्, एतद्व्यञ्जकचेष्टाकर्तृत्वात्। यथा—अहम्, इत्येवम्। ततोऽर्थप्रत्यय इति स्पष्टमेव।

८—शब्दस्मारकः शब्दानुमापको वा रेखाविशेषो लिपिर्न प्रमाणान्तरम्, अपि तु अनुमानप्रमाण एवान्तर्भवति। अत्रानुमानं च—अयं घटमानयेति शब्दविषयकाभिप्रायवान्। घटमानय इति शब्दव्यञ्जकलिपिकर्तृत्वात्। यथा—अहम्, इति।

९—नवमप्रमाणरूपेण परिकल्प्यमानः शकुनं च दृष्टस्वलक्षणसामान्यविषयरूपपूर्ववदनुमानेनैव गतार्थमिति सर्वमवदातम्।

—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीमद्भागवतभाषापरिच्छेदः

श्रीचारुदेवशास्त्री

(२३ वर्षे १ अङ्कादनुवृत्तः)

कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ॥२।५।३४³·⁴॥

४. जीवयतीति जीव इति व्युत्पत्तिमाश्रित्येश्वरेऽर्थेऽस्य प्रयोगमाश्रयते । रूढिं तूपेक्षते । जीवतीति जीवः कर्तरि कः । शरीरेन्द्रियप्राणाद्यधिष्ठान आत्मा लोके जीवशब्देन गृह्यते । आक्रीडतेऽयं शब्दैः क्रीडनकैरिव ।

ददौ कृष्णाजिनं भूमिर्दण्डं सोमो वनस्पतिः ॥८।१८।१५¹·²॥

५. वनानां पतिः स्वामी सोमः । इहैव वनस्पतिरिति विशेषणं प्रयुक्तं कविना नवमर्थमुपजानता।

पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥१०।५८।४२³·⁴॥

६. परीप्सा त्वरा भवति, परित्राणेच्छा वा, न त्वीप्सामात्रम् । अयं तु योगमात्रसमाश्रयेणातिग्रहेच्छायां व्यवहरति ।'पर्याप्तिः स्यात् परित्राणम्' इत्यमरः । आचार्योऽपि 'अपादाने परीप्सायाम्' (३.४.५२) इति सूत्रे त्वरायामर्थे परीप्साशब्दं प्रयुङ्क्ते ।

श्यामं हिरण्यपरिधिम्······॥१०।२३।२२¹॥

७· हिरण्यपरिधिरिति पीताम्बरमाचष्टे । हिरण्यं हिरण्यवर्णः परिधिः परिधानमस्येति विग्रहः । परिधीयते परिवेष्ट्यतेऽयमनेन वेति व्युत्पत्तिलभ्येऽर्थे प्रयोगः । परिधिः परिवेष इति तु रूढिः । वेदेऽग्निं परितः स्थापिता यज्ञियतरोः शाखा अपि परिधय उच्यन्ते । परिधाने संव्याने त्वत्रैव पुराणे प्रयोगः ।

पूर्णचन्द्रकलामृष्टे कौमुदीगन्धवायुना ॥१०।६५।१८¹·²॥

८. अत्र कौमुदीशब्दः कुमुद्वत्यर्थे प्रयुक्तः । ज्योत्स्नादित्वं कल्पयित्वा मत्वर्थीयेऽणि कुमुदानि सन्त्यस्या इति व्युत्पत्तेः । रूढिस्त्वस्य चन्द्रिकायाम् । तत्र कुमुदानामियमिति कौमुदी । शैषिकेऽणि रूपम् ।

अस्थान उपसर्गयोगः

यद्यप्युपसर्गा द्योतकास्तथापि न सर्वं उपसर्गाः सर्वमर्थं द्योतयन्ति, किन्तर्हि कञ्चिदेव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कश्चित्। तत्रापि न निर्विशेषं यं कमपि धातुमुपादाय, किन्तर्हि धातुविशेषम्। अयमर्थः—धातुविषय उपसर्गप्रतिनियमोऽप्यस्ति, उपसर्गविषये च धातुप्रतिनियमः। यदाह—इङ् अध्ययने, प्रायेणायमधिपूर्वः, सम्पूर्वस्य ख्या प्रकथन इत्यस्य संख्यानेऽर्थे प्रयोगो नास्ति, न हि 'संख्याति' इति गणयतीत्यर्थे क्वचित्प्रयुज्यते, तत्रार्थे सम्पूर्वस्य चक्षिङ् एव प्रयोगादिति। तद्यथाऽऽङ् श्रृणोतिना युक्तस्तिष्ठतिना वा प्रतिज्ञानं द्योतयेन्न धात्वन्तरेण। उपेन सहचरितो जानातिरेवाद्यज्ञानमाचक्षीत न विदिः। तस्माच्छब्दशक्तिस्वाभाव्यं सम्यग् विभाव्य प्रयोगविषयतां च निपुणं निरूप्य प्रवर्तनीयं सन्दर्भशुद्धिमभीप्सता सुमेधसा। कवयस्त्वत्र बहुव्यत्यासमाचरन्ति, अयं च बहुतमम् इति सङ्ग्रहेण तमिह दर्शयामः—

सद्यः पुनन्त्युपस्पृष्टाः स्पर्धुन्यापोऽनुसेवया ॥१।१।१५[३-४]॥

१. उपस्पृष्टा इति पूर्वार्धगतेन मुनय इत्यनेनाप्यन्वयि। उपस्पर्श आचमनं भवति स्नानं वा। क्वचित्स्पर्शनमपि। प्रकृते तूपपूर्वः स्पृशिः सन्निधिमात्रेण सेवने वर्तते। तेनाऽस्थानेऽयमुपोपसर्गः।

अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ॥१।४।८[३-४]॥ इत्यत्र,

तावद्यूयमवेक्षध्वम्............ ॥१।१३।४६[२]॥

२. इत्यत्र चावपूर्व ईक्षतिः प्रतीक्षणे प्रयुक्तः। उदुपसर्गः प्रतिर्वा यमर्थं द्योतयतीति प्रतीतम्। न त्ववः।

स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥१।२।३३[३-४]॥

३. अत्र निर्विष्ट इति प्रविष्टेऽर्थे प्रयोगः।

शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥१।५।२३[४]॥

४. अत्रैकत्र स्थितिमिच्छतामित्यर्थं निर्विविक्षताम् इति पदेनाह। निःपूर्वो विशतिस्तु भोगे रूढः। अत एव कोषकारा 'निर्वेषो भृतभोगयोः' इति पठन्ति।

समाधिनाऽनुस्मर तद्विचेष्टितम् ॥१।५।१३[४]॥

५. विपूर्वश्चेष्टतिर्विरुद्धाचरणे वर्तते। तेन विरिह विरुद्धमतिक्रुदिति हेयः।

निरूपितो बालक एव योगिनाम् ॥१।५।२३[३]॥

६. निरूपित इति नियुक्त इत्यर्थेऽशक्तम्। निरूपणं लक्षणं भवति। रूपाद् दर्शने णिचो विधेः।

उपाहरद् विप्रियमेव तस्य तत् ॥१।७।१४[३]॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

७. पूर्ववाक्यगतेन शिरांसीत्यनेन उपाहरदित्यस्यान्वयः । अच्छिनदिति चार्थः । केवलो हरतिरलं तमर्थमभिधातुम्, उपाङ्पूर्वस्त्वर्थान्तरमाचष्ट इत्यस्थाने प्रकृत उपसर्गयोगः ।

ऋषीणां चानुशृण्वताम् ॥१।६।२५[४]॥

८. अत्रानुना नार्थः । अनुशृणोतिर्हि परम्परया श्रवणे वर्तते, यथाऽऽम्नायेऽर्थेऽनुश्रव इत्यत्र ।

आशंसमानः शमलम्...... ॥१।१३।३२[३]॥

९. आशङ्कमान इत्यर्थे प्रयोगः । आशंसते इच्छतीत्यनर्थान्तरम् ।

एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥१।१५।१[१-२]॥

१०. अत्र विकल्पान्पृष्ट इति विकल्पित इति शब्देनार्थमभिधित्सति ।

प्रत्याहृतं बहुधनं च मया परेषाम् ॥१।१५।१४[३]॥

११. अत्र प्रतिरुपसर्गोऽस्थाने । न ह्यत्र दत्तस्य प्रयाहरणं विवक्षितम्, येन प्रत्याङ्पूर्वो हरतिः प्रयोगमर्हेत् । आहृतमित्येव हृतमित्येव वा प्रयोज्यम् आच्छेदने समर्थम् ।

केन वा ते प्रतिकृतम् ... ... ॥१।१८।४०॥

१२. अपराद्धमपकृतम् इत्यर्थे प्रयुङ्क्ते । प्रतिपूर्वः करोतिस्त्वत्रार्थे नान्यत्र दृष्टः ।

उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥१।१९।१२[४]॥

१३. प्रगृहीतपाणिरिति तु रामायणादिषु बद्धाञ्जलिरित्यर्थे दृष्टः । अभेस्त्वत्रापूर्वः प्रयोगः । परमपूर्वता सर्वाङ्गीणा स्वलक्षणमस्य कवेर्वचसामिति न किमपि चित्रम् ।

आश्रुत्य तदृषिगणवचः परीक्षित् ॥१।१९।२२[१]॥

१४. श्रुत्वेत्यर्थो विवक्षितः । आङ्पूर्वः शृणोतिस्तु प्रतिज्ञानमाह । 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ते'ति (१।४।४०) सूत्रेऽपि स एवार्थः ।

शुद्धं च तत्रामृशताभियुक्ताः ॥१।१९।२४[४]॥

१५. आङ्पूर्वो मृशतिरिह विचारे प्रयुक्तः । अन्यत्राङ्पूर्व एष धातुः स्पर्शने स्पर्शनपूर्वक आच्छेदने वा प्रवर्तते । 'आमृष्टं नः परैः पदम्' इति कुमारे यथा ।

क्षेत्रज्ञ एतां निनयेत्तमात्मनि ॥२।२।१६[२]॥

१६. एतां (बुद्धिं) लीनां कुर्यादित्यर्थः । प्रायेण निपूर्वो नयतिरपामवसेचने, आवर्जने वोदभाजनस्य वर्तते ।

व्यत्यस्यतां यथाकामं वयसा योऽभिधास्यति ॥६।१८।३७[३-४]॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१७. अत्र व्यत्यस्यतामित्यस्य जरेत्युक्तं कर्म । अभिधास्यति अभितो धारयिष्यतीत्यर्थ इति श्रीधरः । अभिपूर्वो दधातिः क्वचिद् बन्धने वर्तते, यथाऽश्वाभिधानीमादत्त इत्यत्र । परमत्र बन्धनमर्थो न घटते ।

यन्नो भवान्संजानीते तस्मिंस्तिष्ठामहे वयम् ॥९।१६।३४[३-४]॥

१८. संजानीते मन्यत इति श्रीधरः । सम्पूर्वको जानातिरानुकूल्येन वृत्तावुत्कण्ठापूर्वके स्मरणे प्रतिज्ञाने वा वर्तते । अर्थान्तरे त्वस्य प्रयोगो न दृष्टः । 'संजानते न यतन्ते मिथस्ते' इत्यत्र ऋचि (७।७६।५[२]), मात्रा संजानीते, मातरं संजानाति, शतं संजानीत इत्यत्र यथाऽनुक्रमेण ।

दुष्टा दुर्विग्रहाः समासाः

समासेन वाक्यगतोऽर्थो यथातथं प्रतिपादनीयः, अन्यार्थत्वे तु दुष्यति स इति परिहरणीयः । वरं व्यासेनैव तदर्थो वचनीयः । सति सामर्थ्ये पदविधिः, सापेक्षमसमर्थं भवत्यन्यत्र नित्यसापेक्षादिति समासघटनायां विशिष्यावधेयम्भवति । अन्येऽपि सन्ति शास्त्रोदिताः समासाश्रया विधेयः, तेप्यनुवृत्याः । अत्र पुराणे समासविषयाणि शासनान्यसकृदतिक्रान्तानि । तमिमं शासनातिक्रमं समस्य विन्यस्यामः—

यो योगिनश्छन्दमृत्योः ॥१।६।२६[३]॥

१. इत्यत्र च्छन्दमृत्योरिति व्यधिकरणो बहुव्रीहिः । छन्देन स्ववशेन मृत्युर्यस्य, तस्येति विग्रहात् । इह पुराणे बहुलो व्यधिकरणो बहुव्रीहिः, शास्त्रकारेण तु 'अनेकमन्यपदार्थे' (२.२.२४) इति सूत्रयता प्रथमान्तानामेव बहुव्रीहिरनुशिष्टः, क्वचिदेव व्यधिकरणः समाश्रेय इति 'सप्तमीविशेषणे बहुव्रीहौ' (२.२.३५) इति सप्तम्यन्तस्य पूर्वनिपातं शासता ज्ञापितम् । न हि यत्तद्विभक्तिकं यत्किञ्चित्पदकदम्बकमन्यार्थे वर्तमानमिति बहुव्रीहिर्भवति । इहस्थानि कतिचिदपराणि व्यधिकरणबहुव्रीहेरुदाहरणान्युपन्यस्यामो निदर्शनाय—

दासीशता अपि विभोर्विदधुः स्म दास्यम् ॥१०।५६।४५[४]॥

२. दासीनां शतानि यासां ताः । सामानाधिकरण्ये तु शतदासीका इति स्यात् ।

यत्तेजसा नृपशिरोऽङ्घ्रिमहन्मखार्थे ॥१।१५।६[१]॥

३. नृपशिरःसु अङ्घ्रिर्यस्य, नृपशिरांस्यङ्घ्र्योर्यस्येति वा विग्रहः ।

···हृत्तापोपशमानि···गोविन्दाभिहितानि मे ॥१।१५।२७[४]॥

४. हृत्तापस्योपशमो यैरिति विग्रहः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वसद्गुणमाहात्म्यः ॥१।१२।२४॥

५. सर्वैः सद्गुणैर्माहात्म्यं यस्येति विग्रहः ।

…कुरुनार्यः...... । ववृषुःकुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥१।१०।१६[3.4]॥

६. प्रेमव्रीडास्मितपूर्वकमीक्षणं यासां ता इत्येवं विगृह्णाति श्रीधरः । शाकपार्थिवादित्वान्मध्यमपदलोपी समास इति च कल्पयतीति भाति । स्थितस्य गतिश्चिन्तनीया इत्येष यत्नोऽस्याभियुक्तस्य । न हि प्रकृतः समासः शाकपार्थिवप्रकारः ।

निर्वेदमूलो द्विजशापरूपः ॥१।१८।१४[3]॥

७. अत्र भगवान् स्वयमेव द्विजशापरूपो बभूवेति विवक्षति । निर्वेदमूल इति तु न स्पष्टम् । यद्येष बहुव्रीहिः कोऽन्यपदार्थः । पद्ये तु स शब्दतो नोक्तः । अथ तत्पुरुषः, परवल्लिङ्गतया निर्वेदमूलमितीष्यते ।

सर्वधीवृत्त्यनुभूतसर्व आत्मा ॥२।१।३९[1]॥

८. सर्वाभिर्धीवृत्तिभिरनुभूतं सर्वं यस्य आत्मैवेति विवक्षति । समासस्तु तमर्थं नार्पयति । सर्वाभिर्धीवृत्तिभिरनुभूतं सर्वं येनेति विग्रहात् । विग्रहवाक्यगत एवार्थः समासेन शक्यो वक्तुम्, नेतरः ।

नाहं न यूयं यदृतां गतिं विदुः ॥२।६।३६[1]॥

९. यस्य ऋतां गतिं न विदुरित्यर्थः । ऋतामिति गतिं विशिनष्टि । तेनेदं विशेषणम् । राज्ञः पुरुषः राजपुरुष इत्यत्र षष्ठ्यन्तं विशेषणमिति स्वीकारः । पुरुष इति च विशेष्यम् । प्रकृते तु यस्येति विशेषणम्, ऋतामिति च विशेषणम् । नहि द्वयोर्विशेषणयोः षष्ठीसमासः क्वचिदनुज्ञातः । सामानाधिकरण्ये तु कामं भवत्येकतरस्य विशेष्यत्वकल्पनयेति यदृतामिति दुष्टः समासः ।

देशान्नागायुतप्राणो वेलाकूलानमज्जयत् ॥१०।६७।५[3.4]॥

१०. वेलायाः कूले वर्तमानान् इति श्रीधरः । 'वेला स्यात्तीरनीरयोः'इत्यमराद्वेलेह नीरमाह । तथापि कः समासः, कश्च विग्रह इत्यन्तर्वाणयो निर्ब्रुवन्तु ।

अपाणिनीयाः प्रयोगाः

१. पुराणान्तरेषु यथाऽपाणिनीयाः प्रयोगाः प्रथन्ते तथात्रापि । इदमस्य तैः साधर्म्यम् ।-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्यत्र ते प्रवाहपतिता अकामतः कृताः, अत्र तु कामतः प्रकल्पिता इति तैरस्य वैधर्म्यम्। तत्र कांश्चिदेवोत्कटानसोढव्यानपप्रयोगानुदाहराम;—

युवैषतोत्स्रष्टुमहो सहासुभिः ॥१।४।११[४]॥

२. ऐच्छदिति वक्तव्ये ऐषतेत्यपाणिनीयम् ।

धान्वन्तरं द्वादशमं त्रयोदशममेव च ॥१।३।१७[१-२]॥

३. इत्यत्र 'नान्तादसङ्ख्यादेर्मट्' इति (पा, ५.२.४९) शास्त्रातिक्रमः। द्वादशं त्रयोदशमित्येव साधु ।

इति ब्रुवाणं संस्तूय ॥१।४।१[१]॥

४. पिति कृति तुकि संस्तुत्येत्येव साधु ।

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ॥ १।४।२५[४] ॥

५. अत्र श्रुतिगोचर इत्येव साधुः । श्रुतेर्गोचर इति विग्रहः । गोचरशब्दो घप्रत्ययान्तो नित्यं पुमान् ।

भिक्षुभिर्विप्रवसिते······॥ १।६।२[१] ॥

६. विप्रवसिते इत्यपशब्दः, विप्रोषिते इति तु शब्दः ।

सर्वधर्मविवित्सया ॥ १।६।१[२] ॥

७. विविदिषयेति तु पाणिनीयाः ।

प्रकृतिमगन् किल यस्य गोपवध्वः ॥ १।६।४०[४] ॥

८. अगमन्नित्येव तु पाणिनीयाः ।

स्वजीवमायां प्रकृतिं सिसृक्षतीम् ॥ १।१०।२२[२] ॥

९. शपि नित्येन नुमा सिसृक्षन्तीम् इत्येव रूपमिष्टम्।

आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥ १।११।३७[३-४] ॥

१०. पृङ् व्यायामे इति तौदादिकः, तेन शे प्रत्यये शानचि व्याप्रियमाणमिति स्यात् ।

किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विजाः ॥ १।१२।६[१-२] ॥

११. सुरैरपि स्पृह्या इत्यर्थः । रूपसिद्धिस्तु दुर्लभा ।

एको रथेन ततरेऽहमतीर्यसत्त्वम् ॥१।१५।१४[२]॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१२. अत्रोत्तमपुरुषे चित्तविक्षेपादिकृतं पारोक्ष्यमन्तरा लिट्प्रयोगो दुष्यति, आत्मनेपदं च। अतीर्यमिति शब्दरूपं चापि च्युतसंस्कृतिकम्। अतार्यमित्येव साधु।

मां श्रान्तवाहमरयो रथिनो भुविष्ठम् ॥१।१५।१७³॥

१३. अत्र भुविष्ठमिति दुष्यति। मूर्धन्यादेशविधेरदर्शनात्।

किं न वोचस्यसद्वृत्ते······॥६।१४।१२³॥

१४. वोचसीति वक्षि इत्यस्य स्थाने ब्रवीषीत्यस्य स्थाने वा प्रायोजि, तत्पाणिनीया न सहन्ते।

विना ते प्राणिनां शुचः ॥१।१७।८⁴॥

१५. विनायोगे षष्ठी नानुज्ञाता शास्त्रेण। षष्ठीप्रयोगो वर्तमानं हिन्दीव्यवहारं स्मारयति।

यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्ते साध्व्यसाधुभिः ॥१।१७।१०¹·²॥

१६. त्रस्यन्तीति तु युक्तम्। असाधुभिरिति तृतीया 'भीत्रार्थानां भयहेतुः' इति (पा० १.४ २५) शास्त्रमुच्चरते। यत्तु त्रस्यन्ते पीड्यन्त इत्यर्थ इति श्रीधरस्तन्न। त्रसी उद्वेग इति धातुरकर्मको णिचमन्तरेण सकर्मकतां नार्हति यातुम्। तथा सति त्रास्यन्त इति वक्तव्यं भवति।

द्वारपानां शुनामिव ॥१।१८।३२⁴॥

१७. द्वारपानामित्यत्र 'एकाजुत्तरपदे णः' (पा० ८.४.१२) इति णत्वं दुर्वारम्। लिपिकरप्रमादो वा स्यात्।

यन्नष्टनाथस्य वसो विलुम्पकात् ॥१।१८।४४²॥

१८. विलोपकादिति साधु स्यात्। सार्वधातुके शे नुम्विधेः।

ततश्च वः पृच्छ्यमिमं विपृच्छे ॥१।१९।२४¹॥

१९. पृच्छ्यं प्रष्टव्यमित्यर्थः। रूपं तु न सिध्यति। प्रच्छेर्ण्यति सम्प्रसारणदौर्लभ्यात्। तेन प्रच्छ्यमित्येव साधु।

विष्णोरिव सुरेतराः ॥१।१९।३४⁴॥

२०. सुरेभ्य इतरे इति सुरेतरे इति स्यात्। पूर्वपरादिष्वितरस्यापाठाज्जसि सर्वनामता न विभाष्यते। तत्पुरुषेण लभ्येऽर्थे बहुव्रीहिर्नाश्रयणीय इति सुरेतरा इत्यसमाधेयं शब्दरूपम्।

निवृत्ता विधिषेधतः ॥२।१।७²॥

२१. षेध इति प्रामादिकम्। मूर्धन्यादेशाप्रसङ्गात्। नेह प्रतिर्वा निर्वा तन्निमित्तमस्ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न श्रृण्वतः कर्णपुटे नरस्य ॥२।३।२०[३]॥

२२. शृणुत इति तु वाच्यम् ।

अगायत यशोधाम कीर्तन्यगुणसत्कथाम् ॥८।४।४[३·४]॥

२३. अत्र कीर्तन्यमित्यपशब्दः कीर्तनीयमित्येव तु शब्दः ॥

यस्य पीते वै जन्तुर्मृत्युग्रस्तोऽमरो भवेत् ॥८।६।२१[३·४]॥

२४. शुद्धे भावलक्षणे षष्ठीं प्रयुङ्क्तेऽयं कविः । तदस्य शीलम् ।

आभिषेचनिका भूमिराहरत्सकलौषधीः ॥८।८।११[१·२]॥

२५. ठकि ङीपि अभिषेचनिकीति स्यात् ।

तथा पुनीतास्तनुभिः पदैस्तव ॥८।१८।३१[४]॥

२६. अद्यत्वे हिन्द्यां पूतेऽर्थे पुनीतशब्दप्रयोगः प्रचरति प्रायेण । इह तु तस्य प्रयोगः परं कुतूहलं जनयति । अर्वाक्कालोऽयं कविः स्यात् ।

समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥६।१६।१५[३·४]॥

२७. मयटि टित्वान्ङीपि सुखमय्य इति स्यात् ।

किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥८।२२।६[२]॥

२८. 'हरतेरनुद्यमनेऽच्' (३.२.६) इति पाणिनीयं शासनं नादृतम् । रिक्थहरैरिति वक्तुमुचितम् । यथास्थिते तु रिक्थं (भारभूतं) हरत्युद्यच्छत इत्यर्थः स्यात् ।

प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलम्भते ॥८।२१।३३[३·४]॥

२९. विप्रलभते इत्येव साधु ।

अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥९।१।२१[३·४]॥

३०. अस्तौषीदित्यपशब्दः । 'स्तुसुधूञ्भ्यः परस्मैपदेषु' (७.२.७२) इति नित्यमिटि सिज्लोपेऽस्तावीदित्येव रूपमिति पाणिनीयाः ।

ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त माम् ॥९।१९।३५[५·६]॥

३१. ये यूयमित्यर्थः । अकुरुतेति वक्तव्येऽकर्तेत्युक्तिर्दुष्टा ।

एष ईशकृतो वीर = सम्बन्धो नौ न पौरुषः ॥९।१८।२१[१·२]॥

३२. पुरुषेण कृत इत्यर्थे पौरुषेय इत्येव युज्यते । 'सर्वपुरुषाभ्यां णढञौ' (पा० ५।१।१०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यत्र पठितेन 'पुरुषाद् वधविकारसमूहतेनकृतेष्वि'ति वार्तिकेन तेन कृते (ग्रन्थेऽग्रन्थे च) ढञो विधानात् ।

निर्विशन्ति घना यत्र ककुद्यचलशङ्कया ॥१०।३६।४[३-४]॥

३३. यथा भगवतः पाणिनेर्दर्शनं तथा ककुच्छब्दः स्वतन्त्रा प्रकृतिर्नास्ति ।

जघास हैयङ्गवमन्तरं गतः ॥१०।९।६[४]॥

३४. 'हैयङ्गवीनं संज्ञायाम्' (पा० ५.२.२३) इति निपातनाद् हैयङ्गवमसाधु ।

ध्मान्तः शृङ्गाणि केचन ॥१०।१२।७[२]॥

३५. धमन्त इत्येव युज्यते वक्तुम् । शपि धमादेशस्य दुर्वारत्वात् ।

वृत्तभङ्गभयाच्छब्दवैरूप्यम्

श्रीमद्भागवतकारः कविः 'अपि माषं मषं कुर्याच्छन्दोभङ्गं त्यजेद्गिरमि'ति मते स्थितो निर्विशङ्कं यत्र तत्र शब्दवैरूप्यमापादयति । छन्दोनुरोधाद् गुर्वक्षरं लघयति, लघु वा गुरूकरोति । अक्षरस्य द्व्यक्षरस्य वाऽऽवापोद्वापौ यथाकामं समाश्रयति । तदिह संक्षेपतो निदिदर्शयिषामः—

एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥१।३।२३[१]॥

१. विंशतितमे इति वक्तव्ये छन्दोनुरोधात्तशब्दं लुम्पति ।

नामानि रूपाणि मनोवचोभिः ॥१।३।३७[३]॥

२. 'आपं चैव हलन्तानाम्' इति वाचाशब्दस्य साधुत्वेऽपि वचेति त्वसाध्वेव । वृत्तं रक्षणीयमित्यत्राद्दतोऽसाधुत्वं नावेक्षते ।

वर्तमानो वयस्याद्ये तत एतदकारषम् ॥१।६।५[४]॥ इत्यत्र,

कथं प्रवृत्तः किमकारषीत्ततः ॥१।१०।१[४]॥ इत्यत्र,

सारथ्यपारषदसेवन० ॥१।१६।१६[१]॥

३. इत्यत्र चैकाक्षरावापश्छन्दो रक्षिष्यामीति कृतः ।

जितेन्द्रिया निर्जितमातरिश्वनः ॥१।१०।२३[२]॥

४. अत्र निर्जितमातरिश्वान इति प्राप्ते ह्रस्वत्वं छन्दोनुरोधात् ।

मर्त्यानामृतमिच्छताम् ॥१।१६।७[२]॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

५. मर्त्यानाममृतमिच्छताम् इति वक्तव्यमासीत्। छन्दोनुरोधादेकाक्षरलोपः। न च ऋतशब्द एवास्तु दोषप्रसङ्गवारणायेति वाच्यम्। अर्थासङ्गतेः। ऋतं हि सत्यं भवति। सत्यवचनेन ऋतशब्देन मोक्षो ग्रहणीय इति श्रीधरवचसि प्रमाणं मृग्यम्, न हि ऋतशब्दस्तत्रार्थे क्वचित्पठितः।

श्रुत्वा सुतविलापनम् ॥१।१८।३६[२]॥

६. अत्र च्छन्दोनुरोधाद् दीर्घो वा कृतः प्राकृतेऽर्थे विलपतेर्णिज्वोत्पादितः। विलापनशब्दो विलपनं तु नाचष्टे।

विचक्षणा यच्चरणोपसादनात् ॥२।४।१६[१]॥

७. उपसादनादिति ल्युडन्तस्य दीर्घमध्यो निर्देशश्छन्दोनुरोधात्। णिचोऽनर्थकत्वान्नेदं ण्यन्तस्य सदे रूपम्। उपसीदति, उपसन्नः, उपसेदिवान् इत्यादय उपपूर्वस्य सदेः प्रयोगाः प्रथन्ते। न चायं चौरादिकस्य सदेः प्रयोग इत्यारेकणीयम्। तस्याङ्पूर्वस्यैव प्रयोगनैयत्यात्।

पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥२।६।१३[३-४]॥

८. विद्याधरा इत्यचि प्रत्यये प्रतीतं रूपं विहायाप्रतीतं मूलविभुजादिकप्रत्ययान्तं प्रयुङ्क्ते छन्दो गोपायिष्यामीति।

निद्राक्षणोऽद्रिपरिवर्तकषाणकण्डूः ॥२।७।१३[४]॥

९. अत्र कषणशब्दे दीर्घश्छन्दोनुरोधात्।

सत्रे ममास भगवान् हयशीरषाऽथो ॥२।७।११[१]॥

१०. हयशीर्षा इत्येवं साधौ न्यासे वृत्तभङ्गं पश्यन्मध्य एकमक्षरं प्रक्षिपति वाचं च भ्रंशयति।

प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः ॥२।१।७[२]॥

११. षेधतः इत्यत्र च्छन्दोनुरोधादुपसर्गः परिहृतः, अक्षरलाघवाय। प्रतिरुपसर्गो निरुपसर्गो वा परित्यक्तः। एवं सति षेध इत्यानुपूर्वीकं शब्दरूपमेव नास्ति मूर्धन्यादेशदौर्लभ्यात्कुतः प्रतिषेधार्थप्रत्यय इति न गणयति वाचि स्वातन्त्र्यं तन्वानः कविः।

आयुश्च वेदमनुशास्त्यवतीर्य लोके ॥२।७।२१[४]॥

१२. आयुरिति शब्दरूपं चकारेण व्यवधत्ते वृत्तं गोपायिष्यामीति। आयूरूपं वेदमिति लक्ष्यार्थस्वीकारेऽदोष इति चेन्न। तथा पृथक्पदत्वे सति संज्ञाया अनवगमात्।

वणिक्पथा भिन्ननवो यथार्णवे ॥८।११।२५[४]॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१३. अनित्याः समासान्ता इति पक्षे कपोऽभावे भिन्ननाव इति स्यात्, 'गोस्त्रियोरुपसर्जनस्य' (पा. १.२.४८) इत्यत्र स्त्रीति स्त्रीप्रत्ययग्रहणान्नौरित्यस्य ह्रस्वत्वाप्रसङ्गात् । छन्दोभङ्गभीरुरयं कविरसमर्थश्च निरवद्यपद्यरचनायामित्यक्षरं ह्रसयति ।

आनिन्ये कलशं हैममवनेजन्यपां भृतम् ॥८।२०।१७$^{3\cdot4}$॥

१४. अवनेजनीनामपां भृतमिति श्रीधरः । पादावनेजनीरापो धारयञ्छिरसा नृप ॥१०।४८।१५$^{1\cdot2}$॥ इत्यतो ज्ञायतेऽवनेजनीशब्द एवाभिप्रेतः कवेः । तथापि पुंवद्भावो दुर्वार इति रूपासिद्धिः । पुंवद्भावे च भ्रंशते छन्द इति तमपहस्तयते ।

गावस्तदा गामनयन्पयोद्रुताम् ॥१०।२७।२५^{4}॥

१५. पयोद्रुतताम् इति वक्तव्ये छन्दोभङ्गभिया तकारमक्षरं लुम्पति ।

हस्ते गृहीत्वा भिषयन्त्यवागुरत् ॥१०।६।११^{4}॥

१६. भिषयन्तीत्यत्र ह्रस्वत्वं छन्दोभङ्गभयात् । परस्मैपदं त्वपभ्रंशः ।

पापे त्वं मामवज्ञाय यन्नायासि मयाहुता ॥१०।६५।२४$^{1\cdot2}$॥

१७. मयाऽऽहूतेत्यर्थः । अत्र च्छन्दोवशाद् ह्रस्वो विरुद्धमतिकृदिति चेतः परिखिन्ते ।

तमेव शरणं जग्मुः सकुटुम्बा जिजीषवः ॥१०।६८।४३$^{1\cdot2}$॥

१८. अत्र जिजीविषव इति वक्तव्ये जिजीषव इति च्छन्दोनुरोधादक्षरविलोपे रूपम् । श्रीधरस्त्वेतस्माद्रूपादुद्विजमानो जिजीविषव इति पठति, अक्षराधिक्यं च सोढव्यमिति चाचष्टे ।

बहुवक्तव्येऽस्मिन्काव्यात्मनि पुराणेऽविरतायामपि विवक्षायां व्यतिरिक्तेन वचसां विस्तरेण मा स्म ग्लासीच्चेतः सचेतसामितीहैव वाचमवसाययामः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

*श्रीमद्भागवतभाषापरिच्छेदविमर्शः

श्रीरामप्रसादत्रिपाठी, प्राचीनव्याकरणदर्शनागमविभागाध्यक्षो वाराणसेयसंस्कृतविश्वविद्यालयस्थः।

(२३ वर्षे १ अङ्कादनुवृत्तः)

४. उ०—अत्रेश इत्यध्याहृत्य, ईशः कालकर्मस्वभावोपाधिकः सन् जीवो भूत्वाऽजीवमचेतनमजीवयत् अवास्थापयत् इति रीत्या विमर्शे क्रियमाणे न कोऽपि दोषः।

५. उ०—वनस्पतिशब्दो योगरूढः। तत्र रूढ्यर्थबाधे योगार्थमात्रपरिग्रहः शक्त्या लक्षणया वा।

६. उ०—परीप्सा-सम्बन्धेच्छा, पर्याप्तिः सम्बन्धः। अतः परीप्सा-प्राप्तीच्छा, तन्मूलिकायां त्वरायां तु लाक्षणिकः। पर्याप्तिः प्राप्तिः सम्बन्धः। परित्राणस्य प्राप्तिकार्यत्वात् तत्र लक्षणा, कोशोऽपि लाक्षणिकार्थानुशासनमेव।

७. उ०—परिधिशब्दो योगरूढः। तत्र रूढ्यर्थबाधे योगार्थपरिग्रहः पूर्ववत्।

८. उ०—अत्राऽप्यव्यवहितपूर्ववत् समाधानम्।

अस्थाने उपसर्गयोगः

१. उ०—उपसृष्टा इति यौगिकम्। न चोपसर्गधात्वर्थयोरत्र बाधो दृश्यते। किं चोपसृष्टा इति न मुनय इत्यस्य विशेषणमपि तु स्वर्धुन्याप इत्यस्य। मुनयस्तु अनुसेवया सन्निधिमात्रेण सेवया सद्यः पुनन्तीतियोजनयाऽपि न काचन क्षतिर्लक्ष्यते।

२. उ०—प्रतीक्ष्यस्य कालस्यानागमनेन अवसन्नः सन् तत्प्राप्तिमीक्षते इत्येवं प्रतीक्षार्थलाभः। किंच यथा—अनेकार्था धातवस्तथैव निपाता अप्यनेकार्था इति अवोपसर्गस्याऽपि तदर्थे न काचन बाधा, प्रयोगोपलब्धौ यत्नः क्रियताम्।

३. उ०—पूर्वं संहारकाले निष्क्रान्तः पश्चात् सर्गकाले च प्रविष्टः इत्यर्थे निविष्ट इत्यर्थोऽर्थप्रकरणाभ्यां लभ्यते।

४. उ०—एकत्र स्थित्वा भोगमिच्छतामित्यर्थो लक्षणया करणीय इति नाऽस्ति काचनाऽनुपपत्तिः।

५. उ०—विलक्षणं विशिष्टं वा चेष्टितमित्यर्थः कुतो न?

---

* उत्तरपक्षपरोऽयं लेखः—सं०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

६. उ०—योगिनां दासत्वेन निरूपितो बोधितो मात्राऽन्येन वा इत्यर्थः प्रकरणात्। किञ्च दर्शनं चाक्षुषमेवेति को नु स्वीकुर्यात्?

७. उ०—छित्त्वा स्वसमीपमानयत्, दुर्योधनाय उपाहृतवान् वा इत्यर्थे न किञ्चिद् बाधकम्।

८. उ०—युधिष्ठिरस्य पश्चादुपविश्य शृण्वतामित्यर्थः। प्रष्टृत्वेन युधिष्ठिरोऽग्रे उपविष्टः। अत्र महाभारतं शान्तिपर्व दृश्यताम्।

९. उ०—आशंसायां भूतवच्च, आशंसा सम्भावना, आशंसमानः सम्भावयमानः।

१०. उ०—विकल्प्य पृष्टः विकल्पितः। विकल्पपूर्वके प्रश्ने लक्षणा, विकल्पे शक्तिः।

११. उ०—अत्र प्रतिशब्दोऽनर्थको वाक्यालंकारे, अर्थगोपनाय च।

१२. उ०—प्रतिकूलं कृतमिति व्याख्यायां कथं नेष्टं सिध्यति? इति विजानन्तु सहृदयाः।

१३. उ०—अभिमुखं गृहीतौ बद्धौ पाणी येन स तथोक्तः। धातूनामनेकार्थकत्वाद् गृह्णातिर्बन्धने बोध्यः।

१४. उ०—आ सम्यक्तया आदरेण श्रुत्वा इत्यर्थे न कश्चन दोषः।

१५. उ०—कुमारः प्रयोगे प्रमाणम्, भागवतं व्यासो वा न प्रमाणमिति वचनं कथं रोचते? किञ्चातिशयेन मृशत विचारयत इत्यर्थे का हनिः?

१६. उ०—निपूर्वो नयतिः प्रायेणापामवसेचनेऽन्यत्र वर्ततां नाम। अत्र तु नितरां नयेत् प्रापयेदित्यर्थः संघटते।

१७. उ०—अत्राभिधानी जिह्वा, अभिधानसाधनत्वात्। मम जराऽस्तु इति योऽभिधास्यति, तस्य वयसा मम जरा व्यत्यस्यतामिति योजनया इष्टसिद्धिः कार्या।

१८. उ०—अस्माकं हिताय सम्यग् जानीते इत्यर्थः। श्रीधरोक्तिः फलितार्थपरा अर्थान्तरस्य बाधे तन्न युक्तम्। किं चेदं भागवतमेवात्रार्थे कथं न प्रमाणम्? व्याकरणविरोधोऽपि अत्र न।

दुष्टा दुर्विग्रहाः समासाः

१. उ०—आप्तप्रयोग एव व्यधिकरणबहुव्रीहेः साधुत्वे मूलम्। किञ्च छन्दः स्ववशित्वमस्ति यस्य स छन्दः स्ववशीभूतो मृत्युर्यस्येति "अर्श आद्यजन्तेन" छन्दशब्देन समानाधिकरण एव बहुव्रीहिः, कोऽत्र विरोधः?

२. उ०—समुद्राभ्राद्घ इत्यादिनिर्देशैः पूर्वनिपातप्रकरणस्यानित्यत्वज्ञापनेन समानाधिकरणबहुव्रीहौ न किमपि बाधकम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

३. उ०—नृपाणां शिरोभूतस्य जरासन्धस्याङ्घ्रिमहन् अभिनत् तवानुज इत्यर्थे का विप्रतिपत्तिः ?

४. उ०—व्यधिकरणबहुव्रीहिरपि क्वचित्साधुरेवेति पूर्वमुक्तमेव। किं वा हृत्तापमुपशमयन्तीति कर्मण्यणि षष्ठीतत्पुरुषो बोध्यः।

५. उ०—सर्वे सद्गुणा यत्र तत्सर्वं सद्गुणम्, तादृशं माहात्म्यं यस्य सः। आधारवृत्तिगुणानामाधेये आरोपः।

६. उ०—प्रेमव्रीडास्मितसहितानि वीक्षणानि यासामिति विग्रहः। पूर्वपदस्य स्वार्थसहिते तत्पूर्वके वा लक्षणा। शाकपार्थिवादिविधिरपि लक्षणाप्रकार एव।

७. उ०—अर्धर्चादितया लोकाश्रयत्वेन लिङ्गविधायकवचनस्याशिष्यतया वा इष्टं साधनीयम्। किं वा निर्वेदो द्विजबालकस्यान्तर्ग्लानिर्मूलं कारणं यस्य प्राप्यस्य प्राप्तौ स इति बहुव्रीहौ भगवानेव प्रापणीयः सन्नन्यपदार्थः संघटते।

८. उ०—स आत्मा सर्वधीवृत्त्यनुभूतसर्वोऽस्तीति योजनायां न दोषः। अथवाऽनुभूतितद्वतोर्भेदपक्षमाश्रित्य विग्रहः। समासे कृते तु वृत्तिमाहात्म्येन तात्पर्यविषयार्थविवक्षाबलेन चानुभूतिस्वरूपतात्मनि स्वीकर्तुमुचिता। नहि सर्वत्र समासे विग्रहवाक्यगता एवार्थाः प्रतीयन्त इति नियमः, मण्डपः, कुशलः, इत्यादिषु व्यभिचारात्।

९. उ०—ये न ऋतां गतामधिष्ठितां गतिं गन्तव्यस्थानं न विदुरिति योजनायामत्र तृतीयातत्पुरुषः। देवदत्तकृतोऽयं घट इतिवत्। षष्ठी तु फलितार्थपरतया नेया।

१०. उ०—वेला समुद्रसमीपस्थं जलं तस्य कूलान् कूलगतान् देशान्। कूलशब्दस्य कूलगते देशे लक्षणा। उभयलिङ्गश्चायं शब्दः।

अपाणिनीयाः प्रयोगाः

१. उ०—पाणिनेः प्राग्भवानामाचार्याणामपाणिनीयशब्दप्रयोक्तृत्वं न दोषः। उच्यते च वाक्यपदीयटीकायां द्वितीयकाण्डे श्रीहेलाराजेन पाणिनेः पूर्वं न्याङ्कवमिति प्रयुञ्जते स्म, तदुत्तरकाले नैयङ्कवमिति। काशिकाकृताऽपि—भूवादयः १।३।१ इतिसूत्रे—

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः॥ इत्युक्तम्।

तत्रैव न्यासकृताऽपि—"यथा वेदे त्रियम्बकं यजामहे, इत्यत्र यकारस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दृष्टप्रयोजनं नाऽस्ति इत्यदृष्टार्थो धर्मार्थं एव पाठस्तस्य, तथेहाऽपि वकारस्य" इत्युक्तम्। एवं च पौराणिकानां प्रयोगाणामपाणिनीयत्वेऽपि न काचन क्षतिः। उक्तं च शिष्टैः—

यान्युज्जहार माहेशाद्, व्यासो व्याकरणार्णवात्।
तानि किं पदरत्नानि मान्ति पाणिनिगोष्पदे॥ इति॥

तथाऽपि पाणिनीयदृशाऽपि समाधाने प्रयत्यते।

२. उ०—ईष गतिहिंसादर्शनेषु इत्यात्मनेपदिनो धातोः 'धातूनामनेकार्थत्वाल्लक्षणाया' वा प्रयोगः। व्यासप्रयोगादिच्छार्थेऽप्ययम्, उपलब्धौ यत्नः क्रियताम्।

३. उ०—पाणिनेः प्राग् द्वादशमं त्रयोदशममिति प्रयुञ्जते स्म। न्याङ्कवत्। किञ्च द्वादश-संख्यया त्रयोदशसंख्यया मीयते परिच्छिद्यत इत्यर्थे बाहुलकात् कर्मणि घञर्थे क-विधानं माङ् मान इत्यतः।

४. उ०—भ्वादेराकृतिगणत्वाद्दीर्घान्तोऽपि स्तुत्यर्थकः स्तू-धातुः कल्पनीयः, तस्यायं प्रयोगः। यथा चुष पाने इति लघूपधं कल्पयित्वा चोष्यशब्दस्य निर्वाहः!

५. उ०—श्रुतिः श्रोत्रं स्वकर्मकश्रवणसाधनत्वेन गोचरः सम्बन्धी यस्याः सा। गोचर-शब्दो विषये शक्तः, सम्बन्धिनि लाक्षणिकः। लक्षणाप्रयोजकः सम्बन्धस्तु-स्ववृत्त्य-साधारणधर्मव्यापकधर्मवत्त्वरूपः। असाधारणधर्मो विषयत्वं तद्व्यापको धर्मः सम्बन्धत्वम्।

६. उ०—वस आच्छादाने इत्यादादिकस्य वसु स्तम्भे इति दैवादिकस्य वा उपसर्गवशाद-र्थान्तरे वृत्तिः, धातूनामनेकार्थत्वाद्वा।

७. उ०—विद विचारणे इत्यस्यायं सन्नन्तः प्रयोगः। सर्वधर्मविचारणेच्छया इत्यर्थः।

८. उ०—अक्षरच्युतकरूपया प्रहेलिकयाऽर्थनिगूहनाय पठितम्। अगमन्नित्येवास्माभिरवगन्त-व्यम्। अक अग कुटिलायां गताविति भौवादिकस्य वालङ्कारे एतद्रूपम्। आगम-शास्त्रस्यानित्यत्वादाडागमः, इकोयणचीत्यादौ णुडभावो यथा।

९. उ०—स एव भूयो निजवीर्यचोदितां स्वजीवमायां जगत्प्रकृतिम्—ईम् लक्ष्मीरूपाम् ईवर्ण-वाच्यां सिसृक्षति। सृष्ट्वा च अनामरूपात्मनि रूपनामनी विधित्समानः शास्त्र-कृद् वेदकृदीश्वरस्तामनुससार—तत्सृष्टकार्येषु प्रविष्ट इति पूर्णश्लोकव्याख्याने न किञ्चिद् विक्रियते।

१०. उ०—व्यापृणतेर्वनिप्, उपसर्गबलादर्थान्तरे वृत्तिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

११. उ०—स्पृह्यन्ते इति स्पर्हास्त एव स्पार्हाः। यद्वा स्पर्हणं स्पर्हः स्पृहा, तस्येमे विषयाः स्पार्हाः, तस्येदमित्यण्। किं वा स्पृहाया एवेमे इत्यर्थे स्पृहाशब्दादेव तस्येदमित्यण्, आद्यचो वृद्धिः। स्पृहायां भवा इत्यर्थे तत्र भव इति वाण् बोध्यः।

१२. उ०—तीरमर्हति तीरं लब्धुं योग्यं भवतीति तीर्यम्, न तीर्यमतीर्यम्। अतीर्याणि सत्त्वानि गजमनुजवाजिनो यस्मिन् तम्। गोरक्षपुरे गीतायन्त्रालयेन प्रकाशिते मूलपुस्तके तु अतार्यसत्त्वमित्येव पाठः।

तॄञ् प्लवनतरणयोरित्यस्य लिटि रूपं ततरे इति भ्वादेराकृतिगणत्वाद् भ्वादिरयम्। निरनुबन्धकग्रहणपरिभाषया तॄफलेत्येत्वं न. पारोक्ष्यं तु चित्तविक्षेपादिना समुचितमेव, तस्मिन्नवसरे अर्जुनस्यात्यन्तं प्रकृतिवैरस्यात्।

अथवा भगवद्वैभवेन मया तरणं कदा कृतमित्यहमपि (अर्जुनोऽपि) ज्ञातुं न शक्त इति भूतकालस्य परोक्षत्वं सम्पन्नमेवेति। लिटि न काचन बाधा। एवमेव व्यातेने किरणावलीमुदयन इत्यादयोऽपि प्रयोगाः दार्शनिकमूर्धन्यानां निर्बाधो बोध्यः।

१३. उ०—सुषामादेराकृतिगणतया साधु।

१४. उ०—भ्वादेराकृतिगणत्वात् वुच भाषणे इत्यस्य भ्वादित्वम्। अथवा उच समवाये इति दैवादिकस्य बहुलमेतन्निदर्शनमिति गणकार्यमनित्यमिति वाऽश्रित्य तुदादित्वकल्पनया उचसि इति रूपम्। धातूनामनेकार्थत्वान्नार्थासंगतिः।

१५. उ०—पृथग्विनेति सूत्रे तृतीयाश्रुतौ पञ्चमी तु मण्डूकप्लुत्याऽनुवर्तते। द्वितीया तु सन्निहितैव। अन्यतरस्यामिति तु विकल्पार्थकम्। अत एवाग्रेऽनुवृत्तस्य तस्य विकल्प एवार्थः, समुच्चयार्थकत्वं तु तस्य न दृष्टम्। तेन विभक्तित्रयस्याभावे यथाप्राप्तं षष्ठी।

अथवा दर्शनमित्यध्याहृत्य ते दर्शनं विना प्रणिनां शुचः—इति योजना कार्या।

१६. उ०—त्रसी उद्वेगे इति अन्तर्भावितण्यर्थतया सकर्मक इति तस्यैव वैकल्पिकश्यनि सतीदं रूपम्। भयहेतुत्वाविवक्षया करणत्वविवक्षया असाधुभिरिति तृतीया साध्वी।

१७. उ०—लिपिकरस्यायं प्रमादः प्रतीयते। अथवा द्वारं न पायन्ति शोषयन्तीति द्वारपाः। मध्ये नञो व्यवधानेन पदव्यवायेऽपि इति णत्वनिषेधः। अथवा द्वारि अः, द्वारः,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्राकारो न वासुदेवोऽपि तु लक्षणया गृहस्वामी तदीयं वस्तु च, तं पान्तीति द्वारपाः ।

१८. उ०—अनुपसर्गाल्लिम्पविन्दति सूत्रेऽनुक्तसमुच्चयार्थेन चकारेण लुप्लृ छेदने इत्यस्य संग्रहः, अनुपसर्गादित्यस्य च तत्राऽसम्बन्धः । विलुम्प एव विलुम्पक इति ।

१९. उ०—षिद्भिदादिभ्योऽङ्, इत्यत्र भिदादिगणे प्रच्छेः पाठेनाङि सति पृच्छा इति, तामर्हतीति पृच्छयः, तदर्हतीति यत्प्रत्ययः ।

२०. उ०—सुरान् इतरयन्तीति कर्मण्यणि तत्पुरुष एव न तु भवदनभिप्रेतो बहुव्रीहिः ।

२१. उ०—प्रतिषेधशब्दे विनाऽपि प्रत्ययमिति प्रतिशब्दलोपं कृत्वा जातसंस्कारो न निवर्तत इत्यभ्युपगम्य समाधेयम् । निमित्ताऽपाये नैमित्तिकस्याऽप्यपाय इति न्यायस्तु नात्राश्रीयते, लक्ष्याऽनुरोधेन न्यायानां व्याकरणे व्यवस्थितत्वात् । सुषामादित्वाद् विधिशब्देकारमेव निमित्तीकृत्य षत्वसम्पादनं वा ।

२२. उ०—विषयगीतानि साभिलाषं शृण्वतो नरस्य ये कर्णपुटे उरुक्रमविक्रमान् न शृणुतस्ते कर्णपुटे न किन्तु विले इत्यध्याहृत्य योजनायां सम्प्रदायैकवेद्यायां न दोषलेशः ।

२३. उ०—कीर्त्तनमर्हन्तीति कीर्तन्या इत्यर्थे न कोऽपि दोषः । अथवा कीर्तने साधव इति कीर्तन्याः ।

२४. उ०—यस्य पीतस्य वै जन्तुरिति पाठो वर्तते । भवदुल्लिखिते पाठे तु सप्ताक्षरः पादः । तथा चाश्रय इति प्रथमान्तं पदमध्याहार्यम् । पीतस्येति कर्मण्येव क्तो न तु भावे ।

२५. उ०—आ अतिशयेन अभिषिच्यते याभिस्ता अभिषेचन्यस्ता एवाभिषेचनिकाः । आभिषेचनी-शब्दात् स्वार्थे कनि केऽण इति ह्रस्वः ।

२६. उ०—पुण्यतां नीता इति वक्तव्येऽर्थनिगूहनायात्र शास्त्रेऽश्राद्धानामश्रद्धादृढीकरणाय च प्रहेलिकया पठितमक्षरच्युतकरूपया । अथवा पवनं पूः, सम्पदादित्वाद्भावे क्विप्, तां नीताः पुनीताः, ङ्यापोः संज्ञा छन्दसोरिति पूर्वपदह्रस्वो बाहुलकात् । अथवा पुनातेर्भावे औणादिको डुप्रत्ययः ।

२७. उ०—अत्र स्वरूपार्थे मयट्प्रत्ययप्रतिरूपको मयशब्दः । मात्रच्प्रत्ययप्रतिरूपकमात्र-शब्दवत् । अथवा सुखं मयन्ते इत्यर्थे गत्यर्थकान् मयधातोः पचाद्यचि तत्पुरुषे टापि सति अस्य साधुता बोध्या ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२८. उ०—रिक्थमुद्यम्य येऽन्यत्र हरन्ति ते रिक्थहारा दस्यवः, अन्ये तु रिक्थहराः।

२९. उ०—न्याङ्कवशब्दवत्समाधेयम्। अथवाऽऽकृतिगणतया लम्भधातुः कल्पनीयः।

३०. उ०—अत्राऽपि न्याङ्कवशब्दवत्समाधानम्। अथवा आगमशास्त्रमनित्यमिति। अथवा भ्वादेराकृतिगणतयास्तु धातुर्निरनुबन्धः परस्मैपदी स्वतन्त्र एव कल्पनीयः।

३१. उ०—कृन्ततीति कर्ता हिंसकः, न कर्ताऽकर्तः। सचासावहं चेत्यकर्ताहम्, तमकर्तमाम्, अहिंसकं मामित्यर्थः। अकुरुत इत्यध्याहारः। अथवाऽऽकर्तं मिमीते आत्मानमहिंसकं प्रमिमीते योऽसौ अकर्तमाः, मिमीतेः क्विप्, एम्भूतं मां वीरवन्तमकुरुतेति योजना।

३२. उ०—पुरुषस्यायं पौरुष इति तस्येदमित्यणि निष्पत्तौ न काऽप्यनुपपत्तिः।

३३. उ०—न ह्येतत् पाणिनिना प्रतिज्ञातम्, अपि तु मादुपधायाश्च मतोर्वोऽयवादिभ्य इत्यत्र यवादिगणे "ककुद्"शब्दः साक्षात्पठितः सन् स्वीयं स्वत्वमवद्योतयत्येव। यदि स्वतन्त्रं प्रयुज्यमानोऽयं शब्दो न स्यात्तदा कथंकारं मतुप्प्रकृतितया व्यवहृतः स्यात्।

३४. उ०—शब्दानां नित्यत्वपक्षे ह्योगोदोहशब्दवद् हियङ्गुशब्दोऽप्यस्तीति विज्ञायते। तस्माद् इदमर्थेऽणि इदं साधु।

३५. उ०—शब्दनित्यत्वरक्षायै ध्मा इति धम इति च धातुद्वयं स्वीकार्यम्। तत्र ध्मा धातोः शतरि ध्मान्त इति सिध्यति। धमन्त इति धम धातोः। शिति परे धमतेः प्रयोगनियमस्तु व्यासकाले नासीत्। नहि तदानीं पाणिनिरभूत्। न्याङ्कवत्समाधेयम्।

वृत्तभङ्गभयाच्छब्दवैरूप्यम्

१. उ०—विंशतिसंख्यया मा परिच्छित्तिर्यस्यासौ विंशतिमः।

२. उ०—मनोवचोभिरिति पाठ उपलभ्यते गोरक्षपुरीये संस्करणे। एवं च वचाभिरिति पाठो यन्त्रचालकप्रमादादिति निश्चेयम्।

३. उ०—इयादिः पादपूरणे, यथा वेदे तथा लोके। वेदे यथा वरेणियमिति, लोकेऽपि यथा महाकविः कुमारे "त्रियम्बकं संयमिनं ददर्श" इति। एवमेतत्सर्वं समाधेयम्।

अथवा कारं स्यति साययति (अन्तर्भावितण्यर्थः) समापयतीति कारषः, सुषामादित्वात् षत्वम्। कारष इव अचारीत् अकारषीत् कार्यं समाप्तवानित्यर्थः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवमेव कारष इवाचरम् अकारषम् इति भवति ।

सीदतीति सदः पचाद्यजन्तः, पारे सदः, पारस्य सद इति वा तत्पुरुषः सुषामादित्वात् षत्वम् ।

४. उ०—निर्जितमातरिश्वन इति न बहुव्रीहिः सूरिविशेषणम् । अपि तु कर्मधारयस्य शसि रूपम् । निर्जितान् वातानित्यर्थः । मनःसमाधानाय निरुध्य इति च अध्याहार्यम् । अर्थनिगूहनं मत्यैव, अश्राद्धजनमोहनाय । अत एव "विद्यावतां भागवते परीक्षा" इति पुनः पुनः स्मर्तव्यम् ।

५. उ०—ऋत शब्दस्य सत्यवाचिनो नित्यविशेषे मोक्षे लक्षणेति श्रीधराऽभिसन्धिः । ऋतशब्दोऽत्र सत्यवाची, सत्यं चात्र ब्रह्म । सच्च त्यच्चाभवदिति श्रुतेः ।

६. उ०—सुतस्य विलपनकारकं वचः श्रुत्वेत्यर्थः । ण्यर्थसंघटने कथं न णिच् उत्पद्येत ?

७. उ०—अत्र ण्यन्ततायामपि ण्यर्थस्याविवक्षा, दृष्टा च ण्यर्थस्याऽविवक्षा णेरणाविति सूत्रोदाहरणे सर्वसम्मता च । एवमुपसादनादित्यत्राऽपि ण्यर्थस्याविवक्षा । अश्राद्ध-मोहनाय चायं प्रयोगः ।

८. उ०—अश्राद्धजनेषु अर्थं गोपायिष्यामीति तु वक्तुमुचितम्, अयं प्रयोगस्तु नापाणिनीयः । महीध्रः, कुध्र इत्यादिवत् ।

९. उ०—कष् धातोः लिटः कानच् । कानचश्छान्दसत्वं तु कवयो नाद्रियन्ते । अत एव कौमुद्यामुक्तम् "कवयस्तु बहुलं प्रयुञ्जते" इति । उदाहृतं च "तं तस्थिवां-सं नगरोपकण्ठे" इति, अधिजग्मुष इत्यादि च कालिदासवाक्येषु । तत्त्वबोधिन्यां च गतानुगतिकतयेत्युक्तम् । तथा च कवीनां सम्प्रदाय इत्यायातम् । अत एव लिटः कानज्वा इत्यत्र छन्दसीति नानुवर्तत इति मन्यन्ते कवयः । तथा च "यस्य गोत्रं विधारयतो निद्रैव क्षण उत्सवोऽभूत्, अद्रिपरिवर्तन च स्वपृष्ठं कषाणस्य कण्डूरभूत्" इति योजनायां न कोऽपि दोषः । अथवा कषणं कषः (घञर्थे कः) कषमानयतीति विग्रहे अन प्राणने इत्यस्मादण् कर्मणि करणीयः ।

१०. उ०—त्रियम्बकवत्समाधातुमर्हम् । अथवा शयनं शीः भावक्विबन्तः, हये शीर्यस्यासौ हयशीः, ईरणमीरः गतिविशेषः, तं सनुते ददातीति ईरषा, सनोतेः क्विप् सुषामादित्वात् षत्वम् । हयशीश्चासौ ईरषा चेति कर्मधारयः ।

११. उ०—विधिषेघत इति प्रागेव समाहितम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१२. उ०—च शब्दस्त्वर्थे। आयुःसंज्ञकस्तु लोकेऽवतीर्य वेदमनुशास्तीत्यर्थे तु न कोऽपि दोषः।

१३. उ०—चित्रगुरित्यत्र न गोशब्दस्य ह्रस्वत्वे कृते गुशब्दः, किन्तु गुशब्दोऽपूर्व एव गोशब्दस्य प्रसङ्गे प्रयुज्यते यथा, तथैव नौशब्दवन्नुशब्दोऽप्यस्ति तदर्थकः। अतएव नपुंसके सुनुना-सुनावा, इत्यादयः प्रयोगाः। अयं च शब्दनित्यत्ववादो मुनित्रयसम्मतः। सिद्धे शब्दार्थसम्बन्ध इत्यत्र भाष्यवार्तिककृतोः सम्मतिः। सर्वे सर्वपदादेशा इति पाणिनेरपि सम्मतिर्विज्ञायत एव।

१४. उ०—अवनेजनीशब्दः शुद्धिसाधनजले रूढो नित्यस्त्रीलिङ्ग इति विज्ञायते, एतत्प्रयोगात्। अयं च महाकविर्न छन्दोभङ्गभीरुर्नापि निरवद्यपद्यरचनायामसमर्थः, महाभारतादिमहाग्रन्थप्रणेतृत्वात्। अयं च न महाभारतकर्तुरन्योऽविच्छिन्नप्रसिद्धिविरोधात्। भगवति भगवच्चरिते चाश्राद्धान् प्रति अर्थनिगूहनाय तेषां बुद्धिव्यामोहाय चैषः प्रयोगः।

१५. उ०—भावप्रधानोऽयं निर्देशः, यथा बहुषु बहुवचनमिति व्याकरणकर्तुः पाणिनेः।

१६. उ०—चुरादिगणान्ते बहुलमेतन्निदर्शनम् इत्युक्तम्, अदन्तधातुनिदर्शनमिति च व्याख्यातं कौमुद्याम्। तेन मिष इति अदन्तो धातुरत्र बोध्यः। अथवा अभिपूर्वकात् सिञ् बन्धने इत्यस्माद् अभिसिनोति अभितो बध्नाति या सा अभिषया, पचाद्यच्, सुषामादित्वात् षत्वम्। अभिषया इवाचरन्ती अभिषयन्ती, आचारे क्विप्, शतृप्रत्ययः, ततो ङीष्। वस्तुतः सा भगवतीयं बन्धनं नेच्छति, अपितु बन्धनकर्त्री इव आचरतीत्यर्थसंगतिरप्यत्र व्याख्याने सौष्ठवमेति।

१७. उ०—आङ्पूर्वस्य जुहोतेः उपसर्गवशादर्थान्तरे वृत्तिः धातूनामनेकार्थत्वात्।

१८. उ०—भ्वादेराकृतिगणत्वाद् जिस् जीवने धातुर्बोध्यः। निरनुबन्धकपरिभाषया सन्लिटोर्जेरिति न कुत्वमिति शम्।

अन्ते चेदमवधार्यताम्

इदं भागवतं नाम पुराणं मुनिना कृतम्।
श्रद्धया सम्प्रदायेन पठितव्यं मनीषिभिः॥ १॥
आभासन्तेऽत्र ये दोषा न ते वस्तुगतिं गताः।
अश्राद्धजनमोहाय, मत्यैव विहिता यतः॥ २॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अष्टादशपुराणानां कर्ता भारतकृत्प्रभुः ।
वेदान् व्यस्यन् कथं नाम दुष्टां वाचमुदीरयेत् ॥ ३ ॥
व्यासो भागवते नैव परः कर्तेति ये विदुः ।
निह्नुवानाः प्रसिद्धिं ते कथं श्रद्धेयवाङ्मयाः ॥ ४ ॥
प्रसिद्धिरेव लोकेऽस्मिन् जातिवंशप्रसाधनी ।
सर्वमान्या मता लोके नावमन्येत तां बुधः ॥ ५ ॥
न ह्यमूला प्रसिद्धिश्चेत्ययं लोके समादृतः ।
न्यायो नैवाऽवमन्तव्यो बुद्धिमद्भिः प्रयत्नतः ॥ ६ ॥
अयं दोषसमुद्धारो व्यासे गुर्वंशवर्तिनि ।
कृतो मुदं जनयतात् कृष्णयोरैक्यमेतयोः ॥ ७ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनुसन्धानपद्धतिः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री', अनुसंधानसंस्थानसदस्यो
वाराणसेयसंस्कृतविश्वविद्यालये ।

यद्यप्यनुसन्धानम्, अन्वेषणम्, शोधः, गवेषणादयः शब्दा रिसर्च (Research) इत्याङ्गलशब्दस्यानुवादपरिणामाः; भारते वर्षे तु भाष्यम् (चूर्णिः), व्याख्या, समालोचना, टीकाटिप्पण्यादयः प्रचलितचराः; ऋष्यृणत्वाद् अध्ययनम् अध्यापनं च; चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति[१]; नैषधमहाकाव्येऽपि चातुर्विध्यं विद्यायाः[२], तथापि पाश्चात्त्यरिसर्चकलाऽभावे तादृशी नैव, किन्तु ततोऽपि श्लाघ्यतमा पद्धतिर्भारते चिरात् समधिगम्यते। मन्त्रदृष्टृत्वं मुनित्वं च नाम मूर्द्धाभिषिक्तमुदाहरणम्। वेदादयो मन्त्रदृष्टृत्वस्योदाहरणम्, सूत्रादयश्च मुनित्वस्य निदर्शनम्। व्याकरणन्यायमीमांसावेदान्तादिसूत्रग्रन्थेषु प्रकृष्टतमं तथाकथितमनुसंधानम्। पाश्चात्त्यपद्धत्यनुरूपं यदनुसंधानं नाम तत् कला-(Technique)-रूपम्। तत्र निबन्धलेखनपद्धतिर्भजते कानिचन वैशिष्ट्यानि।

संस्कृतसाहित्येऽनुसंधानशब्दस्यार्थाः—विचारः, संयोगः[३], गवेषणा[४], अनुसरणमित्यादयः। संहितासु महाभाष्ये चानुसंधानशब्दो नैव प्रयुक्तः। मनुस्मृतावनुसंधानं नाम विचारः[५]।

---

१. पस्पशाह्निकं महाभाष्यम् (गु.प्र.सं.,४२पृ.)।
२. अधीतिबोधाचरणप्रचारणैः—नैषध. १,४।
३. परं ब्रह्मानुसंदध्यात्—नृसिंहोत्तरतापिन्युप० १,६ (पङ्क्तिः); २,३० (नि.सा.सं.)।
अनुसंदधाति—ताण्ड्यब्रा० २.९.४।
अनुसंहितम्—ऐआ० ३.२.६; शाङ्खायनारण्य० ८.११।
अकारेणेममात्मानमन्विष्य मकारेण ब्रह्मणानुसंदध्यात्—नृसिंहोत्तर० ७.१८(=योजयेत्)।
यथाकर्तव्यमनुसंधीयताम्—हितो० ३।
अलमनेनोपालम्भेन प्रस्तुतमनुसंधीयताम्—हितो० ३।
कस्ते निर्बन्धः पदे पदे मामनुसंधातुम्—मृच्छक० १।
एतौ तौ मामनुसंधत्तः—मृच्छ० २ (=अनुसरतः)।
प्रसवयोरयं स्थानमनुसंधीयताम्—हितो० ३; (मनु० १२,१०६)।
४. दुर्गशोधनम् अनुसंधातव्यम्—हितो० ३ (शोधनानुसंधानयोरेकत्र प्रयोगो दर्शनीयः)।
५. यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः—मनु० १२,१०६ = विचारयति (मन्वर्थ०)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एष विचारः प्रणिधानकल्पो यथोपनिषत्सु[१] । नृसिंहोत्तरतापिन्युपनिषद्यस्यार्थो योजनेति[२] । सा च परमात्मपरा प्रणिधानार्थिकैवेति विज्ञेयम् । प्राकृतादिभाषास्वपि विचारार्थकोऽयम्-अणुसंधाण-(अणुसंधण) शब्दः[३] । साम्प्रतिको रिसर्चशब्दस्तु तत्त्वार्थविचारपरो रूढः । मल्लिनाथादिसमयेऽनु-संपूर्वको धाधातुर्गवेषणापरः, अभिसंबन्धपरो वा[४] । बालमनोरमाकारोऽपि 'संज्ञायां समजनिषद-निपतमनविदषुञ्शीङ्भृञिणः' (३.३.९९) इति सूत्रटीकायां सिद्धान्तकौमुद्या लिखति—'इत्या =शिबिकेति । कोशो मृग्यः' इति । भट्टोजिदीक्षितेन 'इत्या'-शब्दस्यार्थः कृतः—शिबिकेति । कस्मिंश्चिदपि कोशेऽयं शिबिकार्थो नोपलभ्यते । बालमनोरमाकारेणापि तदा बहुगवेषितोऽपि क्वचित् कोशे नोपलब्ध इति लिखितम्—कोशः=कोऽपि कोशः, मृग्यः=गवेषणीयः, यस्मिन् स्यादयं शब्द इति । उभयत्रानुसंधानगवेषणशब्दौ न रिसर्चवेद्यार्थप्रकाशकौ । काव्यप्रकाशोक्तोऽपि (काव्यानुसंधानबलात्) तथा । साहित्यदर्पणोक्तस्तु (धर्मफलाननुसंधानात्) सूक्ष्मनिरूपणपरः सूक्ष्मपरीक्षणपरो वा । ऋग्वेदभाष्ये (४.५८.३) सायणः—'तदत्रानुसंधेयम्' इत्याह । तस्यार्थः —'योज्यम्' 'ज्ञेयम्' इति । वस्तुतस्तु शब्दोऽयं मूलतो ध्यानार्थपरोऽनुध्यानपरो वा[५] ।

निरुक्ते—'समाम्नायः समाम्नातः, स व्याख्यातव्यः' (१,१) इत्यत्र समापूर्वको म्नाधातु-र्मर्यादापूर्वकाभ्यासे मननीयः । अपरा क्रिया ग्रन्थीकरणार्थिका । छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः—निरु. १,४ इत्यत्रापि ग्रन्थीकरणरूपोऽर्थः । आम्नायशब्दस्त्वभ्यासार्थकः[६] ।

---

१. परं ब्रह्मानुसंदध्यात्—नृसिंहोत्तरतापिन्यु० १,६ (पङ्क्तिः); २,३०; नादबिन्दू० ४,१; नारद-परिव्रा० ८,६ ।
समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै बलात् ।
अनुसंधानराहित्यमालस्यं भोगलालसम् ॥
— तेजोबिन्दू० १,४० ।

२. अकारेणैममात्मानमन्विष्य मकारेण ब्रह्मणानुसंदध्यात्—नृसिंहोत्तरतापि. ७,१८ (पङ्क्तिः) ।

३. अत्ताणुसंधानपरा सुसावगा परिसा हुंति—श्राद्धप्रतिक्रमणसूत्रवृत्तिः २० ।

४. अत्र…इतिवृत्तानुकथाऽनुसंधेया—कुमारसंभवटीका १,२१ ।

५. सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः ।
नादमेवानुसंदध्यान्नादे चित्तं विलीयते ॥
—नादबिन्दूप० ४१=ध्यायेत् ।
सर्वतो निर्वेदमासाद्य स्वरूपानुसंधानमनुसंधाय—नारदपरिव्राजको. १,४ ।

६. शब्दधर्मार्थकामादिशास्त्रेष्वाम्नायपूर्विका ।
प्रतिपत्तिरसामान्या व्युत्पत्तिरभिधीयते ॥
—वाग्भटालङ्कारः १,५ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काव्यप्रकाशकारेणापि 'इति हेतुस्तदुद्भवे[१]' इत्यत्राभ्यासो दर्शितः। सोऽपि काव्यज्ञातृशिक्षया संपादितः। ग्रन्थनिर्माणे हेतुः—१. शक्तिः = प्रतिभा, २. निपुणता = व्युत्पत्तिः[१], अभ्यासश्चेति। एते त्रयः संमिलिता एव काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः। साम्प्रतिकी गवेषणा (Research) अपि दीर्घप्रयत्नात्मकं परीक्षणम् अभ्यासात्मकमेव[२]।

पाश्चात्त्यदेशेषु प्रदायमानः 'डाक्टर' इत्युपाधिः पूर्वं चर्चोपदेशकानां 'फादर' इत्यभिधेयानामध्यापकानां कृते दीयते स्म[३]। थीसिस (Thesis) [= निबन्ध —] शब्दस्य मूले ग्रीकभाषायाः 'थे' (θε) इति धातुर्विद्यते। संस्कृतभाषायां च √धा धातुर्निश्चेयः। ग्रीकभाषायां 'थे' इति धातुर्धारणार्थकः, संस्कृतभाषायामपि तथा[४]। उपाधिधारकाणामध्यात्मविषयपण्डितत्वाद् उपाधिश्चायमध्यात्मविषयको[५] भवति स्मेति संस्कृतभाषायामध्यात्मविषयकचिन्तनस्यार्थे 'अनुसंधान' इति शब्दप्रयोग उपनिषत्सु तत्त्वानुसंधानपरः[६]। स च समाम्नायाधारक एव।

---

१. शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥
—काव्यप्रकाशः १,३।

२. Research = diligent inquiry.

३. Doctor—1. teacher, instructor, one who inculcates learning, opinions or principles (const.of) now rare. 2. one skilled in, and therefore competent to teach, any branch of knowledge; on eminently learned man (arch.), 3. spec. applied to the Doctors of the church, certain early 'fathers' distinguished by their eminent learning.
—Shorter Oxford English Dictionary.

४. Thesis, a statment laid down to be argued about, an essay on a theme. (L,-GK.) Latin thesis—Gκ.Thesis, a proposition statement, thing laid down. Put for θε-tis[३], allied to θε-tos, placed verbal adj-from the base θε = √धा, to put, place.
Theme : a subject for discussion (F.,-L.-Gκ.) M.E. teme, OF teme F. theme; Lat theme.-Gκ. θεμa that which is laid down, the subject of on argument—Gκ.base θε-, to place; Ti θεμi, I place.√धा = To place, put; whence संस्कृत-√धा = to put.
—An Etymological Dictionary of English Language.

५. क्रिश्चियनमन्दिराणां 'फादर' इति प्रसिद्धा जनाः 'डाक्टर' पदभाजो भवन्ति स्म (द्र.टि. तृतीया)।

६. परं ब्रह्मानुसंदध्याद् विश्वादीनां क्रमः क्रमात्—नारदपरिव्राजको. ८,६ (श्लो०)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संधानं नाम—स्थापना[१], परस्परानुकूलता[२], सम्यग् धारणम्[३], आभिमुख्येन स्थापनम्[४], संप्रयोगः[५], संश्लेषः[६], संनिधानम्[७], सम्यग् हवनम्[८], संयोजना[९], साहित्यम्[१०], संधिः[११], संघट्टनम्[१२], धनुषि बाणयोजनम्[१३], अभिषवः[१४], (मद्यसज्जाकरणम्), काञ्जिकम्[१५], मदिरा, अवदंश[१६] इत्यादि। अनु = पश्चात्, आभिमुख्येन स्थापना वा संयोजना वेत्यनुसंधानम्, कस्यचन स्थूलवस्तुनः सकाशाद् मदिरासवादिसूक्ष्मतत्त्वनिस्सारणवत् प्राप्यसामग्रीतः सूक्ष्मविचारनिस्सारणम्। तदनुसृत्य निबन्धादिलेखनम्[१७]। एवं खल्वर्थसंवादे सत्यपि लेखनकलाविसंवादः सुप्ररूढ एव। अनुसंधानशब्दार्थविधया सामग्रीसंग्रहस्य त्रैविध्यं ज्ञायते—१. अज्ञाततथ्यज्ञापनमाहोस्विद् गुप्ताया लुप्ताया वा सामग्र्याः प्रकाशः; २. उपलब्धायाः सामग्र्याः परीक्षणम्; ३. प्राप्तसामग्र्याश्च परिष्कारः। यथा कोऽपि व्योकारः स्वर्णकारो वा समधिगतान् लोहस्वर्णादिधातून् परिष्कृत्य स्वच्छीकुर्यात्। अनुसंधानग्रन्थेऽपि त्रयाणामुप-

---

१. सं वज्रा दधातन—ऋ. १०.१०१.५ = स्थापयत [सायणः]।
सं दधुरर्चन्ननु स्वराज्यम्—ऋ. १.८०.१५ = स्थापयाञ्चक्रुः [सायणः]।

२. सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ—ऋ. १०.८५.४७ = आवयोर्बुद्धीः परस्परानुकूलाः करोत्वित्यर्थः [सा.]।

३. ऋतायिनी मायिनी सं दधाते—ऋ. १०.५.३ = सम्यग् धारयतः [सायणः]।
सं छायया दधिरे—ऋ. ५.४४.६ = सम्यग् धारयन्ति [सायणः]।
सं वज्रं पर्वशो दधुः—ऋ. ८.७.२२ = सम्यग् धारयन्ति [सायणः]।

४. संदधुर्मरुत्वन्तं सख्याय हवामहे—ऋ. १.१०१.६ = आभिमुख्येन स्थापयन्ति [सायणः]।

५. त्वे पूर्वाः संदधुः पृष्टबन्धो—ऋ. ३.२०.३ = संप्रयुयुजिरे [सायणः]।

६. ब्रह्मा च गिरो दधिरे समस्मिन्—ऋ. ६.३८.३ = संधीयन्ते संश्लिष्यन्ते [सायणः]।

७. सं सौभगानि दधिरे पावके—ऋ. ६.५.२ = सम्यग् निहितवन्तः [सायणः]।
नाभा यज्ञस्य सं दधुर्यथा विदे—ऋ. ८.१३.२९ = संनिदधते [सायणः]।

८. त्वे इषः सं दधुः—ऋ. १०.१४०.३ = संदधति। सम्यग् जुह्वति [सायणः]।

९. सं बलं दधुः—ऋ. ७.८२.२ = समयोजयन् [सायणः]।
संधाता संधिं मघवा—ऋ. ८.१.१२ = संधिम् = संधातव्यं तं संधाता = संयोजयिता भवति [सायणः]।

१०. यन्मामेकं समधत्ताहिहत्ये—ऋ. १.१६५.६ = संहितमभूत् [सायणः]।

११. एवं कृते तु संधाने वृत्रः प्रमुदितोऽभवत्—महाभार० ५.१०.३३।

१२. सरोजसंधानमिवाकरोदपाम्—कुमारसं० ५,२७।

१३. तदाशु कृतसंधानं प्रतिसंहर सायकम्—अभिज्ञानशाकु० १।

१४. संधानं स्यादभिषवः—अमरको० २,१०,४२।

१५. हलायुधः।

१६. राजनिर्घण्टः।

१७. द्र० निबन्धग्रन्थाः—१. कृत्यकल्पतरुः (११०० ई०), २. त्रिस्थलीसेतुः, ३. वीरमित्रोदयश्चेत्यादयः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बन्धानां पूर्तिर्भवेत्—१. इहानुपलब्धतथ्यानामन्वेषणम्; २. उपलब्धतथ्यानां सिद्धान्तानां वा नवीनरूपेण समाख्यानम्; ३. ज्ञानक्षेत्रस्य सीमाविस्तारो स्वोपज्ञता वा; प्रत्यवस्थमनुसंधान-ग्रन्थोऽभ्यर्थिन आलोचनात्मकपरीक्षणसामर्थ्यस्य सम्यग् निर्णयसामर्थ्यस्य च द्योतको भवेत्। अनुसंधानस्य कियानंशः स्वप्रयत्नपरिणामः, स च कियतांशेन विषयविशेषमग्रेसारयतीति स्पष्टयितव्यमनुसंधात्राभ्यर्थिना; ४.(चतुर्थमपि तथ्यमपेक्षितम्। तदस्ति—सम्यक् प्रतिपादनशैली) निरूपणशैल्यादिदृशापि ग्रन्थस्यास्य स्वरूपं संतोषदं भवेदिति प्रकाशनार्हतां न त्यजेत्।

इमे चत्वारो गुणा निर्विवादम् अनुसंधानकार्यार्थमावश्यकाः। तेष्वन्यतमस्य का कियती वा महत्तेति प्रश्नः। स्वोपज्ञतायाः सुष्ठु प्रतिपादनशैल्याश्चानिवार्यता न कस्याप्यविदिता। प्रत्यनुसंधानकार्यं ज्ञानक्षेत्रस्य सीमाविस्तारेण भवितव्यमेवानिवार्यतया, तदैव तत्सार्थक्यम्। अधिजीवनं कस्यापि गभीरकार्यस्य मूल्यनिर्धारणे स्वोपज्ञता समुत्कृष्टो निकषः (अस्या विषये वैशद्येन 'स्वोपज्ञता कल्पना च' इत्यध्याये द्रष्टव्यम्)। साहित्यकृतिरनुसंधानं वा नास्ति जीवनतो बहिः। स्वोपज्ञतायाः शैलीसौष्ठवस्य च स्वरूपं विषयसापेक्षं भवति, न सर्वत्र सादृश्यं भजत इति त्वन्यत्।

सम्प्रति तावत् प्रथमद्वितीययोस्तथ्ययोर्विषये वक्तव्यम्। नवीनतथ्यान्वेषणस्य समधि-गततथ्य-(सिद्धान्त)-पुनराख्यानस्य च किं मिथो महत्त्वम्? संक्षेपत उभयोर्महिमा विषय-विशेषमवलम्बते। स्थूलतस्त्विदमैदम्पर्यम्—वैज्ञानिकविषयानुसंधाने तथ्यशीर्षण्यता, साहित्यिक-विषयानुसंधाने च विचारमूर्धन्यता। इतिहासस्तत्संबद्धनृतत्त्व-पुरातत्त्वशास्त्रादीनि तथ्यविचारयो रुभयोर्महत्त्वाधायकानि, समाजशास्त्रतत्संबद्धार्थशास्त्रवाणिज्यशास्त्रराजनीतिशास्त्रप्रभृतीनि विज्ञानसाहित्ययोर्मध्यस्थितिकानि। विषयविभाजनादिवर्गीकरणे सापेक्षप्राधान्यस्यैव प्रामाण्यमिति न पार्यते कर्तुं तदीयस्वरूपनिर्धारणम्।

प्रक्रिया

सुव्यवस्थितरूपेण विषय-प्रस्तवनस्य प्रविधिर्नाम भवति सरणिरनुसंधानस्य। आङ्गल-भाषायामयं प्रकारः Technique टेकनीकशब्देनाभिधीयते। पाश्चात्यदेशीयभाषानुसंधान-प्रविधिम् (Technique) अधिकृत्य बहवो ग्रन्थाः प्रकाशिताः, अधुनापि प्रकाश्यन्ते। तत्र प्रतिग्रन्थं प्रस्तूयमानो नूतनो दृष्टिकोणः। तेषु सर्वेषूत्तमो ग्रन्थः कोलआर्थ-लिखितो वर्तते—'ए मैन्यूअल ऑव थीसिस राइटिङ्ग' (A Manual of thesis writing) पूर्वलिखित-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पुस्तकेषु सन्ति बहवो दोषा इत्यस्य ग्रन्थस्य पठनेन ज्ञायते। संक्षेपतो विज्ञानस्यान्येषां क्षेत्राणामिव वैज्ञानिकप्रविधेः (टेकनीकस्य) नास्तीयत्ता।

साहित्यिकस्यानुसंधानकार्यस्य भाषिकस्य वानुसंधानकार्यस्य जनिरेव समजनि विज्ञानक्षेत्रे, ऐतिह्यक्षेत्रे च। फलतोऽनुसंधानकार्यस्य स्तोऽभिन्ने अङ्गे विज्ञानम्, इतिहासश्च। ऐतिहासिकी दृष्टिर्वैज्ञानिकः प्रविधिः (टेक्नीक) चेति द्वौ पक्षौ स्तोऽनुसंधानविहङ्गमस्य। नैकेनापि पक्षेण विना भवति गतिः पक्षिणः।

वैज्ञानिकः प्रविधिः (Technique)

१. अनुपलब्धानां नवीनतथ्यानां वा गवेषणा नूतनप्रकारेण च तत्प्रतिपादनम्।

२. उपलब्धानां तथ्यानां सिद्धान्तानां वा पुनराख्यानम्, नवीनप्रकारेण च तत्प्रतिपादनम्।

३. कस्याश्चिदपि रचनायाः सुदृढमूलप्रमाणपुरस्सरम् आलोचनात्मकं परीक्षणम्; नवीनपद्धत्या च तत्प्रतिपादनम्।

४. कस्याश्चिदपि रचनायाः सुदृढमूलनिर्णयपुरस्सरं प्रमाणप्रपुष्टं पाठानुसंधानं विस्तृतभूमिकया च नवीनपद्धत्यात्मकप्रतिपादनपूर्वकं तत्संपादनम्।

५. कस्याश्चिदपि रचनायाः कयाचिदन्यरचनया रचयित्रा वा सह तुलना।

६. ज्ञानक्षेत्रस्य सीमाविस्तारो नाम स्वोपज्ञता।

७. प्रतिपादनशैली।

अव्यवस्थिता विकीर्णा च सामग्री परिष्कृतरूपेण ग्राह्यरूपतया च तथा विन्यस्येत, येन समुल्लिखितानां सतानां प्रकाराणां पूर्णत उताहोंऽशतः सज्जीकरणपूर्वकम् उपस्थापनं भवेत्। अयमेव वैज्ञानिकः प्रविधिः (Technique)।

समष्टितः स्वरूपम अनुसंधानपद्धतेः खल्वेवं भवेत्—अनुसंधानसामग्र्या उपलब्ध्यनन्तरं सम्यगनुशीलनपूर्वकं तस्याः सुव्यवस्थितरूपेणोपस्थापनपुरस्सरं प्रतिपादनम्।

सुव्यवस्थितोपस्थापनं नाम—प्रबन्धारम्भे—१. उपोद्घातः, २. विषयानुक्रमणिका, ३. संकेतसूची च; प्रबन्धान्ते—१. परिशिष्टम्, २. सहायकग्रन्थसूची, ३. नामानुक्रमणिका चेत्येवञ्जातीयकाः प्रकारा आवश्यकरूपेण भवन्त्युपस्थापनीयाः। अस्य प्रबन्धारम्भिकस्योपस्थापनस्य 'पूर्वबन्धः' इति, प्रबन्धान्तोपस्थापनस्य च 'पश्चबन्धः' इति नामान्तरम्।

दोषहानोपायाः

१. विषयस्य वर्गीकरणं न भवेद् असंबद्धं पुनरावृत्तियुतं वा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२. तथ्यनिरूपणस्य स्थाने विवरणात्मकं विवेचनं नाधिकमहत्त्वपूर्वकं विन्यस्येत।

३. करणीयानां स्वस्थापनानां स्थाने भाषापरिवर्तनपूर्वकम् अन्येषां लेखकानां मान्यता नाङ्गीक्रियेरन्।

अधिकारी

व्यक्तित्वसंघटकतत्त्वात्मका भवन्ति केचन सहजा गुणाः प्रतिव्यक्ति। ते कस्मिंश्चिद् मानवे सुप्तावस्था भवन्ति, कस्मिंश्चिच्च जाग्रदवस्थाः। अनुसंधानाधिकारित्वपरीक्षणार्थं नास्ति काचन परिमापकता। परीक्षोत्तीर्णतायाः श्रेण्याधारेण परीक्षणं न कल्पते निष्कर्षाय। प्रातिभ-ज्ञानसंपन्नोऽनुभवी च हृदयालुर्निर्देशक एवाधिकारित्वमेतत् क्षमते साधु परीक्षितुम्। प्रतिभायाः परीक्षणार्थम् अपेक्षते प्रतिभा। सा च नास्ति क्रय्या। अस्या अभावेऽध्यवसायजन्याऽधिकारि-ताया द्वितीयं स्थानम्। अस्या अप्यधिकारितायाः प्रमापकता नास्ति परीक्षोत्तीर्णतायाः श्रेणी। परीक्षोत्तीर्णतायाः श्रेण्याः सत्यपि महत्त्वे, सैव नास्ति सर्वस्वभूता। अध्यवसायजन्याधिकारिता भविष्यन्त्याः प्रतिभाया जननी "बौद्धिकं साहित्यकं च नेपथ्यम्।" अस्या अधिकारिताया निष्पक्षं साधीयश्च परीक्षणानन्तरम् अनुसंधित्सुराद्यं प्रशिक्षणमर्हति।

अनुसंधानप्रशिक्षणम्

प्रशिक्षणकेन्द्रे खल्वनुसंधेयविषयाणां संकेतो देयः; अनुसंधित्सूनां चाभिरुचिर्जागरणीया तदर्थं प्रयासो वा विधेयः। अनुसंधानात्मके प्रशिक्षणेऽनुसंधानप्रक्रियामतिरिच्य संस्कृतवाङ्मय-स्यानुद्घाटितानां सामान्यतश्चाज्ञातानां विषयाणामपि सम्यग् विवेचनम् अनिवार्यम्। संस्कृत-वाङ्मयार्णवे बहुविधानि विषयरत्नानि ह्यविज्ञातानि सोत्कण्ठं प्रतीक्षन्ते गवेषकान्। इतश्चास्माकम् अनुसंधित्सवः संस्कृतवाङ्मये विषयदारिद्र्यमनुभवन्त इव लक्ष्यन्ते। केचिच्च पिष्टपेषणविधौ संलग्ना आत्मनः कृतकृत्यतां मन्यन्ते। प्रशिक्षणप्रावीण्याय संस्कृतानुसंधानार्थिना भाषाद्वयम् अवश्यमभ्युपेयम्। आङ्गलभाषाज्ञानस्य तदर्थमनिवार्यता। जर्मनफ्रेञ्चभाषयोरेकतरा। आङ्गल-भाषाया ज्ञानं संबद्धविषये पिष्टपेषणदोषापनुत्तये परमावश्यकम्। अनुसंधानविस्ताराय च जर्मन-फ्रेञ्चयोरेकतरा भाषावश्यकी। केनचिदपि संस्कृतविश्वविद्यालयेन संस्कृतानुसंधानार्थिनां कृते खल्वाङ्गलभाषाऽनिवार्या क्रियेत। न विना तया गतिस्तेषाम्। प्रशिक्षणकेन्द्रेष्वियमपि समुद्भावनीया जिज्ञासा। महत् खलु साहाय्यं भवेद् अनुसंधानविधौ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयनिर्वाचनम्

प्रशिक्षणानन्तरं विषयनिर्वाचनक्रमः। अनुसंधाता स्वविशेषरुचिम् अधिकारितां चाधृत्य विषयनिर्वाचनं कुर्यात्। अस्मिन् क्रमे सद्गुरोः परामर्शेन तद्विषयग्रन्थसूच्येका प्रणेया। सूच्या निर्माणानन्तरम् अनुसंधानार्थी सामग्रीपाथेयमनधिगत्य मार्गभ्रष्टो भवितुमर्हतीति तदर्थ-मुचिता दिग् निर्देशनीया।

सामग्रीसंग्रहः

सामग्रीसंग्रह एव नास्ति द्वितीयं सोपानमनुसंधार्थिनः। संगृहीतायाः संगृह्यमाणाया वा सामग्र्या अध्ययनं टिप्पण्यादेश्च कार्यं युगपदेव प्रवर्तनीयम्। अनेके प्रकारा भवन्ति सामग्र्याः। तद्यथा—

१. अनिवार्या।
२. सहायिका।
३. मुद्रिता।
४. हस्तलिखिता।
५. शिलालेखरूपा ताम्रपत्ररूपा वा।

अस्याः सामग्र्या अध्ययनार्थम् अस्ति प्रचलिता विशेषप्रक्रिया—

१. पत्रपद्धतिः (Card system)
२. टिप्पणीविधिश्च (Notes system)

ग्रन्थस्वरूपम् (Outlines)

सामग्र्याः संकलनस्य तदनुशीलनस्य चानन्तरं प्रबन्धस्य विधेयः स्वरूपनिश्चयः। इदानीं विषयस्वरूपस्य शीर्षकस्य च संबन्धेऽन्तिमो निर्णयः कार्यः। प्रबन्धविषयस्य पूर्णसंकेतकं भवेद् शीर्षकम् इति तदर्थमत्यर्थं सावधानतया वर्तितव्यम्। प्रबन्धशीर्षकेण काचन विशिष्टा समस्यापि लक्षिता भवेत्।

ग्रन्थस्वरूपं द्विधा विभज्यते—

१. पूर्वानुबन्धः
२. पश्चानुबन्धश्च।

तत्र पूर्वानुबन्धस्त्रिधा विभज्यते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१—क. प्राक्कथनम् (इह कृतज्ञताज्ञापनव्याजेन कस्यचिद् विज्ञापनं हातव्यम्। निर्देशकनाम्नोऽपि न कर्तव्यो दुरुपयोगः)।

ख. विषयसूची

ग. संकेतसूची च।

पश्चानुबन्धः प्रायस्त्रिधा विभज्यते सत्यामपेक्षायाम्—

१. परिशिष्टम्,

२. उपयोजितग्रन्थसूची,

३. नामानुक्रमणिका च,

प्राक्कथनं प्रस्तावना वा संपूर्णप्रबन्धस्य लेखनानन्तरमेव साधीयो लेखितुं शक्यते। तत्र (क) विषयोपयोगितायाः, (ख) अध्ययनक्रमस्य, (ग) प्रबन्धे स्वोपज्ञतादिकस्य च समावेशो भवति। संकेतसूच्यपि प्रबन्धलेखनान्ते रचनीया।

पश्चानुबन्धस्तु स्वनाम्नैव पश्चाद्वर्तितां सूचयति। पश्चानुबन्धे परिशिष्टं प्राथम्यमर्हति। मान्यतानां प्रस्थापनानां च स्पष्टतार्थं प्रबन्धेऽसमावेशिताया अनिवार्यसामग्र्या उल्लेखः परिशिष्टे विधेयः। यथा—१. हस्तलेखाः, फोटोस्टैट-प्रतिलिपिः, मूलकथनमादि। २. ग्रन्थसूच्यपि पश्चानुबन्धांशः। ग्रन्थसूच्या वैज्ञानिकत्वार्थं व्यवस्थितत्वार्थं च—अकारादिक्रमेणोपन्यासपूर्वकं संस्करण-लेखक-प्रकाशका निर्देशनीयाः। ३. नामानुक्रमणिका यद्यपि नास्त्यनिवार्यमङ्गं प्रबन्धस्य, तथापि संयोजिता भूषणमेव।

प्रबन्धो द्विःकृत्वो लेखनीयो भवति। आदौ प्राथमिक रूपं देयम्। प्रथमत एव प्रबन्धो नान्तिमेन रूपेण लेखनीयः। प्रथमेन रूपेण तस्मिन् संबद्धविषयाणां विस्तृतं विवेचनम्; विस्तृतान्युद्धरणानि चापेक्षितानि। द्वितीयतोऽन्तिमेन रूपेण लेखने तत्र—

१. व्यवस्थितस्वोपज्ञं विवेचनम्,

२. उपयुक्तान्युद्धरणानि,

३. पुनरावृत्त्याः पिष्टपेषणस्य वापनोदः,

४. विवेचनाया निष्कर्षः,

५. विवेचनायां च पूर्वापरसंबन्ध ऐकात्म्यं चेत्यादीन्यपेक्षितानि सन्ति।

मल्लिनाथस्येदं वचनं परमं सहायकम् इह दिशि—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'नामूलं लिख्यते किञ्चिद् नानपेक्षितमुच्यते ।'

प्रबन्धलेखने तथ्यनिरूपणानां प्रस्थापनानां च महत्त्वं मूर्द्धाभिषिक्तम् । तत्रोचितानि साधीयांसि चोद्धरणान्यपेक्षितानि । कस्यचिदपि कथनस्याविकलमङ्गीकारो नामोद्धरणम् । भाषान्तरस्योद्धरणानामाशयः संस्कृतभाषायामवश्यं व्यक्तीकर्तव्यः । मान्यतानां खण्डनार्थं मण्डनार्थं वोद्धरणान्यङ्गीक्रियन्त इति तानि प्रामाणिकानि विषयानुकूलानि च भवेयुः । यद्यपि तेषामुपन्यासस्य शक्यन्ते भवितुमनेके विधयः, तथापि श्रेष्ठो विधिरस्ति तस्मिन्नेव पृष्ठे टिप्पण्यां लेखनमिति । प्रस्थापनार्थं मान्यतार्थं च तर्कसंगता संदर्भाः प्रमाणपुष्टाश्च तर्का अपेक्ष्यन्ते ।

उद्धरणोपन्यासे छद्माश्रयो न जातुचिद् ग्राह्यः । मूलग्रन्थादेव तेषां ग्रहणं साधीयः । मूलग्रन्थमनवलोक्य तदितरग्रन्थोद्धृतोद्धरणानां ग्रहणमश्रेयसे भवेत्; तत्रोद्धृतप्रमाणानाम-प्रामाणिकत्वेन महती हानिः ।

प्रबन्धस्यान्ते खलूपसंहाररूपेण गवेषणोपलब्धीनामुपन्यासो नितान्तमावश्यकः ।

प्रतिपादनशैली

वैज्ञानिकताया अञ्चलमवलम्ब्य न शुष्कदृषच्चयनिभम् अनुसन्धानकार्यं प्रस्तोतव्यम् । तथ्यानां निष्कर्षाणां च संबन्धे लेखकस्यानासक्तसमीक्षादृशि सत्यामपि नास्ति विरोधः साहित्यिक-सरसतया सह । अत एव तत्र कलाया रचनात्मकप्रतिभायाश्च संस्पर्शोऽपेक्षणीयः । प्रबन्धस्य भाषा भवेद् अवश्यं प्रौढा, दोषरहिता, प्राञ्जला साहित्यिकी च । लक्ष्यस्यास्य प्राप्त्यर्थं सत्याम-पेक्षायामनेकप्रथमरूपाणि प्रबन्धस्य रचनीयानि । टङ्कणप्रयुक्तानाम् अशुद्धीनां सम्यक् परिहारो विधेयः ।

अनुसन्धानस्वरूपम्

अद्यत्वेऽनुसंधानकार्याणां बृहदायोजनं समन्ततः । प्रामुख्येन समाजशास्त्रीयं साहित्यिकं च । इह दिशि भाषा-दर्शन-ज्योतिष-काव्येतिहासपुराण-सांख्ययोगतन्त्रादिविषयानधिकृत्य बहुषु विश्वविद्यालयेष्वनुसंधीयतेऽनुसंधायकैः । शास्त्रीयेष्वनुसंधानेषु १. नवीनतथ्यानाम्, २. नियमानाम्, ३. संबन्धानाम्, ४. कारणानाम्, ५. परिणामानां ६. परम्पराणाम्, ७. नवीनविचाराणाम्, (निष्कर्षाणां दृक्कोणानाम्) च गवेषणा नामानुसंधानकोटिः । प्रतिविषयम् उल्लिखितेषु सप्तसु सूत्रेषु किमप्येकं सूत्रमवलम्ब्य सामग्री प्रस्तोतव्या । केनचिदध्ययनेनानुद्घाटितसूत्रस्योद्घाटनं स्याच्चेत् तर्हि तद् अनुसन्धानम् । सुबोधया साहित्यसरण्या

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निबन्धरचना नामाध्ययनमेव न त्वनुसन्धानम्। एकसूत्रत्वाभावे दृक्कोणाभावे सति वा विविधपक्षप्रस्तावपूर्वकमध्ययनमध्ययनमेव न त्वनुसन्धानम्।

आलोचनानुसन्धानयोरान्तर्यम्

आलोचना नाम मूल्याङ्कनम्। कस्या अपि कृतेः मूल्यवत्ता कियती, दोषाश्च कियन्त इति गुणदोषविवेचनम्। आलोचनाधारः—सुनियतराद्धान्तस्तत्त्वं च। यद्यपि तैस्तत्त्वैः सिद्धान्तैर्वा परीक्ष्य गुणदोषौ प्रवर्तते समालोचनेत्यनुसन्धानालोचनयोः प्रवृत्तिर्भिन्ना, तथापि समालोचनाविषयकमनुसन्धानम्, अनुसन्धानकार्यस्य च समालोचनं निर्विरोधं शक्यतेऽनुष्ठातुम्। साहित्यदर्पण-काव्यप्रकाशादयो हि समालोचनग्रन्थाः।

अनुसन्धानविषयिण्यः खलु सन्ति विविधा अवस्थाः—१. अज्ञाततथ्योद्घाटनम्, २. ज्ञाततथ्यस्य नवीना व्याख्या, ३. समन्वयश्च। इत्थमनुसंधानस्य विविधास्ववस्थासु सत्योद्घाटनमंशतो जायमानं पर्यन्ते सर्वाङ्गीणतया व्यज्यते।

अद्यत्वे परीक्षार्थिभिर्वर्षद्वयेन निबन्धस्य परिपूर्णताकाङ्क्षिभिर्विषयवर्गीकरणपूर्वकमनुसंधानं प्रवर्त्यते। तत्र च प्रतिष्ठितधारणानुरूपतथ्यानवाप्तौ, सत्यामपेक्षायां सत्यगर्भा कल्पना समाश्रीयते। साधीयः खलु तत्। तथ्यप्राप्तिसंभावनायामालस्यवशात् प्रमादवशाद् वा कल्पनासमाश्रयो महते दोषाय कल्पते। श्रेष्ठमनुसंधानं तु संप्राप्तविषयसामग्रीं पर्यालोच्य परिशील्य च पारङ्गतः स्वानुभवाधारेण वर्गीकरणपूर्वकं तथ्यं प्रस्तुयात्। तथ्यप्रस्तवनीयत्वे सामग्र्याधारेण तदनुरूपकल्पनासमाश्रयो न दोषाय। विभिन्नस्रोतोभिः समुपलब्धतथ्यानि स स्वविवेकनिकषेण परीक्ष्य गृह्णाति रागद्वेषविनिर्मुक्तः सन्। सत्यात् परं न तत्प्रेयः सत्योद्घाटनप्राधान्यात्। असत्यमूलकत्वे तत्कृतेरप्यसत्यमूलकत्वाद् विगानम्। सत्यस्य विस्पष्टतार्थं तथ्यप्राप्त्याधाराः पूर्णतया निर्देश्याः। प्रमाणनिर्देशाभावे कल्पितव्याख्यादिपरीक्षणं न स्यात् सुकरम्, उद्धरणाभिप्रायाणां स्वीयनिष्कर्षादीनां च भेदोऽपि न भवेत्। निष्कर्षतो भावचौर्यं न्यक्कृत्य सत्यप्रतिष्ठाऽनुसन्धानमूलम्।

अनुसंधानस्य पूर्वपीठिका

'भिन्नरुचिर्हि लोकः' इति दृशा स्वरुचिपूर्वकं सर्वतः प्रथमम् अनुसंधास्यद्भिरनुकूलविषयसूची निर्मेया। ततः पश्चात् स्वाभिमतविषयाणाम् १. अननुसंहितो विषयः, २. अनुसंहितश्चेदपूर्णप्रकाशः, ३. पूर्णविवेचितश्चेत्—नवीनदृशा व्याख्यापेक्षः स्वीकार्योऽनु-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्धानार्थम्। एतत् सर्वं प्राप्यसामग्रयध्ययनेन तद्विषयविशेषज्ञपरामर्शेन वा ज्ञायते। अन्यथा पूर्वानुसंहितकार्यस्य पिष्टपेषणदोष उपतिष्ठेत।

विषयसीमा तथा विस्तृता न स्याद् यथा निर्धारितसमयेन कार्यमेव न समाप्येत। अनुसन्धायकेन स्वयोग्यता ज्ञायेत। योग्यताभावेन विषयसीम्नश्च सुविस्तृततयाऽनुसंधाता निष्फलो भवति। एकदा मत्परिचितयाऽनुसंधात्र्या 'प्रातिशाख्यानां व्याकरणेन तुलनात्मकम् ऐतिहासिकं समालोचनात्मकं चाध्ययनम्' इति विषयोऽङ्गीकृतः। तया पारम्परिकपद्धत्या व्याकरणं कदापि न पठितम्। एम० ए० परीक्षायां निर्धारितकारकप्रकरणात्मकं व्याकरणज्ञानं तदीयः सीमा। वेदविषयं गृहीत्वा एम् ए० परीक्षायां प्राथम्येनोत्तीर्णत्वात् तस्यास्तत्राभिनिवेश इति योग्यताभावेन विषयसीम्नश्च विस्तृतत्वात् सप्तवर्षेष्वपि न तन्निबन्धपरिपूर्णता जाता। प्राथम्येन परीक्षोत्तीर्णतामात्रेण न पार्यतेऽनुसंधानकार्यमनुष्ठातुम्। निष्कर्षतः स्वयोग्यतानुरूपं विषयवरणं तत्सीमानिर्द्धारणं च हितावहम्। व्याकरण-साहित्य-दर्शन-पुराणेतिहासादिषु प्रत्यङ्गमनुसंधानेन तत्तदङ्गमधिकृत्य शक्यते कर्तुं गहनमध्ययनं विवेचनापूर्णसामग्र्युपस्थापनपूर्वकम्।

विषयसीमानिर्धारणान्तेऽनुगुणं शीर्षकं कुर्यात्। तच्चानतिविस्तृतं स्वप्रतिपाद्यविषयनिर्देशकम् अवश्यं स्यात्।

अनुगुणशीर्षकमनुस्वरूपपरिचयस्य विषयानुक्रमण्या वा महत्त्वाधायकः प्रक्रमः। गृहीतविषयक्रमानुसारेण स्वरूपपरिचयः संक्षिप्तोऽपि सुस्पष्टः स्यात्। स स्वरूपपरिचयो भवदनुसन्धानदिक्कोणं स्पष्टीकुर्यात्—भवान् केन सिद्धान्तेन किं तथ्यमाविश्चिकीर्षतीति। अस्पष्टस्वरूपपरिचयेनानुसंधातुरयोग्यता तत्परतानैयून्यं च प्रतीयते।

स्वरूपपरिचयसंपत्तौ सामग्री संचेया। तत्प्राप्तिस्रोतांसि—

१. प्रकाशितपुस्तकानि,

२. पाण्डुलिपयः,

३. अप्रकाशितपाण्डुलिपयः,

४. पत्रिकाः,

५. राजकीयाः सूचना अराजकीयाश्च,

६. विशेषज्ञसंपर्कश्चेति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तद्विषयविशेषज्ञानां परामर्शेन सन्दर्भसूचीनिर्माणपूर्वकमध्ययनं प्रक्रमेत। प्रकाशित-पुस्तकानां पाण्डुलिपीनां चोपयोगार्थम् आदर्शपुस्तकालयाः शरणम्। दुर्लभपाण्डुलिपीनां संस्थाविशेषाधीनत्वाद् व्यक्तिविशेषाधीनत्वाद् वा तदुपयोगोऽनुसंधातॄणां महते दुःखाय जायते। एवमवस्थायां प्रतिष्ठितजनसहयोगेन दुर्लभपाण्डुलिपीनां प्रतिलिपिः कर्तव्या तच्चित्रं वा प्रापणीयम्।

सामग्रीसंचयानन्तरम् अपेक्षितप्रसङ्गेषु टिप्पण्यो लेख्याः। यस्मात् पुस्तकाद् यस्याः पत्रिकायाः सकाशाद् वा टिप्पणी गृह्येत, तदीयं नामपृष्ठसंख्यादिकं सुस्पष्टं लेख्यम्। कस्यचिद् लेखकस्य सारो यदि गृह्येत, तर्ह्यविकलो न तु सारांशः।

अनुसंधाने पूर्वाग्रहः सर्वथा त्याज्यः। पूर्वनिर्णीतमन्तव्यान्येव न प्रमाणपुष्टीकरणीयानि। तटस्थवृत्त्या स्वविषयचयनविश्लेषणकर्तुर्वैज्ञानिकस्य तुल्यः स्यादनुसंधातुर्दृष्टिकोण इति स्वमताग्रह-पूर्वकं नौचित्यमावहत्यनुसन्धानकार्यम्। राष्ट्रप्रेमवशीभूता जातिस्नेहाकृष्टा वाऽनुसंधायका बलपूर्वकं तथ्यानां निष्कर्षमाविष्कुर्वन्ति भ्रामकम्। नैषाऽनुसंधानपद्धतिर्वैज्ञानिकी। अनुसंधायकस्तु सम्प्राप्तसामग्र्याधारेण निष्कर्षान् प्रस्तुयादितीयमजिह्मा राजपद्धतिस्तदीया।

प्राप्यसामग्रीं क्रमानुसारेण विन्यस्य, तत्र च टिप्पणीनां संपत्तौ सत्याम् अनुसंधायकः प्रबन्धं लेखितुम् उपक्रमेत। विषयक्रमानुसारेण नियतेष्वध्यायेषु टिप्पणीसामग्रीम् उपयुञ्जीत। अन्वेकतथ्यम् अपरतथ्यस्य सनिष्कर्षं प्रस्तुतिः कार्या। यथापेक्षं पादटिप्पणीषु संदर्भग्रन्थोल्लेख-स्तत्पृष्ठसंख्यादिकं निर्देश्यम्।

स्वमतसमर्थनप्रमाणानि विरोधिमते निर्वचनानि च सोल्लेखं विधेयानि। पक्षविपक्षीय-सामग्र्या निष्पक्षभावेन तोलनं धर्मः खल्वनुसंधायकस्य। प्रबन्धस्य भाषा प्रसादगुणपूर्णा स्यात्। दुरूहभाषया तथ्यनिरूपणं संदिग्धं प्रतीयत इति प्रबन्धो निकृष्टो मन्यते। अतोऽभीष्टं कथनं सप्रमाणं सतर्कं प्रसादया गिरोपस्थाप्येत।

व्याकरणदृशा संस्कृतभाषा विश्वभाषासु पूर्णतमा व्यवस्थिता चेति सा वैज्ञानिकी। तत्र स्वरोच्चारणस्य शब्दव्युत्पत्तेश्च वैज्ञानिकी विवेचना। ब्राह्मणग्रन्थेषु प्रातिशाख्येषु च बहुत्र विवेचनमित्थम्। व्युत्पत्तिविश्लेषणं नाम निर्वचनं यास्कग्रन्थे निरुक्ताभिधे सुमनोरमम्। अष्टा-ध्यायीव्याख्याभूतस्य महाभाष्यस्य तुला नास्ति शब्दसाधुत्वक्षेत्रे। एवं खलु भाषायां व्याकरणे च प्राचीनकाले महत्त्वाधायकमनुसंधानं कृतं भारतीयैराचार्यैः। समग्रवाङ्मयस्य विभाजनमपि सुवैज्ञानिकरीत्या संजातम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संपूर्णवाङ्मयस्य विभागोऽपि वैज्ञानिक्या दृशा जातः। वैदिकसाहित्यस्य संहिताब्राह्मणारण्यकोपनिषत्स्वपि भेदप्रभेदाः। वेदानामप्युपवेदाः सन्ति—आयुर्वेदधनुर्वेदगन्धर्ववेदतन्त्रवेदाभिधानाः। अस्य संपूर्णवेदराशेरपि षडङ्गानि शिक्षाव्याकरणछन्दोनिरुक्तकल्पज्योतिषाभिधानानि। एतेषु सर्वेषु विषयेषु सुदीर्घतपःप्रभावेण गवेषणापूर्वकं भारतीयैराचार्यैर्विविधा ग्रन्थाः प्रणीताः स्वोपज्ञाः। ते किल सार्वकालिकत्वं सार्वभौमत्वं च भेजिरे। तेष्वपि महिष्ठानि भाष्याणि प्रणिन्यिरे स्वोपज्ञानि। पातञ्जलमहाभाष्यं सूत्रभाष्यातिरिक्तं विभिन्नदेशीयभाषाणामुल्लेखसमलङ्कृतम्; वैदिकलौकिकभाषैतिह्यविराजितं च।

काव्यशास्त्रविवेचनापि सुविस्तरेण कृतोपलभ्यते। तत्र काव्यग्रन्थेषु रसालङ्कारछन्दोगुणदोषरीतिप्रभृतिषु ग्रन्थरचना। एवमेवायुर्वेदमधिकृत्य प्रभूतग्रन्थराशिरधिगम्यते। छन्दोज्योतिषविषयका अपि पुष्कलविचाराः। ज्योतिषे गणितविद्यातिरिक्तापि फलितज्योतिषविद्या नक्षत्राधारिका निकामं प्राप्तप्रचारा बभूव। धनुर्वेदीयपरम्परायामवश्यं न दृश्यते तादृशो विकासः।

प्राचीनभारतीयविश्वविद्यालयेषु पठनपाठनप्रणाल्या बौद्धग्रन्थैर्वैदेशिकयात्रिकविवरणेन चोत्तरकालिकपरम्पराया आभासमात्रं प्राप्यते। तेषु विश्वविद्यालयेष्वनुसंधानकार्यविषयको विवरणप्रकारः सुदुर्लभः। नन्दराज्ये पाणिनेर्ग्रन्थपरीक्षाऽवश्यं श्रूयते। तेषु विश्वविद्यालयेषु तत्तद्विषयाणां विशेषीकरणप्रथा सुतरां भवेत्, परिणतानुसंधानस्य च विदुष उपाधिप्रदानपरम्परा चावश्यं भवेत्। संभवतो नालन्दाविश्वविद्यालयसमाप्त्यनन्तरमेव भारतीयानुसंधानशिक्षाप्रणाल्यपि समाप्तप्राया जाता।

एकोनविंशख्रीस्ताब्दे भाषादृशा संस्कृतभाषां प्रति समाकृष्टाः पाश्चात्त्या संस्कृतभाषाजगति पुनरनुसंधानसूत्रपातमकार्षुः। ततोऽनेकैः पाश्चात्त्यैर्विद्वद्भिः संस्कृतभाषासाहित्याध्ययनकर्मणि जीवनं समर्पितम्, अनुसंधानदिशि च महत्त्वाधायका विचारा उपस्थापिताः। अत एव वयं पाश्चात्त्यविदुषामधमर्णाः संस्कृतभाषाया पुनरुत्थित्यै तदनुसंधानकृत्यै वा। अस्मिन् पक्षे तेषामाधमर्ण्यस्वीकृतिर्न नो हीनताभावनासूचिका।

अनुसंधानकला

अनुसंधानं वैज्ञानिककार्यम् इति तत्र वैज्ञानिप्रणाल्यैव (१) विधेर्विधानस्य (२) दृष्टिकोणस्य चापेक्षणीयता। शोधसामग्रीसंग्रहः प्रथमा पीठिका, तस्य च क्रमबद्धव्यवस्था द्वितीया पीठिका। वस्तुतोऽनुसंधानकार्यार्थं पीठिकाद्वयमपरिहार्यम्। द्वितीया पीठिका पाश्चात्त्यैर्विद्वद्भिर्विशेषतोऽधिक्रियते, तदर्थं च तत्र विशिष्टकला (विद्या) परिभाषैव वा समास्थापिता।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साऽनुसंधानकार्यस्य भित्तिमूलं शक्यते वक्तुम्। यद्यपि विषयस्तावद् हृद्यतमो महिष्ठश्च भवितुं शक्नोति, सामग्रीमपि पर्याप्तं संगृह्णन्ति संग्राहकाः, लेखनकलायामपि प्रवीणा भवन्ति प्रज्ञाः, तथापि व्यवस्थितरीत्या वैज्ञानिकरीत्या च नैतत् सर्वम् उपयोक्तुं शक्नुवन्ति। फलतः कदाचिद् विषयसीमातिक्रमणदोषभाजः, कदाचिच्च विलोपितावश्यकतथ्या विद्यार्थिनो न तथा वाच्या यथा निर्देशकाः। अद्यत्वे विद्यार्थिष्वनुसंधानलहरी व्याप्ता। अस्मिन् दृढाग्रहे च ते विषयानुपयोगिताम् आत्मनोऽयोग्यतां समयाभावं सामग्र्यप्राप्त्यादिकं विस्मृत्य 'रिसर्चस्कालर' इति ख्यापनेन विशिष्टं गौरवमनुभवन्ति। एवमेव निर्देशका अपि निर्देशकत्वप्रापणविधौ स्वकीयं संमानमवगच्छन्ति। वस्तुतो यत्रैकस्यां दिशि निर्देशकस्य विषयविशेषज्ञताऽपेक्ष्यते, तत्रापरस्यां दिशि तस्यानुसंधानकार्यकलाभिज्ञतापरिचयोऽपि कार्त्स्न्येन परमापेक्षणीयः। अत एवानुसंधातृमार्गबाधको योग्यनिर्देशकाभावः।

उपयोगिन्याः सामग्र्या अप्राप्तिर्नाम तृतीया बाधा। विषयनिर्वाचनकाले नास्माकं ध्यानं सामग्रीं प्रति भवति, किन्तु विषयस्वीकृतिं प्रत्येव तत्। विषयप्रवेशानन्तरम् उपयुक्तसामग्र्यभावेन कार्यं तद् दुस्तरं प्रतीयते। भाषाविज्ञानप्रतीकाशविषयाणामनुसंधानार्थमस्माकं विश्वविद्यालयेषु संप्रति नोपयुक्तानि यन्त्राण्यपि। साहित्यविषयाणां सामग्रीसंग्रहरूपकार्यं श्रमसाध्यमप्यस्ति साध्यमपि, किन्त्वेकाकिनः कृते दुःसाध्यम्। सामूहिकप्रयासैरेव शक्यते सा संचेतुम्। इदं च तदैव संभवि, यदा विषयविशेषस्यानुसंधानम् एकस्यामेव संस्थायां भवेत्। तत्र खलु सामग्र्यपि शक्यते राशीकर्तुम्, निर्देशनस्य चापि व्यवस्था शक्यते भवितुं सुप्राप्या। एतदभावेऽनुसन्धानकर्मणि संपूर्णता न पार्यते कर्तुम्। सत्यप्यनुसंधाने विषयेषु निश्चयात्मकता न पार्यते समनुष्ठातुम्। यथा भासकालिदासभवभूत्यादीनां कविवराणां पारिवारिकं विवरणं निश्चयेन नानुसंहितम् इति तिमिरावृतम्।

विषयनिर्वाचनम्

अनुसंधानकर्मणि तृतीया बाधा विषयनिर्वाचनस्य। विषयवरणकाले विद्यार्थिनो निर्देशकाश्च तदुपयुक्ततां क्षेत्रं च प्रति नावदधतीति विषयसामग्र्योर्न भवति समञ्जसतेति तावत् प्रथमा पीठिका। द्वितीयस्यां पीठिकायां सर्वेषु विश्वविद्यालयेषु शोधविषयिण्याः समीकरणोचितव्यवस्थाया वैधुर्येण विषयपौनर्वृत्त्यं सामान्यप्रायम्। ये विषया वस्तुतोऽनुसंधेयतामर्हन्ति, तत्र नास्माभिरवधीयते। निरर्थं चानावश्यकान् विषयान् वरीत्वा कार्यनिरता भवाम इति साहित्यसमृद्धौ न जायते विशिष्टं साहायकम्। अद्यापि संस्कृतभाषादिक्षेत्रे भूयिष्ठाः पक्षाः सन्त्यपरा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मृष्टाः । अद्य संस्कृतजगति नवीनस्तुलनात्मकश्च दृष्टिकोणः प्रकाममपेक्षणीयः । नवीना मानयुक्तयः (मानदण्डाः) प्रयोगाश्चावलम्बनीयाः संस्कृतभाषाद्यनुसन्धानक्षेत्रे । विज्ञानविषयक-पुस्तकानां संस्कृतभाषायामभाव इति दोषोऽयं प्रमार्जनीयः । विश्वविद्यालयीयपत्रिकायाम् अनुसंधानकार्यविवरणानि, पक्षपातविहीनाः समालोचना उपयुक्ताश्च परामर्शाः स्थानं लभेरन् । विशेषाश्चानुसंधानविषयकनिबन्धलेखनप्रकारकाः संकेताः पर्याप्तं तत्र स्युः । एवं सत्यनुष्ठिते संस्कृतभाषानुसंधानकार्यं सुव्यवस्थितं भविष्यति, विशेषज्ञानां योग्यतालाभो भूयिष्ठतया शक्यते ग्रहीतुमनुसंधायकैरिति ।

अद्यतनी स्थितिः

अद्यत्वे अनुसंधानस्थितिर्न संतोषप्रदा, अनुसंधानकार्यमहत्ताया याथार्थ्यतोऽनवगन्तव्यत्वात् । साम्प्रतम् अनुसंधानं विद्यावारिधिः (पी-एच्० डी०), वाचस्पतिः (डी० लिट्) इत्याद्युपाध्याप्त्यर्थं व्यवसायदृशा विधीयमानम् इत्यनुसंधित्सूनां दशापि परीक्षार्थिनामिव जाजायते । निर्देश्यः सरलो विषयः, येन गृहस्थितेनैव मया कार्यं संपाद्येत, वैदुष्यं कामये नाहम्, उपाधिस्तावन्मे दाप्य इति प्रार्थयते परामर्शदातारम् । प्रबन्धेन सार्धमेव स परीक्षकानुसंधाननिरतो दृश्यते, चेष्टते च स्वानुकूलपरीक्षकनियोजनाम् । इदं सर्वं कार्यजातम् अनुसंधानकार्यघातकम् ।

अनुसंधानकार्यार्थम् आवश्यकं वातावरणं सौविध्यं च नितान्तमपेक्षणीयम् । क्वचिद् विश्वविद्यालयेषु तु कस्यापि विभागस्याध्यक्षेऽनुसंधानकार्यसूत्रधारयोग्यता मन्यते । सोऽननुष्ठितानुसंधानोऽविदितानुसंधानतत्त्वोऽपि संचालयति गवेषणाकार्याणि । बाहुल्येन त्वाचार्यकक्षाणां पाञ्चवर्षिकोऽध्यापनानुभवस्तेषां तादृशयोग्यताप्रमापको मन्यते । आचार्यादि-कक्षाणामध्यापनम्, अनुसंधानकार्यसंपादनं च वस्तुद्वयम् इति तदीया षट्त्रिंशदङ्कवत् सर्वथा प्रतीपता विज्ञेया । आचार्यादिकक्षाध्यापकानां कस्यापि विषयस्य साङ्गोपाङ्गं ज्ञानं प्रभवेदयमप्येकः प्रश्नः । आचार्यादिपरीक्षाणामध्ययनं पाठ्यपुस्तकपरिध्यविमुक्तम् । पाठ्यपुस्तकानां सम्यग् वेत्ता न सर्वोऽप्याचार्याध्यापकस्तादृशवैदुष्यसंपन्नानां पङ्क्त्यर्हः । एतादृशेभ्यो वराकेभ्योऽनुसंधानाधीक्षकेभ्यः कः परामर्शः शक्यतेऽवाप्तुमनुसंधित्सुभिः । अनुसंधानपरिणामे किं मूल्यं तत्संमतेः । विश्वविद्यालयानां सांप्रतिके वातावरणे विधानजाड्यतः खल्वेतादृशेभ्य एवाध्यापकेभ्य इदं गौरवं समर्प्यते । इदमपि कारणं संस्कृतानुसंधानकार्यमानदण्डानभिनन्दनीयतायाः । एत एव विधाननिर्मिता विद्वांसस्तत्त्वज्ञाश्च बाहुल्येनानुसंधानपूर्वकं लिखितप्रबन्धानां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परीक्षकाः क्रियन्त इति ते तेन प्रबन्धेन किं न्यायं विधास्यन्ति ? तदीया निर्णयाः स्वरुचिमवलम्बन्ते न त्वध्ययनमननपरीक्षणानि । यदि कांश्चिद् विश्वविद्यालयान् प्रतिप्रेषितानां प्रबन्धानां परीक्षकसूची प्रस्तूयेत, तर्हि मनोविनोदनीयानि तथ्यानि शक्यन्ते प्रकाशयितुम् । एतेषु परीक्षकेषु तादृशा अपि प्राप्यन्ते, यैर्न विज्ञायते प्रबन्धविषयसंबद्धम् एतावच्चिरं कियत् साहित्यं प्रकाशितम् इति, न च तैस्तद्विषयकमतिरिक्तं पुस्तकं पठ्यते । एतेषु परीक्षकेषु तादृशा अपि, येषामनुसंधानपञ्जीकरणं दशमासाधिकं न भवति ।

प्रबन्धानां परीक्षकैर्विशेषज्ञैरेव भाव्यम् । एवं सत्यप्येतेषु परीक्षकेषु द्वित्रा एव विशेषज्ञा भवन्ति । आधिक्येन तु परीक्षकाणां तद्विषयकं न भवति ज्ञानसाधारण्यमपि । याथार्थ्येन विशेषज्ञास्तु विश्वविद्यालयनियमप्रतिबन्धतया परीक्षकतानर्हा एव । एतस्याः स्थितेः कारणादेवाद्य संस्कृतानुसंधानदुर्दशा । यद्यपीयं दशा प्रायः सर्वेषामेव विषयाणां संबन्धे शक्यते वक्तुम्, तथापि संस्कृतानुसंधानकार्यस्य पश्चात्तनत्वात्, इतः पूर्वं शास्त्रीयालोचनात्मकं साहित्यदर्पणादिरूपं टीकाटिप्पण्यात्मकं वा कार्यमेव संस्कृतविद्वद्भिः समनुष्ठितम् । वर्तमानानुसंधानकार्यपद्धतिः पाश्चात्यशिक्षोपलब्धेति तादृशी योग्यता तादृशशिक्षादीक्षामूलिका । प्रायः केषुचिदपि विश्वविद्यालयेषु संस्कृतभाषानिबद्धा अनुसन्धानप्रबन्धा नोरीक्रियन्ते वाराणसेयसंस्कृतविश्वविद्यालयं विना । अत्राप्येतत् कार्यं नववर्षेभ्यः प्रागेव प्रचलितमिति बाल्यं तदीयम् । इदमपि कारणं यत् संस्कृतभाषानुसंधानस्य सुदृढा सुस्थिरा च परम्परा नाशक्यत निर्धारयितुम् ।

संस्कृतविद्वांसः स्वप्रतिभाद्याश्रिता अनुसंधानकार्यदृढपरम्पराप्रवर्तने बद्धपरिकरा भवेयुः । संस्कृतजगति प्रतिभाशालिनां विदुषां नास्त्यभावः । तेषां सहयोगेन गम्भीरतापूर्वकम् अनुसंधानसमस्या विचार्य संस्कृतभाषानुसन्धानकार्यं प्रेरणाप्रदम् आदर्शस्वरूपं च कर्तुं शक्यते ।

अनुसंधानकार्यस्य वास्तविकं स्वरूपम्

अनुसंधानकार्यं सुविपुलं गुरुतरं च । एतच्च ग्रन्थलेखनाद् निबन्धलेखनाद् वा भिन्नम् । "मया बहूनि पुस्तकानि लिखितानि, मदीया भूयिष्ठा निबन्धाः पत्रिकासु प्रकाशिताः" इति मनसिकृत्य बहवो जना अनुसंधानपूर्वकप्रबन्धलेखनं तृणाय मन्यन्ते । इयं तावद् आत्मप्रवञ्चनानीतिः । एतादृशा लेखका अनुसंधानकर्मणि महत् काठिन्यमनुभवन्ति ।

ग्रन्थनिर्माणम् आहोस्विद् निबन्धलेखनम् अनुसंधानप्रबन्धलेखनाद् भिन्नम् । ग्रन्थादिनिर्माणं तावद् प्रणेत्रभिरुचिं तदभिमतं च व्यनक्ति अनुसंधानप्रबन्धलेखनं तु विषयस्वरूपं स्पष्टयति । ग्रन्थादिनिर्माणं खलु निर्मातृज्ञानसीमानं प्रकाशयति, अनुसंधानप्रबन्ध-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लेखनं तु विषयप्रामाणिकत्वं दर्शयति । प्रथमे तावल्लेखको यावच्छक्यमुपस्थापयति, द्वितीये तु पूर्णतानिबन्धिनी दृष्टिर्लेखकीया । सारांशतः प्रथमे व्यक्तित्वप्राधान्यम्, द्वितीये च विषयप्राधान्यमित्येतदुभयोरान्तर्यम् । एतेषां भेदानां सत्त्वे सामान्यलेखकोऽनुसंधानप्रबन्धलेखने महत् कष्टम् अनुभवति ।

सामान्यलेखकस्य चत्वारो दोषाः । ते चेमे—

१. यथेच्छं लिखित्वा प्रकाशयेदित्यभ्यासः ।

२. अविचारितरमणीयवचनैर्विषयो रोचकः क्रियेतेत्यभ्यासः ।

३. भाषाचमत्कृत्या शैलीचमत्कारोत्पादनमित्यभ्यासः ।

४. प्रमाणवैकल्येऽपि स्वविश्वासबलेन किमपि लिखेत् ।

साधारणलेखकधर्मो लेखनम् । अनुसंधानप्रबन्धरचयिता तु प्रतिशब्दं प्रतिपङ्क्ति च सप्रमाणं निबध्नाति परिपूर्णतया । स यत् किमपि लिखेत् तत्र न किञ्चिदनावश्यकम्, न काचित् निरर्थिका सामग्री न, च तत्र शब्दवाक्यादीनामपव्यय इति प्रबन्धलेखकधर्मः । अतः प्रबन्धलेखककार्यम् उत्तरदायित्वपूर्णम् । कार्यमेतत् धैर्यपरिश्रमापेक्षं नीरसं चेति ।

अनुसंधित्सोः पूर्णाग्रहः स्यात् खलु सत्यप्रतिपादनपरः, न तु स्वाभिमतारोपपर आहोस्विद् रुच्यभिरोपपरो भवेत् । बहूनामनुसंधित्सूनाम् एवमाग्रहो लक्ष्यत इति तेनानुसंधानस्वरूपं भ्रश्यति । अनेकैर्विद्वद्भिर्भारते भक्त्युद्गमः खीस्तधर्मप्रभावज इति साधितुमचेष्टि । चेष्टैषा भ्रामिका न तु सत्यप्रतिपादनम् । एषा चेष्टा लेखकस्यानुमानमेव गुष्णाति । ऐतिह्यक्षेत्रे तु इत्थंभूता बहवो दुराग्रहा दृष्टिपथमेष्यन्ति । अनुसंधानं नाम नाग्रहाधारेण, न चाहङ्काराधारेण, न वा भावुकतावेशेनैव । कस्यापि क्षेत्रस्यानुसंधानं पूर्णतो विशुद्धमत्या विधीयेत । इह शुद्धबुद्धिभूयिष्ठतया वाञ्छनीया । एतद्वैधुर्ये नानुसंधानमूल्यं किमपि ।

प्रबन्धे १. सामग्री, २. अभिव्यक्तिश्चेति तत्त्वद्वयं नास्त्यविदितं तज्ज्ञानाम् । अनुसंधाता सामग्रीं शीर्षण्यतया संगृह्णाति महत्त्वं चार्पयति । तत्रापि सामग्रीं स द्विधा परीक्षते—१. किं प्रत्येकं वस्तु प्रामाणिकम् इति, २. तत्र किमपि नैयून्यं न भवेदिति किं परिपूर्णमस्ति तदिति । प्रामाणिकता तेन साधनीया भवति । तथा कर्तुं सोऽन्तःसाक्ष्यं बहिःसाक्ष्यं च गवेषते । किमपि तत्त्वं यथासाध्यम् अनुमानमात्राधारेण न प्रस्फोर्येत । अनुमानाश्रयेण प्रस्फोरणीयतायां तत्त्वानाम्, यथासंभवं प्रमाणाधारकत्वं स्यात् तेषाम् । स समुपलब्धानि प्रामाणिकानि वस्तुसंबन्धीनि निखिलानि तथ्यानि प्रस्तुयात् । तेषां समुपलब्धानां प्रमाणानां साहाय्येनानुमानीयता प्रामाणिकी

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भविष्यति । भूर्यनुमानीयतास्थितौ संभाव्यदृष्टिवैशिष्ट्येन परीक्षणीयता दुर्निवारा । एतादृश्यनुमानीयता तत्रैव श्लाघ्या, यत्र तत्संबन्धीनि यथार्थतथ्यानि सत्यामपि गवेषणायां नोपलब्धानि स्युः। आलस्यवशेनाध्ययनवैधुर्यात् तत्तथ्यानवाप्तावनुमानाश्रयेऽनूनकः परिश्रमो मोघः स्यादनुसंधायकस्य। उदाहरणार्थम्—कस्मिंश्चिद् शोधप्रबन्धे "अवेर्दुग्धे सोढदूसमरीसचः" इति कात्यायनीयवार्त्तिकम्। "दुग्धस्थानीयदूसशब्दस्य सम्बन्धः 'दूष्य'—शब्देन वर्तते । अवीनां दुग्धं दूषितं भवति । नेत्रयोर्मलस्य कृतेऽपि दूषिकाशब्दप्रयोगः । दूष्यशब्दो हि पटकुटीरवाचकोऽपि" इदं कथनं प्रायेण प्रबन्धगौरवं विलोपयति, यतो हि सर्वमप्यनुमानं निराधारम्। दूसशब्दः दूष्यशब्दाद् विकसितः—कथम् ? केन प्रकारेण ? दूसशब्दस्य दूष्यशब्दप्रभवत्वं साधयितुं निबद्धा दूसशब्दप्रयोगा गवेषणीया आसन् । कात्यायनस्य भाषाक्षेत्रप्रवृत्तिरवगन्तव्यासीत् । दक्षिणतः पश्चिमायां दिशि भाषासु प्रयोग एतदीयः स्यात्, तर्हि स कोशेषु द्रष्टव्य आसीत् । संक्षेपेण च तदुल्लेखः प्रबन्धेऽवश्यमासीत् करणीयः । एवं सति सोऽनुमानमेतत् प्रामाणिककोटौ गणयितुं प्रभवति स्म । अनुसंधित्सुनानेन दूसशब्दोऽनया दृशा गवेषितोऽभविष्यत्, तर्हि स नूनं फलभागभविष्यत् । उदाहरणतः सिन्धुप्रदेशीयभाषायां खर्जूररसनिष्कासनार्थे दूस-धातुप्रयोगो लभ्यते, जिप्सी-(रोमानी)भाषायां च दूश् धातोः प्रपूरणार्थकता । इयं रोमानीजाती राजस्थानप्रदेशात् पञ्चालप्रदेशाद् वा गता विदेशेषु तुर्कब्रिटिशादिषु यायावरत्वरूपेण संप्रत्यपि जीवति । अनेन प्रकारेण दूसशब्दमूलस्यानुमानेन निर्धारणम् अप्रामाणिकं भ्रामकं च सिद्धम् । एतत्साधनाय दूष्यशब्दस्थितिकल्पना लेखककृतोपहासास्पदा जाता ।

अवेर्दुग्धे दूषणकल्पना सर्वथा कल्पना सिद्धा । यदि द्वितीयं पटकुटीरानुमानं सत्यं भवेत्, तर्हि तदानीमपि पटकुटीराश्रयेणावीनां संबन्धस्य साधनार्थम् ऐतिहासिकप्रमाणप्रस्ताव आसीद् अपेक्षणीयः—अन्यत्रापि पटकुटीराश्रयोऽजादीनामपि संबन्धे घटत ऐतिह्य इति । एतेनोदाहरणेन सुस्पष्टं यद् अनुसंधित्सुनाऽनुमानाश्रये न त्वरणीयम् । अनुमानं पुष्टयितुमुपस्थापनीया संपूर्णा सामग्री भ्रान्तिनिरसनरूपा । किमपि कथनमप्रामाणिकम् अपुष्टं च न स्यात् ।

हिन्दीभाषाया बीहड़शब्दमूलं 'विकट-' इति निश्चीयते । अद्यतनेषु नवीनतमग्रन्थेष्वपि तदेव लिख्यते । एवंविधभ्रमपरम्परान्तः किं कदापि भवितुमर्हति ? अनुसंधानप्रबन्धाः प्रतिपङ्क्ति सप्रमाणाः स्युरित्येव तदीयं गौरवम् । एतादृशभ्रमपूर्णानुसंधानप्रबन्धस्य लेखकोऽनुसंधित्सुरेव न प्रमाददोषभाक्, किन्तु तदीयो निर्देशकोऽपि वाच्यो यन्न तेन विद्यार्थी साधूपदिष्टः, तथ्यानां पर्यवेक्षणं च न सावधानतया विहितमिति । एतदपि वक्तुं शक्यते यत् तेनापि सम्यग् ज्ञाताः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्युरनुसन्धानविधयः। परीक्षका अपि स्वीकुर्युरेतादृशं प्रबन्धं चेत्, तेऽपि प्रमाददोष-निर्लिप्ता न भविष्यन्ति। इयं सुचिन्तनीया स्थितिः। अस्याः परिमार्जनं नितान्तमावश्यकम्। अन्यथा न केवलं वैदुष्यह्रासः संस्कृतभाषायाम्, अपि तु संस्कृतसाहित्यमपि मिथ्यातथ्यपोटलिका भविष्यति।

निष्कर्षतोऽनुसंधानप्रबन्धे मनोनुरूपाण्यनुमानान्याश्रयितुमशक्यानि। प्रतिकथनं साक्ष्य-पुष्टिः प्रमाणसिद्धिश्च स्यात्। प्रमाणत्वेन यत् साक्ष्यमुपस्थाप्येत, तदपि प्रमाणविरहितं न भवेत्। केनापि प्रबन्धनिर्देशकेन प्रबन्धसंबन्धे मनागपि प्रमादो नानुष्ठानीयः। तेन प्रतिशब्दं प्रतिवाक्यं च मननीयम्। सामग्रीपरिपूर्णताविषये च समीचीनतयाश्वस्तेन भाव्यम्। विवेचनाक्रमे युक्ति-क्रमे प्रमाणानां सम्यक्त्वे च न किमपि सन्देहस्थानं त्याज्यम्।

इँग्लिशभाषायाः सम्यग् ज्ञानमन्तराऽनुसंधानस्वरूपस्य सुरक्षा न सुशक्येति स्वानु-संधानविषयशिरोमणीनां सुगृहीतनामधेयानां विदुषां कथनम्। इँग्लिशभाषाज्ञानविरहित-विद्वत्प्रेषितानुसंधानप्रबन्धपरिणामदर्शनेन तेषामयं निष्कर्षः। एवंभूतेष्वनुसंधानप्रबन्धेष्वनुसंधान-स्वरूपस्य ह्रासः सुस्पष्टं विलोक्यते तैः। संस्कृतानुसंधित्सूनामिदं कर्तव्यं यत् ते संस्कृतानुसंधानं शीर्षण्यतां प्रापयेयुः! संप्रति दयादुरुपयोगो नानुष्ठेयस्तैः। अनुसंधानकर्मठतार्थम् अनुसंधित्सु-भिर्यदि साम्प्रतं न स्यात्, तर्हि भविष्यति, इँग्लिशभाषातिरिक्ता फ्रेंचजर्मनभाषयोरेकतराऽवश्य-मध्येया।

विषयः—विषयनिर्वाचनम् अतिमनोयोगपूर्वकं कृतं भवेद् अनुसंधित्सुप्रवृत्त्यनुकूलम्। स च विषयोऽनुसंधानापेक्षः, शक्यसामग्रीसंग्रहः, अनुसंधानपूर्वकं महत्त्वपूर्णोपलब्धिसंभावनः, यत्किञ्चित्प्रकारोपज्ञश्च। इमे विषया विवरणात्मका विचारात्मका विचारविवरणात्मका वा भवि-तुमर्हन्ति। (क) विवरणात्मका विषयाः प्राधान्यतस्तत्त्वप्रधानाः। एतेष्वज्ञातवस्तूद्धारः, अज्ञाततत्त्वस्य च वस्तुस्थित्या यथास्थाने नियोजना। तथ्यप्रधानानुसंधाने त्रुटिपूर्णतथ्यदशा-संशोधनमप्येकं कार्यम्। (ख) विचारात्मकनिबन्धेषु तथ्यानां व्याख्यानम्, विचारदिशि नवीनकोणोपस्थानम्, आहोस्विद् विहितविचारप्रगतावग्रेतनविचारकोट्युद्घाटनम्।

अद्यत्वेऽनुसंधीयमानविषयेषु नैतासां दृष्टीनां सुस्पष्टीकरणं लभ्यते। विषया बद्धप्रणा-लीमन्तरैव निर्धार्यन्ते। विषयनिर्वाचनदृष्ट्या विश्वविद्यालयानां मिथः सहयोगः परमापेक्षणीयः। विश्वविद्यालयस्य समीपेऽन्येषु विश्वविद्यालयेष्वनुसंधीयमानविषयाणां सूची भवेत्। विषय-निर्वाचनं विभागसाहाय्येन भवेत्। विद्यार्थी तदर्थं न स्वतन्त्रीक्रियेत।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सामग्रीसंग्रहः—शीर्षण्यस्थानीयात् सामग्रीसंग्रहात् पूर्वं तदुपलब्धिः क्वेति ज्ञानं परमावश्यकम् । यद्यपि व्याकरणात्मकानुसंधाने व्याकरणात्मकसामग्रीक्षेत्रमेव महत्त्वाधायकम्, तथापि प्रयोगाद्युपलब्धये साहित्यादीनामपि घनिष्ठः संबन्धः । एवमेव यद्यपि साहित्यिकानुसंधाने साहित्यिकसामग्रीक्षेत्रमेव महत्त्वकरम्, तथापि साहित्यिक्याऽभिव्यक्त्या सह जीवनस्य परिस्थितीनां च घनिष्ठः संबन्ध इत्यन्यक्षेत्रीयाणि वस्तून्यपि भृशमुपयोगीनि । अनया दृशा सामग्रीसंकलनीयक्षेत्रमनिवार्योपयोगिरूपे क्षेत्रद्वये विभज्य, उभयत एव सामग्री संग्राह्या भविष्यति । याथातथ्येन सामग्र्युपलब्धावेवानुसंधानस्य पूर्णतां साफल्यं च शक्यते स्वीकर्तुम् ।

सामग्रीसंकलनदृशा तद्विषयिकायाः समग्रसामग्र्या एकत्रीभावः नितान्तम् आवश्यकः । सामग्रीसंकलनक्षेत्रस्य द्वैविध्यं शक्यते भवितुम्—१. साधारणम्, २. विशिष्टं चेति । अन्यविधया दृशा शक्यते विभाजयितुम् सामग्रीसंकलनक्षेत्रम्—

संकलनक्षेत्रम्—१. हस्तलिखितसाहित्यम्, २. प्रकाशितसाहित्यम्, ३. मौखिकं साहित्यं चेति । एतेषु प्रकाशितं साहित्यं सामान्यम्, प्राचुर्यात् । हस्तलिखितं मौखिकं च साहित्यं विशिष्टम्, अल्पत्वात् । एतेषु त्रिविधेषु क्षेत्रेषु सामग्रीसंग्रहप्रणाली नैकसमाना । आत्मनः क्षेत्रात् सम्यक्त्वेन सामग्रीम् उपलब्धुं शक्नुयाद् इत्येतदर्थम् अनुसंधित्सुना तत्परता पूर्णतया वर्तनीया । पूर्वोक्तेषु त्रिषु क्षेत्रेषु सामग्रीसंग्रहविधीनामपि सम्यग् ज्ञानम् आवश्यकं तस्य । यद्यपि प्रकाशितसाहित्यस्य प्रभूतग्रन्थानां प्रकाशनत्वात्, यत्र क्वापि पुस्तकालयेषु लेखकसंग्रहालयेषु वा तदधिगमः सुकरस्तथापि न तथा सौलभ्यं यथा प्रतीयते ।

हस्तलेखगवेषणा तदेकत्रीकरणं च योग्यतावैशेष्यमपेक्षते । मौखिकसाहित्यसंग्रहः खलु योग्यतावैशेष्यतरमपेक्षते । एतदर्थं वैज्ञानिकसाधनानां सौकर्यं तदुपयोगश्च परमावश्यकः ।

प्रबन्धयोजना—सति विषये निर्वाचिते समुचिता प्रबन्धयोजना प्रस्तूयेत । इयं योजना प्रतिभाजुषां विदुषां परामर्शेन घट्येत । अनयैव योजनया सह तद्विषयकोपयुक्तपुस्तकानां यात्रोपयुक्तस्थानानां दिग्दर्शकयोग्यविदुषां च सूचीप्रस्तुतिर्निकामं हितावहा ।

प्रबन्धविषयाः—अनुसंधानप्रबन्धविषया भाषा-साहित्य-पुराणेतिहास-ज्योतिष-वेदविद्या-कृषि-स्थापत्य-व्यायाम-न्याय-वेदान्त-योग-मीमांसा-आगम-तन्त्र-व्याकरण-संबद्धा भवितुमर्हन्ति । तत्रापि वैदिकी भाषा, वैदिकभाषायां संस्कृतभाषायां च वृत्तयः (कृत्-तद्धित-समासैकशेष-सनाद्यन्त-धातुरूपाः), व्याकरणे नव्यन्यायप्रवेशसमीक्षा, व्याकरणस्य प्रत्यङ्गम् (कारकाणि, अव्ययानि,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धातवः, धात्वर्थाः, परस्मैपदम्, आत्मनेपदम्, सेडनिटो धातवः, संज्ञाः, कृत्तद्धिताः, लकाराः, अनुबन्धानां तुलना, लिङ्गानुशासनम्, गणपाठप्रयोगविवेचना, स्फोटसिद्धिः, व्याकरणस्य दर्शनत्वम्, पाणिनीयसूत्रार्थविमर्शः, आभ्यन्तरबाह्यप्रयत्नौ, अयोगवाहाः, भाषाविज्ञानदृशा सन्धिविवेचना, भाषाविज्ञानदृशा पद -(सुप्तिङन्त)- विवेचना; परिभाषाविवेचना, अपत्यप्रत्ययानां विमर्शः, निपातानां विचारः, मूर्द्धन्यवर्णविचारः, स्वरवर्णविमर्शः, कण्ठ्यवर्णविवेकः, तालव्यवर्णपरीक्षा, दन्त्यवर्णसमीक्षा, ओष्ठ्यवर्णविवेचना, आदेशसमीक्षा, पूर्वत्रासिद्धम्, अधिकारविमर्शः, (सप्तविधानामेव सूत्राणां विचारः), निरुक्तेन प्रातिशाख्यैश्च सह व्याकरणस्य तुलनात्मकम् अध्ययनम्, स्वरसमीक्षा, काव्येषु व्याकरणम् इत्यादयो व्याकरण-विषया एवमन्येऽपि समुद्भावनीयाः ।

शब्देषु संस्कृतभाषायामद्यत्वे संस्कृतभाषानिबद्धं कार्यं नगण्यं स्वोपज्ञम् । इह दिशि विशिष्टग्रन्थेषु भाषाशास्त्रीयमध्ययनं प्रस्तोतुं शक्यते । यथा—ऋग्वेदस्य, यजुर्वेदस्य, सामवेदस्य, अथर्ववेदस्य, ब्राह्मणानाम्, आरण्यकानाम्, उपनिषदाम्, सूत्राणाम्, तन्त्राणाम्, बौद्धसंस्कृतस्य, जैनसंस्कृतस्य, मनुस्मृतेः, मृच्छकटिकायाः, भासनाटकचक्रस्य, नैषधस्य, कालिदासकाव्यानाम्, भवभूतिनाटकानाम्, कालिदासनाटकानाम्, बाणभट्टगद्यस्य, वाल्मीकीयरामायणस्य, महाभारतेत्यादिग्रन्थानां भाषाशास्त्रीयमध्ययनं प्रकामम् उपयोगि स्यात् पुराणादिभिः सह ।

निर्दिष्टेषु विषयेषु तुलनात्मकम् ऐतिहासिकम् आलोचनात्मकमेकैकं संभूय वा प्रकाराः शक्यन्ते समाश्रयितुम् । एतादृग्भाषाध्ययनं प्रति विद्यार्थिनां विदुषां च प्रवृत्तिर्न्यूनतमेति तदर्थं विद्यार्थिनः प्रोत्साहनीयाः ।

साहित्यम्—द्वैविध्यं खलु साहित्यस्य १. वैदिकम्, २. लौकिकं चेति वैदिकग्रन्थेषु लौकिकसंस्कृतग्रन्थेषु च साहित्यिकम् अध्ययनं निकामम् उपयोगि स्यात् । इह हि शैलीदृशा अलङ्कारादिविविधाभिर्दृग्भिरनुसंधानकार्यं भवितुमर्हति । हस्तलेखगवेषणासूचनाभिरप्रकाशित-रचनानां कवीनां महाकवीनां वा परिज्ञानं लभ्यते । एतादृशाः कवयोऽनुसंधानविषयीकर्तव्याः । वाल्मीकिभासकालिदासादीनां संबन्धे सर्वाभिर्दृष्टिभिर्विचारेण भाव्यम् । प्रतिकवि विशिष्टाध्ययनं करणीयतामर्हति । कवीनां विशेषविषयेषु प्रवृत्तिषु वैतावच्चिरं न्यूनतमं कार्यं जातमिति तत्राप्यवकाशस्तदनुष्ठानार्थम् । जीवनसंपर्की साहित्यांशः क्वानुसंधानविषयीकृतः ? तत्राप्यनुसन्धानं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महते लाभाय कल्पते। अद्यापि विचारकोटेर्याथार्थ्येन तत्र परीक्षणं न जातम्, न च स्वोपज्ञताप्रयास एव।

कस्यचन ग्रन्थस्य वैज्ञानिकं संशोधनपूर्वकं सम्पादनमपि महत्त्वाधायको विषयः स्वीकर्तव्यः। अस्यां दिशि न्यूनतमा लघिष्ठाश्चोद्योगाः समजायन्त।

शोधानां केचिदभावाः

१. (क) अनुसंधित्सूनां वैज्ञानिकेषु शोधविधिष्वनभिज्ञता।

(ख) प्रबन्धप्रस्तावविधावप्यनभिज्ञता तेषाम्।

(ग) विषयस्य समग्रं रूपं न प्रस्तूयते, न च प्रतिकथनं प्रामाणिकतैव निर्विवादा।

(घ) शोधानां न विश्वजनीनसम्पर्कः।

(ङ) मिथो विश्वविद्यालयैश्च न सम्पर्कः।

एतासां समग्रन्यूनतानामपनुत्त्यै विश्वविद्यालयीयत्रैमासिकपत्रिकायाम् अनुसंधानीयानां वैज्ञानिकसिद्धान्तानां चर्चा भवेत्, विश्वजनीनाया अनुसन्धानसमुन्नतेर्विवरणं भवेत्; स्वीकृतप्रबन्धानां संक्षेपा भवेयुः, ऊरीकृतयोजनानां स्वरूपपरिचयस्य प्रकाशनं भवेत्, प्रेष्यमाणानां प्रबन्धानां कतिचिदध्यायाः पत्रिकाविद्वन्मण्डलेन संशोध्य प्रकाश्यमानीयेरन् अनुसंधित्सुपरामर्शपुरस्सरम्।

२. भारतीयविश्वविद्यालयानां संस्कृताध्यक्षाणां समितेः परामर्शेन तावदुच्चकोटिकस्यालोचनामण्डलस्य स्थापना क्रियेत। इदमालोचनामण्डलं स्वीकृतप्रबन्धं सावधानं प्रेक्ष्य, तत्र विद्यमाननैयून्यविषये व्यक्तिगतं गोपनीयं च निर्देशनं विभागाध्यक्षं प्रहिणुयात्, येन भविष्यत्प्रबन्धेषु न तादृशानि नैयून्यानि संपद्येरन्निति। अमेरिकादिदेशेषु सौविध्यमेतत्। तादृश्यां पत्रिकायां निबन्धानां (प्रायशः शोधाध्यायानां) प्रकाशनं निबन्धप्रामाणिकतायाः कृते प्रमाणपत्रसन्निभम्। असंतुष्टा अपि संपादकास्ते भविष्यति 'तथाविधं प्रमादं न कुर्यादनुसंधित्सुरिति' परिश्रमपूर्वकं प्रबन्धं संशोध्य तदनुरूपतायाः कृते प्रयतन्ते, प्रबन्धानुरूपं च कृत्वा परावर्तयन्ति।

३. प्रथमो वर्षः खल्वनुसंधित्सूनां परीक्षणाय निश्चीयेत। सौविध्यप्रदानपूर्वकम् अनुसन्धानार्थिनः प्रतिविभागं निकामं प्रवेशनीया निर्बाधम्। एष्वनुसन्धानार्थिषु याथार्थ्येन अनुसन्धित्सुत्वलक्षणप्रतिभासम्पन्ना अग्रीयविषयप्रदानपूर्वकं नियोज्येरन्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनुसंधानकार्यसंपत्त्यै योग्यतात्रयी नूनं परीक्षणीया—

(क) अनुसंधित्सुः—प्रतिभाशाली, सुधीरः, कर्मठो जिज्ञासुश्च भवेत् ।

(ख) संस्था—सामग्रीप्रचुरा, सामग्रीप्रबन्धदक्षा, अनुसंधानोचितवातावरणोपेता च ।

(ग) अधीक्षकः—विषयाभिज्ञः, विधिवेत्ता सहृदयश्च भवेदिति ।

प्रबन्धविषयेऽपि तथ्यद्वयी ध्यानीया—

(क) प्रतिकथनं प्रमाणपुष्टिः ।

(ख) स्वपरिसीमायां विषयस्य परिपूर्णतेति ।

ऐतिहासिकमनुसंधानम्

पुरातनानां ग्रन्थानां यथाक्रमम् अनुशीलनमपेक्ष्यत इह विषये । १. ऋगादिवेदाः सब्राह्मणारण्यकाः सोपनिषदश्च, २. सूत्रग्रन्थाः, ३. वाल्मीकीयं रामायणम्, ४. महाभारतम्, ५. बौद्धसंस्कृतम् स्मृतिपुराणसाहित्यम्, ६. नाटकादिसाहित्यम्, ७. पालिभाषा, ८. शिलादिलेखाः, ९. प्राकृतभाषा, १०. अपभ्रंशभाषा, ११. प्रादेशिक्यो भाषाश्च ।

व्याकरणसाहित्येतिहासाद्यनुसंधाने खल्वेषा शृङ्खला पौर्वापर्येण समाश्रयणीया । अलङ्काराणां छन्दसां तदैतिह्यस्य वानुसंधानप्रसङ्गे शृङ्खलेयमनिवार्यतयावलम्बनीया । वैदिकग्रन्थानां कोशा निर्मिता इत्यक्षरशः परायणश्रमोऽनपेक्षितः । वाल्मीकीयरामायणस्य महाभारतस्य च नास्ति कश्चन शब्दानुक्रमकोश इत्यृते पारायणान्नान्यः पन्थाः । बौद्धसंस्कृतग्रन्थानामपि कोशो नास्ति, संकरसंस्कृतकोशः (Hybrid) अवश्यं लभ्यते । संस्कृतनाटकादिसाहित्यस्यापि नास्ति कोऽपि कोशः । संस्कृतभाषोद्धरणकोशेषु बाथलिङ्क-राथनिर्मितः संस्कृतवर्तरबूख् इति कोशो रत्नम् । पालिभाषायाः कोशः (P. T. S. Pali-English Dictionary) सुलभः, प्राकृतभाषायाः 'पाइअसद्दमहण्णवो' इत्यपि तथा । अपभ्रंशभाषायाः कोऽपि कोशो नोपलभ्यत इति तद्भाषामयग्रन्थानां परिशिष्टलग्ना शब्दसूची द्रष्टव्या (यदि तत्र स्यात्) । प्रादेशिकीनां भाषाणां सन्ति केचन कोशा निर्मिताः । तत्र कश्मीरीयभाषायाः (ए डिक्शनरी ऑव दि कश्मीरी लैंग्वेज) कोशो जी. ए. ग्रियर्सनसंपादितः; नेपालीयभाषायाः (ए कम्परेटिव एण्ड ऐटिमॉलॉजिकल् डिक्शनरी ऑव् दि नेपाली लैंग्वेज) आर्० एल्० टर्नरसंपादितः कोशः; राजस्थानीयभाषायाः 'राजस्थानी सबद कोस' इत्याख्यो लालससंपादितः कोशः । मराठीभाषायाः कोशद्वयम्—१. 'ए डिक्शनरी, मराठी एण्ड इँग्लिश्' मोलेस्वर्थसंपादितः (मुम्बापुर्याम्, १८५७ खीस्ताब्दे), २. 'मराठी व्युत्पत्तिकोश' इत्याख्यश्च कृष्णाजीपाण्डुरङ्गकुलकर्णीसंपादितः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(मुम्बापुर्याम् , १९४९ खीस्ताब्दे)। सिन्धीभाषायाः कोशः कैप्टैन-गेअर्ग-स्टैकसंपादितः—'ए डिक्शनरी, सिन्धी इँग्लिश लैंग्वेज' इत्याख्यो विद्यते। भाईमायासिंहसंपादितः 'पञ्जाबी डिक्शनरी' इति द्रष्टव्यः। द्राविडभाषाणां व्युत्पत्त्यात्मकः कोशः टी० बरो–एम्० बी० ऍमनो-द्वारा संपादितः प्रशंसार्हः 'ए द्रविडियन् ऐटिमॉलॉजिकल् डिक्शनरी' इत्याख्यः[1]। भारतीय-भाषाणां तुलनात्मकः कोशः संप्रत्येव प्रकाश्यमानीतः 'ए कंपरेटिव डिक्शनरी ऑव इण्डो-आर्यन् लैंग्वेजेस्' इति टर्नरसंपादितः।

भाषात्मकानुसंधानार्थं भारोपीयभाषाणां भारेनीयभाषाणां च कोशान् विना शृङ्खला-भङ्ग इति तत्रार्थे एलॉयस्वाल्देमहाशयस्य 'फेर्ग्लाइशेन्देस् वर्तरबूख् देर इन्दो-गर्मनिशेन् स्प्राखेन्' इति कोशो जूलियसपोर्कर्नीसंपादितः, जूलियसपोर्कर्नीरचितश्च 'ऐतिमोलोगिशेस् इन्दोगर्मनिशेस् वर्तरबूख्' इति कोशः। पुरातनेरानियन्भाषायाः 'अल्तिरानिशेस् वर्तरबूख्' इति कोशः क्रिश्चियन्-बार्तोलोमे-विरचितोऽवश्यं विलोकनीयः। पर्सियन्भाषायाः स्टाइनगासविरचितः 'पर्सियन इँग्लिश् डिक्शनरी' इत्युपलभ्यः कोशः। सीमावर्तिनीनामपगान-पश्तोप्रभृतीनां भाषाणां कोशः नितान्तमपेक्षणीयाः। तत्र 'ए डिक्शनरी ऑव् दि पश्तो लैंग्वेज्' इति कोशः पश्तोभाषायाः। अस्मिन् प्रसङ्गे जिप्सीभाषाऽपरिहार्या। तस्या न कोऽपि कोशो मद्दृष्टिपथमुपेतः। जर्नल ऑव् अमेरिकन ओरिएण्टल सोसाइटी (J. A. O. S.) इति पत्रिकायाः सप्तमे खण्डे जिप्सीभाषायाः शब्दसूची यद्यपि न पर्याप्ता, तथापि विशिष्टा-ध्ययने नूनं साहायकमर्पयिष्यति। जिप्सीभाषायाः 'जिप्सी स्टडीज़' (टेल्स् इन् दि बाल्टिक् डायलेक्ट् ऑव् रोमानी) इत्यप्येको ग्रन्थः। एतस्य परिशिष्टे शब्दसूची निकामम् उपयोगिनी।

भाषासंबन्धिन्यैतिहासिकेऽध्ययने जर्मनभाषाऽनिवार्येति तदध्ययनं नोपेक्षणीयम्। यद्यपि फ्रेंचभाषाप्यध्येया तदर्थम्, तथापि जर्मनभाषया केवलयापि सुकरो निर्वाह इति जर्मन-भाषाऽनिवार्यतापदमारोहति। व्याकरणानुसंधाने तु पूर्वोक्तानां भाषाणां व्याकरणग्रन्था अपि दर्शनीयाः।

इतिहासो निर्वचनं च

ऐतिह्येन संबध्नाति निर्वचनम्। प्रयोगनिदर्शनम्, संबद्धभाषायाः शब्दैः सह तुलना,

---

१. द्र० सन्तालभाषायाः पी० ए० बोड्डिङ्गरचितः 'ए सन्ताल डिक्शनरी' इत्याख्यः, मुण्डारीभाषायाश्च मणीन्द्रभूषणभादुरिरचितः 'ए मुण्डारी इङ्गलिश डिक्शनरी' इति च।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गुणदोषनिरूपणं च शब्देतिहासनिकषः। शब्देतिह्यप्राप्त्यभावे काल्पनिकनिरुक्त्या संतुष्टिपरिपाटी दृश्यतेतमाम्—'मह्यां रौति मयूरः' इत्यादिः। अद्यत्वे भाषाविज्ञानयुगेऽपि भारतीया वैयाकरणाः प्राधान्येन समाश्रयन्ति परिपाटीमेनाम्। एवञ्जातीयकानि निर्वचनानि सन्त्यविचारितरमणीयानि बालक्रीडामात्राणि च। नैभिर्जिज्ञासूनां जिज्ञासा शाम्यति, न चानुसंधानकार्यं भजते गतिमत्ताम्। जीवरसायनविचक्षणस्य नोबेलपुरस्कारविजेतुः श्रीटिसेलियसस्य (स्वीडनाभिजनस्य) मतानुसारेण—'सदोषानुसंधानापेक्षया तदकरणं श्रेय इति बाढं स्मरणीयम्। अन्यच्च, अनुसंधानकार्ये नापेक्ष्यते क्षेपिष्ठता।' अनुमानानि न तावच्चिरं सत्यरूपेण स्वीक्रियेरन्, यावच्चिरं तथ्यानां संपुष्टिर्न भवेत्। अनुमानैः सूत्रगवेषणा न दोषाय कल्पते, तथापि तेषां प्राधान्येनाङ्गीकारो हेयः साधनस्य साध्यत्वेनाङ्गीकारवत्।

भारतीयवैयाकरणैर्ज्ञातानि भारतीयभाषाणां ध्वनिपरिवर्तनानि। यद्यपि पाणिनीयव्याकरणस्य सुमननं भारतीयभाषाणां विकासधाराविश्लेषणे प्रकामं सहायकम्, तथापि भारतीयव्याकरणस्याधारेण यूरोपियन्-ईरानियन्प्रभृतीनां भाषाणां विश्लेषणमविचारिता चेष्टा। व्याकरणं शब्दसिद्ध्युपायः, नेतिहासः।

'दॉयच्' इत्यस्य 'डच्' इत्यस्य वा दैत्य-शब्दात्, 'सुलतान' इत्यस्य च 'सुरत्राण'-शब्दाद् व्युत्पादनमनैतिहासिकम्। 'यूनिवर्सिटी' इत्यस्य 'योनिवरस्थति'-इत्यस्माच्छब्दात् 'बाइसिकल' इत्यस्य च 'वायुशकल'-शब्दाद् व्युत्पादने कल्पनाकौशलाद् दिष्टदुरुपयोगाच्चातिरिक्तं नास्ति किमप्यन्यत्। 'बाइसिकल'-शब्दस्य 'बाइ'-शब्दः संस्कृतभाषागत-'द्वि'-शब्दबोधक इति तदपेक्षया 'द्विचक्रिका'-शब्दो युक्तियुक्ततरः।

संस्कृतेतरभाषागतशब्दानां संस्कृतभाषायामनुवादो नास्ति काचन नूतनोपलब्धिः। द्राविडभाषागतस्य पुंवानरार्थकस्य 'आण्मन्ति' इति शब्दस्यानुवादो द्रष्टव्य ऋग्वेदीये वृषाकपिशब्दे। द्राविडभाषासु 'आण्' इत्यस्य 'आल्' इत्यस्य वार्थो भवति पुरुष इति, 'मन्ति' इत्यस्य च वानर इति। एष एव 'आल्' इति शब्दस्तत्र स्त्रीलिङ्गे 'आली' इति रूपेण व्यवह्रियते योषिदर्थकः[१]। तत्रत्यः स शब्दः संस्कृतभाषायां सखीवाचकत्वेन गृहीतः प्रयुज्यते। मूलतोऽयं संस्कृतभाषेतरः। वाल्मीकीयरामायणादावेष आण्मन्तिशब्दो हकाराग्रागमेन सह 'हनूमन्त्+औ, जसादयः'—रूपेण समुपलभ्यते। द्राविडशब्दानां परिचयाय द्रष्टव्यः काल्डवेलमहोदयलिखितः 'ए कम्परेटिव ग्रामर ऑव् दि द्रविडियन्' (लन्दन, १८५६) इति ग्रन्थः।

---

१. द्र० भूमिका 'तद्धितान्ताः केचन शब्दाः' इति पुस्तकस्य।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैदेशिकाः केचन शब्दा ईषत्परिवर्तनपूर्वकं तदवस्था एव संस्कृतभाषायां गृहीताः। ग्रीकभाषायाः 'केन्त्रोन्' [लैटिन--केन्त्रुम्] इति शब्दः संस्कृतभाषायां 'केन्द्रम्' इत्यनेन रूपेण परिगृहीतः, 'दियोमित्रियोस्' इत्ययं च 'जायामित्र > जामित्र' इत्येवं रीत्याङ्गीकृतः। वराहमिहिरकृते बृहज्जातके बहवः शब्दा दृश्यन्त एतादृशाः[१]। महाभारतोद्धृतः 'सुरुङ्गा' इति शब्दः संस्कृतेतरः। ग्रीकभाषायाः 'सुरिंग्क्स्'-शब्दप्रतिरूपः। तुलनीयौ 'सिरिंक्स्' इति 'सिरिंग्' इति चाङ्गल्भाषाशब्दौ। एतादृशानां शब्दानां निर्वचनस्य संस्कृतभाषायां मार्गणं शशशृङ्गायितम्। येन केनाप्युपायेन व्युत्पत्तिर्नितरामनैतिहासिकी निष्फलाऽप्रामाणिकी च। संस्कृतभाषातो विश्वभाषाणामुद्गमस्य भ्रान्तधारणा वैयाकरणान् विवशयति येन केनाप्युपायेन निर्वचनप्रतिपत्तये। शब्दानामितिहासात्मकविश्लेषणार्थं गुणदोषविवेचनार्थं चोपयोगिनी भविता विशिष्टा शिक्षा। यथा पाणिनीयेव्याकरणे द्वादशभिर्वर्षैराप्यते पाटवम्, तथैव शब्दानाम् ऐतिहासिकनिर्णयस्यार्थमपि विशिष्टशिक्षायोजनाऽपेक्ष्यते। शिक्षैषा प्रयत्नश्रमावपेक्षते, न तु कण्ठस्थीक्रियाम्। प्रयत्नश्रमाभ्यां प्राग् उचितनिर्देशकस्य सांनिध्यमनिवार्यतया वाञ्छनीयम्।

यद्यपि ग्रीकभाषायाः 'सेमिदालिस्' इति शब्दाद् 'लिस्' इत्यस्य लोपं विधाय संक्षिप्तस्य 'सेमिदा' इति शब्दस्याधारेण संस्कृतभाषायां समिता (= मैदा—हि०) इति शब्दः प्रकल्पितः, तथापि भारतीया वैयाकरणास्तदर्थप्रसङ्गे 'सम्यक् + इता = प्राप्ता' इति निर्वचनं दर्शयन्त्येव। ग्रीकभाषातः संस्कृतभाषायां गृहीतानामन्येषामपि शब्दानां संबन्ध एवञ्जातीयैव निर्वचनधारणा पदं करोति।

शब्देतिहासपरीक्षणार्थं प्रश्नोऽयं कर्त्तव्यो भवति—"शब्दोऽयम् अमुकवाङ्मये कदारभ्य प्रयुक्तः?" इति। तद्वाच्यानां पदार्थानां च व्यवहारः कदारभ्य जात इति। सहस्रद्वयवर्षानन्तरं संस्कृतभाषायां प्रयुक्तं 'वायुशकलम्' इति शब्दं दृष्ट्वाऽनुसंधाता लेखिष्यति—"आः! वायुशकलशब्दः संस्कृतभाषायां प्रयुक्तचर इति ज्ञायते यद् द्विचक्रिकाया निर्माणं सर्वतः प्रथमं भारते वर्षे संजातम्" इति। द्विचक्रिकायाः समग्राणामवयवानां नामानि संस्कृतभाषायां विचेयानीति तथ्यनिर्धारणार्थं तत्रापेक्षिष्यते। तत्र च संस्कृतभाषायां द्विचक्रिकायाः कस्याप्यवयवस्यानुपलब्धौ सत्याम्, अनुसंधायक इतरभाषासु गवेषणापूर्वकं ज्ञास्यति तत्स्रोतः। समिता-(मैदा)-

---

१.　क्रिय-तावुरु-जितुम-कुलीर-लेय-पाथोन-जूक-कौर्प्याख्याः।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्॥ १, ८।
तत्रैव पणफर-आपोक्लिम-मेपूरण-हेलि-मणित्थ-शब्दा अपि द्र०—१,१८;२,२;७,१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निर्मितानां सर्वेषां पदार्थानां नामानि गवेषणीयानि। नोपलभ्यते प्रयोगभूमिस्तदीया तत्र। भावप्रकाशे 'समिता' इति शब्दस्तत्पदार्थनिर्मितानां च केषाञ्चन खाद्यानामभिधेयान्यपि समधिगंस्यन्ते[१]। समिता गोधूमप्रभवा। दशमशताब्दभवेन यादवप्रकाशेन समुद्घोषि "गोधूमस्तु म्लेच्छभोज्यः" इति। भावप्रकाशकारेण भावमिश्रेणापि कृता तत्पुष्टिः— "महागोधूम इत्याख्यः पश्चाद् देशात् समागतः" इति।

तैत्तिरीयादिसंहिता-शतपथब्राह्मणादिग्रन्थेषु गोधूमशब्दस्योपलब्धौ सत्यामपि कुतस्तस्य पश्चिमदेशात् समागमनोल्लेखः? भवद्भिरनुसंधायकैः प्राचीनभारते गोधूमोपयोगः, गोधूम-निर्मितपदार्थानाम्, तन्निर्माणोपकरणानां च गवेषणा विधेया संस्कृतवाङ्मये। खीस्ताब्दीय-तृतीयशताब्दतः प्राक् संस्कृतभाषाग्रन्थेषु गोधूमपदार्थानाम्, तन्निर्माणोपकरणानां च नोपलभ्यते स्रोतः। कौटलीयार्थशास्त्रे मध्यमभोजनस्य 'आर्यभक्तम्' इति नामधेयम्। तत्रौदनसूपमात्रं भोजनम्। यद्यप्यस्ति तत्र गोधूमोल्लेखः, तथापि नास्ति तस्य भक्ष्यत्वेन विनियोगः। 'गोधूमास्तु क्षुण्णाः' इति तत्र यववत् क्षुण्णत्वं प्रत्यपादि तेषाम्। यज्ञेषु गोधूमनिर्मिता नोपयुज्यन्ते केचि-दपि पदार्थाः। परवर्तिनि काले गोधूमानां प्रयोगो यूपचषाले प्रक्रान्तः। परम्परेयं दाक्षिणात्या। तत्र गोधूमचूर्णदीपको ऽवह्रियते। इदानीं तावदन्यत्रापि दृश्यते तत्प्रचारः। तैत्तिरीयसंहितायां तु 'अनाहुतिर्वै जर्तिला गवीधुकाश्च' इत्यभिधाय यज्ञे निषिद्ध आरण्योऽपि गोधूमः, का कथा गोधूमस्यास्य। इमाः समग्राः शब्दसंक्रान्तयः प्रकाशयन्ति खल्वस्मदीयान् सांस्कृतिकान् संबन्धान्। भारतीयैरुपयोगीनि वस्तूनि तथात्मसात्कृतानि यत् तानि वैदेशिकत्वेन संस्कृत-भाषेतरत्वेन वा स्वीकर्तुं न पार्यन्ते। एवं कुर्वाणैश्च महत् कष्टमनुभूयते। उपयोगिनां वस्तूनां कुतश्चिदप्यादानं भारतीयसंस्कृतेः प्रकृतिः।

महाभाष्यकारेण भगवता पतञ्जलिना पदे पदे 'ओदन'—शब्दः प्रयुक्तः। तत्रैकत्र पचतीत्यस्यार्थो दर्शितः—'विक्लित्तिः' इति। रोटिकेत्यादेर्न पारयते सम्बन्धो भवितुं पचतिना। रोटीति शब्दो देशज-रोट्टप्रभवः। तदीयो मौलिकोऽर्थस्तत्र विराजते तण्डुलचूर्णमिति। गुर्जरभाषायामयं रोट्टशब्दो लोट-रूपेण दृश्यते।

सप्तदशशताब्द्याः प्रथमार्द्धे हालैण्डदेशस्य वाणिजेन पैलसर्टमहोदयेन लिखितम्—"यथा तुर्कादयो गोधूमरोटिकया सह मांसादिकं भुञ्जते, न तथा भारतीया अश्नन्ति। ते तु कणैः सह कणानदन्ति (गल्लह-रा बा-गल्लह मी-खुर्दन्द)। ओदनः, द्विदलम्, मनाग् घृतं चेति भारती-यानां भोजनम्।"

---

१. विशेषज्ञानार्थं द्र०—"तद्धितान्ताः केचन शब्दाः" इत्यस्य भूमिका।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इतिहासस्यास्य प्राप्तौ सत्यामपि 'पुरोडाश' इति शब्दाद् 'रोटिका'-शब्दस्य कल्पना नितरामसङ्गता । तादृशेन क्रमेण तु 'पूड़ा' 'पूड़ी' इत्यादिशब्दानां कल्पनापि 'पुरोडा'-शब्दाद् 'रो' इत्यस्य 'श' इत्यस्य च लोपे कृते सति शक्यते विधातुम् अवशिष्टस्य 'पुडा' इत्यस्याधारेण । उत्कलभाषायां दृश्यते 'पुरोड' इति शब्दः । एतस्यापि पुरोडशब्दस्य नास्ति संबन्धः पुरोडाश-शब्देन । स तु पूर्पुटशब्दाद् ज्ञेयो व्युत्पन्नः ।

भावप्रकाशे भावमिश्रेण पुरोडाशशब्दप्रयोगं विहाय 'रोटिका'-शब्दः प्रयुक्तः । माषपिष्टिकापूर्णगर्भाया गोधूमचूर्णतो रचिताया रोटिकाया नामधेयं तेन 'बेढमिका' इति प्रोक्तम् । प्राकृतभाषायाः प्रश्नव्याकरणसूत्रे (२, ५—पत्र० १४८), अभिधानराजेन्द्रे चोल्लिखितः 'वेढिम' (वेष्टिम) इति शब्दः । वेष्टनं कृत्वा निर्मितं खाद्यमिति तदर्थः ।

संस्कृतभाषायां संस्कृतेतरशब्दानामस्ति बृहती सूची । क्वचित् तु संस्कृतभाषातः पालिभाषायां गृहीतः शब्दः पुना रूपान्तरीभूय ततः संस्कृतभाषायां प्रयुक्तो दृश्यते—'चतुरः > चटुलः' (त्रासातिमात्रचटुलैः—रघु०६,५८) । संस्कृतभाषाया राष्ट्रशब्दः प्राकृतभाषायां क्वचिद् 'रट्ठ', क्वचिच्च 'लाट' इति जातः । प्राकृतभाषायाः स एव लाटशब्दः संस्कृतभाषामुपेतः । स वस्तुतः 'सुराष्ट्र'-शब्दस्य संक्षेपः । सुराष्ट्रस्य सीमा पश्चिमराजस्थानात् प्रभृति सिन्धुं यावत् । सिन्धुप्रदेशस्योपभाषा 'लड़िकाना', 'लाड़', आहोस्विद् 'लार' इति । पर्यन्ते राजस्थानस्य पश्चिमं भागमारभ्य संपूर्णः सुराष्ट्रप्रदेशः 'गुर्जर' इति 'गुजराट' (गुजरात) इति वा जातः । पश्चिमे राजस्थाने स्थितस्य 'अर्बुद' इत्याख्यपर्वतस्य शिखरं 'गुरु'-नाम्ना प्रथितम् (द्र० टाडलिखितं राजस्थानम्) । तस्मिञ् शिखरे दत्तात्रेयस्य पादुके विद्यमाने । एनमेव गुरुमारभ्य संपूर्णः सुराष्ट्रप्रदेशः 'गुरुसुराष्ट्र > गुर्जरात्र' इति संवृत्तः । मार्कण्डेयपुराणे तस्य 'गुरुस्वराः' इत्यनेन रूपेण सङ्केतमात्रम् । भाषाया ऐतिह्यानुसारेणापि सकारस्य जकारत्वेन परिणतिरनेकत्रोपलभ्यते । संस्कृतभाषायाः 'एधि' इति तादृशमेव निदर्शनम्—√अस् + धि > अज् + धि > अय् + धि > अइ + धि > एधि । अन्यान्यपि प्रस्तूयन्ते निदर्शनानि—न + √ सद् > नज्द् > नय्द् > नइ + द् > नेद् > नेदीयस्; पर्सियन्-भाषायां नज्द् (नजदीक) इति । एवमेव—अपि + √सद् > पिज्द् > √पीड् इति जातः ।

उक्तैतिह्यप्राप्त्यभावे विद्वांसो गुर्जरशब्दं खजरशब्दप्रभवं मन्यन्ते स्म । केचिच्च तं गोचरशब्देनापि सम्बध्नन्ति स्म । भण्डारकरस्यैकस्मिन् लेखे गुर्जरं गोचरेण संबध्य पुनरसन्तोषो दर्शितः, खजरशब्देन च सह संबन्धाय प्रयासः समनुष्ठितः । एवं कृतेऽपि, नाभूत् तेषामसन्तोषोन्मूलनम्, गुर्जरशब्दे रेफागमस्यासमाधेयत्वात् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवमेव जाटशब्दमूलमपि विवादास्पदम्। एतस्यैतिह्यानुसन्धानाय प्रयतनीयम्। निरुक्ते जाट्य-शब्दप्रयोगः[1]। देशीनाममालायां (३।४५) गुल्मलताप्रतानाद्यर्थको जाडीशब्दः। शब्दसाम्यमात्रेणैव नास्माभिस्तेषां परस्परसंबन्ध आश्रोतव्यः। सर्वे जाटा जटिला न भवन्तीति तेषां शिवजटाप्रभवत्वं निरस्तम्। जातीनां नामकरणे हेतवो भवन्ति देशाः, पर्वताः, नद्यो वेति; आहोस्वित् प्राक्तन्या जातेस्तच्छब्दस्वरूपं यद् विविधपरिवर्तनमास्वादयद् द्रागप्रत्यभिज्ञेयं भवतीति विदन्ति जातिविशेषज्ञाः। जाड्यसंबद्धं केचिदामनन्तीमं शब्दम्। जाटजातिः सिन्धुप्रदेशे पूर्वीयपञ्जाबप्रदेशे, राजस्थाने, उत्तरप्रदेशस्य च पश्चिमे भागे दृश्यते निवसन्ती। एते खल्वाभीरेभ्यो यादवेभ्यो वा न सन्ति भिन्ना इतीदमीयाः सकलाः प्रवृत्तीर्निरीक्ष्य विज्ञायते। यादवानां ह्यनेकाः श्रेणयः। श्रीकृष्णकालात् प्रभृतीमे दुर्दान्ता[2] उद्दण्डाश्च संवृत्ताः। ऋषय उद्विग्नाः समभूवन्नेषां व्यवहारेण। यादवशब्दस्यैकः प्रकारोऽस्माभिर्लभ्यते जादौ[3]-रूपेण; अपरस्तु—'जाट'-स्वरूपेण। ध्वनिपरिवर्तनानुसारेण दकारो डकारो भवति—'दर>डर' इति। डकारश्च टकारत्वं प्रतिपद्यते—अडी>अटी=जलप्रान्ते निवसन्ती काचन चटका (तुल० 'त्वमप्याडिर्भवस्वेति'—मार्कण्डेयपुराणे ६।१०) इति; 'आडम्बर>अटम्बर' इति च। केचित् तु 'मैसागेताइ[4]' इत्यस्य 'गेताई'>'जैटाई>जाट' इत्यामनन्ति।

समधिगतेष्वप्येतेषु समस्तेषु सूत्रेषु, अनुसन्धानमिदं तावच्चिरं प्रामाणिकं भवितुं नार्हति, यावच्चिरं जाटानां यदुवंशेन सार्धं संबन्धस्य प्रमाणैः पुष्टिर्न भवेत्। जाटस्य पुत्रः 'जटेटा' 'जटेटी', स्त्री 'जट्टी', शिशुश्च 'जट्टुङ्गड़ा', स स्वयं च 'जट्ट' इत्यभिधीयते। मद्रदेशेषु जट्ट (<जर्त)-प्रदेशस्य निवासिनां च चर्चा हेमचन्द्रेण स्वकीये प्राकृतव्याकरणे व्यधायि। वनस्परेण (पौराणिकं नाम—विश्वस्फाणिः, विश्वस्फूर्जिर्वा) ६०—१२० खीस्ताब्दे मगधमारभ्य

---

१. सन्त्यल्पप्रयोगाः कृतो ऽप्यैकपदिका यथा वृततिर्दमूना **जाट्य** आट्णारो जागरूको दर्विहोमीति—
निरु० १.४.१४ जाट्यः=जटावान् (निरुक्तविवृतिः)।

२. (क) 'जट्ट ते फट्ट बद्धे चंगे'—फट्ट=व्रणः।
(ख) 'जट्ट बूट जट्ट वहिड़, जट्ट वहिड़, वहड़।'
(ग) 'जट्ट वाहद्, जट्ट वाध।'
(घ) 'जट्ट णा जाणे गुण करा, चना ना जाणे वाह; उल्दा गुरू सोहागा, उल्दा गुरू शाह।'

३. जायव—णायाधम्मकहासुत्त १, १६।

४. Yue-ti were **Getai**. The old sound of Yue he observes was **Get**, correspondent with the Greek form **Getai**.
—Ancient India described by Ptolemy, pages 266.

—क्रमशः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रजिस्टर्ड न्यूज पेपर्स एक्ट के नियम के अन्तर्गत

विज्ञप्ति

१. प्रकाशन का नाम	सारस्वती सुषमा
२. प्रकाशन की तिथि	त्रैमासिकी
३. मुद्रक का नाम	श्री घनश्याम उपाध्याय
राष्ट्रियता	भारतीय
पता	वाराणसेय संस्कृत विश्वविद्यालय-मुद्रणालय, वाराणसी।
४. प्रकाशक का नाम	श्री बलदेव उपाध्याय
राष्ट्रियता	भारतीय
पता	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी
५. सम्पादक का नाम	श्री बलदेव उपाध्याय,
राष्ट्रियता	भारतीय
पता	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।
६. स्वामित्व	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।

मैं श्री बलदेव उपाध्याय घोषित करता हूँ कि उपरिलिखित विज्ञप्ति मेरी जानकारी के अनुसार बिलकुल ठीक है।

श्री बलदेव उपाध्याय
हस्ताक्षर

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चो-द्बोधनं प्रोत्साहनं चास्ति ।

४. अस्यां वाराणसेयसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां मौलिकविचार-पूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते ।

५. लेखकेन प्रकाशितस्य निबन्धस्य पञ्चविंशतिः प्रतिमुद्रणान्युपलब्धानि स्युः ।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्गलग्रन्थानां समालोचनाः प्रकाश्यन्ते ।

७. अस्या वार्षिकं मूल्यं सप्त रूप्यकाणि, प्रत्यङ्कं च रूप्यकद्वयं वर्तते ।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी–२" इति सङ्केतेन विधेयः ।

प्रकाशक—संचालक, अनुसंधान संस्थान, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी ।
मुद्रक—श्री घनश्याम उपाध्याय, वाराणसेय संस्कृत विश्वविद्यालय मुद्रणालय, वाराणसी ।
मु० सं०–४००।६८

CC-0. Sampurnanand University Collection. Digitized by eGangotri